वि.सं. - २०७३
वर्ष - ५
अङ्क - २

श्रेयोभूता शब्दसिद्धिः, पदसिद्धिश्च श्रेयसे।
वचःसिद्धिस्ततो नित्यं, निःश्रेयसपदप्रदा॥



# श्री निःश्रेयसम्

## षाण्मासिक-पत्रम्

१०

सम्पादकः
पंन्यासप्रवरश्रीसम्यग्दर्शनविजयगणी

स्वस्मिन् शुद्धिकरं, शुभाशयकरं,
स्वात्मोन्नतेस्साधकम्,
सद्भावं सुगुणालयं, शुभकरं,
सन्मार्गभावाऽऽदरम्।
श्रेयस्कृत् समभावकृत्, सुपरमं,
सद्दर्शनाऽऽस्पर्शकृत्,
श्रीश्रेयस्करसौख्यदं, हितकरं,
निःश्रेयसं सारदम् ।।१।।

(शार्दूलविक्रीडीतम्)

वि.सं. - २०७३
वर्ष - ५
अङ्क - २

श्रेयोभूता शब्दसिद्धिः, पदसिद्धिश्च श्रेयसे।
वचःसिद्धिस्ततो नित्यं, निःश्रेयसपदप्रदा।।

# श्री निःश्रेयसम्

## षाण्मासिक-पत्रम्

१०

श्री सुधर्मास्वामि जैन ज्ञानभंडार
C/o. विमुक्ति विश्व विद्यालय
हिराजैन सोसायटी के पास, रामनगर,
साबरमती, अहमदाबाद - 380005
फोन नं.:-(079) 55220409

सम्पादकः
पंन्यासप्रवरश्रीसम्यग्दर्शनविजयगणी

।। णमोत्थुणं समणस्स भगवओ महावीरस्स ।।
।। ॐ ह्रीं श्रीशङ्खेश्वरपार्श्वनाथाय नमः।।
।। पू. आत्म-कमल-वीर-दान-प्रेम-रामचन्द्रसूरिसद्गुरुभ्यो नमः।।
।। पू. मुक्तिचन्द्र-महोदय-ललितशेखर-जयकुञ्जर-मुक्तिप्रभ-हेमभूषणसूरिभ्यो नमः।।

## श्रीनिःश्रेयसम् (षाण्मासिक-पत्रम्-१०)

वर्ष : ६ अङ्क = २

**निमित्तम् :**
जैनशासनज्योतिर्धर पू.आ.श्रीविजयरामचन्द्रसूरीश्वराणां दीक्षाशताब्दीवर्ष-वि.सं.२०६९

**आशीर्वाद :**
सुविशालगच्छनायक पू.आ.श्री विजयपुण्यपालसूरीश्वराः
प्रवचनप्रभावक पू.आ.श्री विजयमुक्तिप्रभसूरीश्वराः
वात्सल्यवारिधि पू.पं.श्री वज्रसेनविजयगणिवराः

**प्रेरणा :**
प्रसिद्धप्रवचनकार पू.आ.श्री विजयश्रेयांसप्रभसूरीश्वराः
प्रवचनकुशल पू.आ.श्री विजयहेमप्रभसूरीश्वराः

**सम्पादनम् :**
पूज्यपंन्यासप्रवरश्रीसम्यग्दर्शनविजयगणिवरः

**संशोधनम् :**
पूज्य साध्वीजीश्री प्रशमनिधिश्रीः
पं.श्री अमृतभाई पटेलः

**प्रकाशनप्रतिष्ठानम् :**
**जगद्गुरू पू.आ.श्री विजयहीरसूरीश्वरजी श्रुतज्ञानभवनम्**
ए-१, घनश्यामपार्क फ्लेट, १७, आनंदनगर सोसायटी,
त्रिशला फ्लेट के सामने, भट्ठा, पालडी, अहमदाबाद, फोनः (ओ) २६६० ५८६४

**प्रकाशनम् :**
वैक्रमीय २०७३, आषाढ कृष्णा चतुर्दशी,
शनिवार, दि. २२-७-२०१७

* प्रतय : ७५०
* मूल्यम् : ₹. २००

---

**आभारः.....अनुग्रहः.....अनुमोदनम्.....**
प्रसिद्धप्रवचनकारपूज्यपादाचार्यप्रवरश्रीमद्विजयश्रेयांसप्रभसूरीश्वराणामुपकारस्मृत्यर्थम्
**वर्षिल अशोक छेडाया आत्मश्रेयार्थश्च अशोक भवानजीभाई छेडा परिवारेण**
अस्मिन् ग्रन्थे द्रव्यव्ययेन सुकृतसञ्चयः कृतस्तमनुमोदयति
**जगद्गुरु पू.आ.श्री विजय हीरसूरीश्वरजी श्रुतज्ञानभवनस्य सञ्चालकगणः**



# विषया विषसदृशाः ....

संस्कृतभाषया संस्कृते रक्षणं, संस्कृतिरक्षया धर्मरक्षणम्। यदि धर्मो रक्षितस्तर्हि विषयलोलुपता न भवति। विषयलोलुपतया च दुःखं भवति। अतः विषया विषसदृशा इति वाक्यं चिन्तनीयं, ते स्वात्मनि सर्वान् दोषानुत्पादयन्ति। स्वगुणान् नाशयन्ति, दोषानुत्थापयन्ति, नयन्ति कुमार्गं, विवेकं त्याजयन्ति, न्यायमार्गं विस्मारयन्ति, नैकेच्छामुत्पादयन्ति। विषं तु स्वजीवितमेकवारमेव नाशयन्ति किन्त्वमी विषयास्तु प्रतिभवं मारयन्ति, विषयाः स्वात्मानं दुर्गतौ क्षिपन्ति। ततस्ते विषादप्यतिरिच्यन्ते।

अत्रैकदृष्टान्तस्मरणे आयाति। एको जनो वने विचरन् श्रान्तः क्षुधितः पिपासितश्च सञ्जातः। भोजनं जलञ्च प्राप्तुमितस्ततः पश्यति। किन्तु न किमपि प्राप्तं तेन।

तदा सः पुनः पुनो निभालयितुं लग्नः। तदा तस्य दृष्टिः पतितैकस्मिन् वृक्षे। तत्र च फलानि बहुनि दृष्टानि। वर्धितोत्साहस्तेषांसुष्ठवाऽऽकारं दृष्ट्वा हर्षोल्लसितो जातः। सुगन्धेनैव तेषां रसोऽपि ''मधुरम्। इति सः तेषा सुष्ठ्वाकारं। ज्ञानलक्षणासान्निकर्षेणावगतवान्। तदवाप्तये चित्ते लोलुपता वर्धिता। अतः फलानि स्पृष्टाणि तेन मृदुस्पर्शोऽपि अनुभूतः।''

बुभुक्षितः स द्रुतं द्रुतं फलानि त्रोटयित्वा भोक्तुं लग्नः। फलभोजनान्तरं घटिका द्विघटिकायामेव तस्य देहो विपरिणमितः। असह्यपीडा सञ्जाता तस्य देहे।

क्षणार्धेनैव च स गतो मृत्युमुखं, कारणंस्तानि विषरुपाणि किम्पाकवृक्षफलान्यासन्। तेषां स्वादनानन्तरं जीवः कथं मृत्युंमुखं नागच्छेद्? यथा किम्पाकतरुफलानि जीवो आसक्ततयास्वा दयति तदा मुत्युमुखं गच्छति।

तस्माद्धर्मोपदेशका अपि उपदेशयन्ति भव्यान्। यथा न विषयेषु किञ्चिदपि लोलुपता कर्तव्या। क्षुत्तृट्श्रमादीनि सोढव्यानि, विह्वलता नैव कार्या।

ततो विषयानां विजये सुतरां प्रयतितव्यम्। विषयविपाको न सुब्ढुतर इति पुनः पुनः स्मरणीयम्, कदापि न विस्मरितव्यम्। प्रयत्नातिशयः कर्तव्यः।

जीवो यदा पञ्चेन्द्रियविषयान् भुनक्ति तदा तदुपभोगेच्छा वर्धते। ततस्तद् विमुक्त्यर्थं निःश्रेयसं पठनीयं, तद्वाचनादेव तद्विषयलोलुपता प्रणश्यति। ततो धर्मो रक्ष्यते। धर्मरक्षणात् संस्कृतिसंस्कृतभाषारक्षा च सुकरा, तस्मात् निःश्रेयसलाभोऽपि सुलभः।

।। इति शम्।।

- सद्गुरुचरणसेवाहेवाकी पंन्यासप्रवरश्री
सम्यग्दर्शनविजयगणि

# क्रमनिर्देशः


| विषयः | लेखकादयः | पृष्ठः |
|---|---|---|
| * प्रतिघोषः | | 6 |
| विभाग : १ प्राचीनकृतयः | | |
| खण्ड : १ पूर्वमहर्षीणां वचनामृतम् | | |
| * ।। श्रीशङ्खेश्वरपार्श्वनाथजिनस्तोत्रम्।। | आचार्य-श्रीरत्नसञ्चयसूरिः। | 8 |
| * श्रीचतुर्विंशतिजिनानां स्तवनम्। | मुनिश्री धर्मतिलकविजयणी | 9 |
| * 'संसार दावानल' स्तुतिः | अमृत पटेलः | 12 |
| विभाग : २ अर्वाचीनकृतयः | | |
| खण्ड : २ यशोप्रज्ञादर्शनम् | | |
| * परमज्योतिः पञ्चविंशतिका | आचार्य श्री कल्याणबोधिसूरिः | 18 |
| * वृत्तं यशोविजयवाचकपुङ्गवानाम् | पंन्यासप्रवरश्री सम्यग्दर्शन विजयोगणी | 19 |
| * यशोगुर्जरस्तवनानुवादः | मुनिश्री आत्मदर्शनविजयः | 21 |
| खण्ड : ३ सूरिरामचन्द्रदीक्षाशताब्दीभावाञ्जलिः | | |
| * विजयप्रेमसूरिस्तवाष्टकम् | पंन्यासश्री भद्रङ्करविजयगणिवराः | 26 |
| * श्रीप्रेमसूरिप्रार्थनाऽष्टकम् | आचार्यश्री पूर्णचन्द्रसूरिः | 27 |
| * महासत्यगाण्डीवटङ्कारकारी | गच्छाधिपतिः आचार्य श्रीविजयपुण्यपालसूरिः | 28 |
| * श्रीप्रेमशतकम् | आचार्यश्रीविजयमुक्तिप्रभसूरिः। | 31 |
| * रामचन्द्रसूरिस्तुतिविंशतिका | आचार्यश्रीविजयतपोरत्नसूरिः | 34 |
| * श्रीरामचन्द्रीयमहाकाव्यम् | पंन्यासप्रवरश्रीमोक्षरतिविजयोगणी | 37 |
| * स्तुवे रामचन्द्रं तपागच्छनाथम् | मुनिश्रीज्ञानभूषणविजयः | 39 |
| * प्रेमसूरीश्वराणां प्रसङ्गद्वयी | पण्डितप्रवरश्रीमत्तृप्तिनारायण झा | 40 |
| खण्ड : ४ प्रकीर्णककृतयः | | |
| * ।। आगमस्यामृतम्।। | आचार्य श्रीविजय कल्याणबोधिःसूरिः | 43 |
| * श्री चारित्रसप्तविंशतिका | पंन्यासप्रवरश्रीसम्यग्दर्शनविजयगणी | 44 |
| * बुद्धिः | श्रीकमलः | 60 |
| * श्री सरस्वतीस्तोत्रम् | मुनि श्री ज्ञानभूषणविजयः | 62 |
| * समर्पणसौन्दर्यम् | मुनिश्री दर्शनरक्षितविजयः | 64 |

# क्रमनिर्देशः


| विषयः | लेखकादयः | पृष्ठः |
|---|---|---|
| * बहुरत्नावसुन्धरा | मुनिश्री दर्शनरक्षितविजयः | 67 |
| * कृपा फलवती तव | मुनिश्री दर्शनरक्षितविजयः | 68 |
| * कार्यसिद्धिः | मुनिश्री प्रशमरक्षितविजयः | 70 |
| * किञ्चित् विनोदाय | मुनिश्री दिव्यदर्शनविजयः | 72 |
| * आर्यत्वमिदम् रमणीयतरम् | देवार्थः | 76 |
| * संस्कृतभाषाया आधुनिका जैन ग्रन्थकाराः | साध्वीजी श्रीविरागदर्शनाश्रीः | 79 |
| * काव्यशास्त्रविनोदेन | साध्वीजी श्रीप्रशमनिधिश्रीः | 84 |
| * जातस्य ध्रुवं मृत्युः | साध्वीजी श्रीप्रशमनिधिश्रीः | 85 |
| * सरस्वत्यष्टकम् | साध्वीजी श्रीचिन्तनप्रियाश्रीः | 87 |
| * हे ! भो !मम प्रार्थनां स्वीकुरु | अध्यापकश्री तन्मयः ललीतः शाहः | 88 |
| * संस्कृत-रुपान्तरकारः | शान्तप्रकाशः सत्यदासः | 89 |
| खण्ड : ५ मधुरं मधुरं मधुराधिपतेः सर्वं मधुरम् | | |
| * चैतन्यप्रवाहः | श्रेयःसरित् | 92 |
| * जैनं जयति शासनम्... | श्रेयःदर्शी | 94 |
| * नवं नवं सौन्दर्यम्..... | श्रेयःदर्शी | 95 |
| * परमपदपन्थाः... | श्रेयःपथिकः | 96 |
| * मधुरम् मधुरम्... | श्रेयःपथिकः | 97 |
| * आत्मैश्वर्यप्राप्त्युपायः... | श्रेयस्करः | 98 |
| * स्वादु-स्वादु शुद्धं-शुद्धं सुखावहं-शुभावहं | श्रेयःश्रीः | 99 |
| * रहस्याऽऽस्वादः... | श्रेयःसखा | 100 |
| * काव्यकौतुकम्- | श्रेयःसद्मा | 102 |
| * वैविध्यम्..... | श्रेयःसेतुः | 104 |
| * वैविध्यम्..... | श्रेयःसेतुः | 105 |
| * साम्प्रतम्.... | श्रेयःसद्मा | 106 |
| * वादः, न वितण्डावादः | श्रेयःकान्तः | 108 |

# प्रतिघोषः

परमादरभाजनीभूताः मुनिश्रीसम्यग्दर्शनविजयगणिमहाशयाः! सादरं मदीयाः सन्तुतरां प्रणतिततयः। भवदीयेन सुचारुसम्पादनेनाविष्क्रियमाणं निःश्रेयसं नाम षाण्मासिकं पत्रं दृग्गोचरीकृत्य प्रसन्नतामधिगतवान्। महनीयैः विविधैः विषयैः समृद्धमिदं पत्रं नो मनांस्याकर्षयति। अहमत्र गुजराते वेरावलनगरे निवसामि, संस्कृतमध्यापयामि। भवन्तः सादरं निःश्रेयसं पत्रं मह्यं प्रेषयितुं निवेद्यते । अथ च इतराण्यपि संस्कृत-प्राकृतसम्बद्धानि प्रकाशनानि यथाशक्यं प्रषेयितुं प्रार्थये। सादरं प्रणमामि।

निवेदकः

**नरेन्द्रकुमार पण्ड्या**

टी-१ जयदेव पार्क, विद्युत नगर रोड

वेरावल

# विभाग : १ प्राचीनकृतयः

## खण्ड : १ पूर्वमहर्षीणां वचनामृतम्

प्रकटितसज्ज्ञानलोचनाः! गतमोहतन्द्राः ! विकसितज्ञानपाटवाः !

भो ! निःश्रेयससाभिलाषिणः ! सज्जनाः ! माम् आकर्णयन्तु, आकर्णयन्तु। मां विलोकयन्तु, विलोकयन्तु। निःश्रेयसस्य प्रथमविभागे प्रथमखण्डे पूर्वर्षिरचित-शास्त्रग्रन्थानि प्रकटीभवन्ति। तान्यप्रकटितान्यपि सन्ति।

तेषां गुणसमृद्धानां महात्मनां प्रकृष्टक्षमादिभावविभावितान्तःकरणानि। तेन तेषां चिन्तनमपि प्रकृष्टतरम्। किं पुनः शास्त्रसर्जनम्?। तेषां चरणमपि प्रकृष्टम्। सुविशुद्धचरणपरिपालनेन सदैव प्रशमाभरणसुशोभितास्ते, तपस्तेजोभिर्दुष्प्रधृष्याः, भव्यात्मभिः सदैवाभिगमनीयाः, शीलसुगन्धवासविलेपनैः विलिप्ताः, चरणप्रतिज्ञाष्वचल इवाचलाः, सद्गुणमण्डन-परिमण्डिताः, साम्यनिधानाः, दर्शनाचारेषु सुस्थिराः, निष्ठाप्राप्तमतिश्रुतज्ञानीनः, सदागमैः सुपरिचिताः, अभ्यस्तक्रियाकलापाः, मार्दवोपशोभिताः, सदैवार्जवविभूषिताः, सन्तोषसहिताः, संयमोपवने समासक्ताः सत्यपक्षप्रियाः, शौचपरिभाविताः, निरन्तरमाकिञ्चन्यब्रह्मचर्याभ्यां परिपोषिताः, संसारमार्गपरिमुक्ताः, मोक्षैकलक्ष्यदक्षाः, परगुणप्रेक्षाः, परदोषनिरपेक्षाः, निस्पृहभावभृताः, संयमयोगयुक्ताः, ते महामतयः सन्ति।

निरूपचरितगुणसमन्वितानां तेषां वचनं क्रोधादिदोषवृक्षनिर्दलने कुठारसदृशम्। रागशैत्यहरणे तपनसदृशम्। मानपर्वतविदारणे कुलिशसमम्। सर्वदोषविनाशकम्। सर्वगुणसम्पादकं निःसंशयं भवत्येव इत्यस्मात् तेषां वचनं प्रस्तूयते।

वाचकाः! आस्वादयन्तु। सूज्ञाः! वचनामृतं पिबन्तु।
पुष्टा भवन्तु। तुष्टा भवन्तु।
स्वात्मानं समुद्धारयन्तु।

।। परमः।।

श्रीमुनिचन्द्रसूरिकृतं

# ।। श्रीशङ्खेश्वरपार्श्वनाथजिनस्तोत्रम्।।

सम्पादक : – आचार्य–श्रीरत्नाकरसूरिशिष्य –
आचार्य–श्रीरत्नसञ्चयसूरिः।

समस्तकल्याणनिधानकोशं, वामाङ्गकुक्ष्येकमृणालहंसम्।
अलङ्कृतेक्ष्वाकुविशालवंशं, **वन्दे सदा शङ्खपुरावतंसम्** ।।१।।

आराधितः श्रीऋषभस्य काले, विद्याधरेन्द्रेण नमीश्वरेण।
पूर्वं हि वैताढ्यगिरौ जिनं तं, **वन्दे सदा शङ्खपुरावतंसम्** ।।२।।

यः पूजितः पन्नगनायकेन, पातालभूमौ भवनाधिपेन।
कालं कियन्तं जिननायकं तं, **वन्दे सदा शङ्खपुरावतंसम्** ।।३।।

सदा जरासङ्घजयोद्यतेन, कृष्णेन नेमीश्वरशासितेन।
पातालतो बिम्बमिदं तदानीमानीय संस्थापितमेव तीर्थम् ।।४।।

जरार्त्तभूतं स्वबलं विलोक्य, यत्स्नात्रपीयूषजलेन सिक्तम्।
सज्जीकृतं तत्क्षणमेव सर्वं, **वन्दे सदा शङ्खपुरावतंसम्** ।।५।।

पञ्चाशदादौ किल पञ्चयुक्त, एकादशे वर्षशते व्यतीते।
निवेशितः सज्जनश्रेष्ठिनाऽयं, **वन्दे सदा शङ्खपुरावतंसम्** ।।६।।

काले कलौ कामगवी प्रनष्टा, चिन्तामणिः कल्पतरुश्च नष्टः।
धत्ते ह्यसौ तत्प्रतिहस्तकत्वं, **वन्दे सदा शङ्खपुरावतंसम्** ।।७।।

प्रभूतरोगेण विनष्टदेह आराध्य यं दुर्जनशल्यदेवः।
चकार देहं मदनस्य तुल्यं, **वन्दे सदा शङ्खपुरावतंसम्** ।।८।।

राज्यार्थिनां राज्यसुखप्रदाता, सुतार्थिनां सन्ततिदायकश्च।
नेत्रार्थिनां लोचनदोऽसि नित्यं, **वन्दे सदा शङ्खपुरावतंसम्** ।।९।।

इति स्तुतः श्रीमुनिचन्द्रसूरिणा कृपापरः शङ्खपुरावतारः।
प्रबन्धकादौ प्रणतासु भाजां प्रयच्छ नित्यं निजपादसेवाम् ।।१०।।

---

टीप्पण – सं. ११५०

विद्वद्वर्याचार्यश्रीशान्तिशेखरसूरिविरचितं

विद्वज्जनचित्तचमत्कारकारकाऽतीवगूढसमस्यागर्भितं
प्रश्नोत्तरमयं वर्त्तमानकालीनमङ्गलाचरणम्।

# श्रीचतुर्विंशतिजिनानां स्तवनम्।

जैनधर्मदिवाकराचार्य-
श्रीमद्विजयसुशीलसूरिविरचितसुमङ्गलाटीकायुतम्

प्रेषक : मुनिश्री धर्मतिलकविजयगणी

नत्वाऽहं श्रीजिनेन्द्रान् वै, देवान् गणधरानपि।
वाग्देवीं नेमि-लावण्य-दक्षान् सूरीश्वरान् गुरून् ॥१॥
(अनुष्टुब्वृत्तम्)

श्रीमज्जिनेन्द्रनामानं, स्तवरूपं मनोहरम्।
मङ्गलाचरणं दृब्धं, शान्तिशेखरसूरिभिः ॥२॥

क्रियते बालबोधार्थं, तस्य टीका सुमङ्गला।
पद्यभावानुवादोऽपि, सुशीलसूरिणा मया ॥३॥

मङ्गलस्तवनरूपं मूलपद्यमाह-

आनन्दवन्दारुसुपर्वकोटी - कोटीरसण्टङ्कितपादपद्मान्॥
देवांश्चतुर्विंशतिमर्चयामि, प्रश्नोत्तरस्मेरनवप्रसूनैः ॥ १॥ (इन्द्रवज्रा)

अन्वयः - आनन्दवन्दारुसुपर्वकोटी-कोटिरसण्टङ्कितपादपद्मान् चतुर्विंशतिं देवान् प्रश्नोत्तर-स्मेरनवप्रसूनैः (अहं) अर्चयामि।

सु०-टीका -

आनन्दवन्दारुसुपर्वकोटी-कोटीरसण्टङ्कितपादपद्मान्। आनन्दमयानांः प्रसन्नतायुक्तानां वन्दनस्वभावानां सुपर्वकोटीनां कोटिशः देवानां किरीटमुक्ताभिः स्पर्शितान् पादपद्मान् चरणकमलानि येषां तान्। चतुर्विंशतिं देवान्। जिनवरान् श्रीऋषभादि-महावीरपर्यन्ताँस्तीर्थङ्करान्। प्रश्नोत्तरस्मेरनवप्रसूनैः। प्रश्नानामुत्तराणि प्रश्नोत्तराणि तेषां स्मेरः। नवप्रसूनानां नूतनभावपुष्पाणां स्तबकं, तेन स्तबकेनाहम् अर्चयामि = सम्पूजयामि (अर्च् पूजायाम्)। इदम् इन्द्रवज्रावृत्तम् तल्लक्षणमाह - स्यादिन्द्रवज्रा यदि तौ जगौ गः।

श्रीऋषभदेवजिननामस्तवनरूपं मूलपद्यमाह-

**अब्धेरकारात् परतः क उक्तो?, जगन्ति सर्वाणि जितानि केन?।**
**मध्ये मतः कस्त-दयोश्च वर्णः?, कः श्रीजिनो नाभिकुलावतंसः?॥२॥**

**(उपजातिवृत्तम्)**

**अन्वयः- अब्धेः अकारात् परतः क उक्तः?, केन सर्वाणि जगन्ति जितानि?, तदयोः मध्ये कः वर्णः मतः? नाभिकुलावतंसः कः? श्रीजिनः।**

**व्याख्या-'अब्धेः** शब्दस्य **'अ'** वर्णात् **परतः कः** वर्णः। किमक्षरम् ? 'आ' व्याकरणशास्त्रे 'आ' इत्यस्य 'आत्' कथ्यते। आत् शब्दे 'त्' वर्णस्य इत् संज्ञा, पश्चात् लोपः। इत् संज्ञाक्षरस्य लोपो भवति। **सर्वाणि जगन्ति**-समस्तविश्वानि **केन जितानि?** केन इति शब्दस्य प्रयोगः, केन शक्तियुक्तेन अर्थात् आदिजिनेश्वरात् आति अस्ति कोऽपि शक्तिसम्पन्नः? यः विश्वं जेतुं समर्थः। अर्थात् नैव। 'इना' अर्थात् कामदेवेन तदयोः मध्ये कः वर्णः? 'थः' नाभिकुलावतंसः-नाभेः कुलं नाभिकुलं तस्यावतंसः कुलभूषणः कुलमौलिः कः श्रीजिनः? अर्थात् **'आत्-इना-थः'-आदिनाथः-श्रीऋषभदेव।**

अस्मिन् श्लोके श्रीआदिनाथस्य श्रीऋषभदेवस्य स्तुतिः आचार्यश्रीशान्तिशेखरसूरिवरेण शब्दचातुर्येण रम्या कृता॥ **इदमुपजातिवृत्तम्। तल्लक्षणमाह- अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः॥**

---

श्रीअजितनाथजिननामस्तवनरूपं मूलपद्यमाह-

**को वक्ति शब्दो वद निश्चयं भो?, अवाप्यते कुत्र यशो भटेन?।**
**क इष्यते सर्वजनैर्निकामं?, चकार कः स्वां जननीं सवित्रीम्॥३॥**

**(उपजातिवृत्तम्)**

**अन्वयः- भोः! वद। कः शब्दो निश्चयं वक्ति? भटेन यशः कुत्र अवाप्यते ? सर्वजनैः निकामं कः इष्यते? कः स्वां जननीं सवित्रीं चकार?।**

**व्याख्या** -कः शब्दः निश्चयतां धत्ते? अर्थात् निश्चयार्थं वक्ति, व्यनक्ति एतादृशः कीदृशः शब्दः? भोः! वद = हे! कथ्यताम्। **'वै'**। भटेन-अवाप्यते कुत्र यशः? **'जये'**। निकामं निश्शेषेण कामं = वाञ्छितं वा इच्छितं सर्वजनैः सर्वसामान्यैः किम् इष्यते? **'अयः'** = सद्भाग्यम्। सवित्रीम् जगज्जननीं चकार कः महापुरुषः स्वां जननीं = स्वमातरम्? 'वै+जये+अयः'= **वैजयेयः**। श्रीअजितनाथ-स्तीर्थङ्कर एव एतादृशं चकार। वैजये अयः = वैजयेयः। विजयायाः अपत्यं पुमान् वैजयेयः अजितनाथः। उपजातिवृत्तमिदं पद्यम्।

श्रीसम्भवनाथजिननामस्तवनरूपं मूलपद्यमाह-

**धातुः सुधीभिः पचते र्मतः कः? सर्वेऽङ्गिनः किं स्पृहयन्ति नित्यम्?**
**श्रीनन्दनं कः कुरूते स्म भस्म? को धान्यवृद्धिं विदधेऽवतीर्णः?॥४॥**

(इन्द्रवज्रावृत्तम्)

**अन्वयः-'सुधीभिः पचते धातुः कः मतः?, नित्यं सर्वेङ्गिनः किं स्पृहयन्ति? श्रीनन्दनं कः भस्म कुरुते स्म? अवतीर्णः कः धान्यवृद्धिं विदधे?' इत्यन्वयः।**

**व्याख्या-सुधीभिः** विद्वद्भिः **पचते** इति शब्दस्य **धातुः कः मतः** कोऽर्थः गृहीतः? **'श्री'** (श्रींग्श्-पाके)। **सर्वेऽङ्गिनः** सर्वे जनाः **नित्यम्** प्रतिदिनं **किं स्पृहयन्ति**-किम् इच्छन्ति? **'शम्'** सुखम् इच्छन्ति। श्रीनन्दनं मीनकेतनं **कः भस्म कुरुते स्म?** को कामं दहति? 'भवः शङ्करः कामं भस्मीकरोति। **अवतीर्णः** जनयित्र्या कुक्षौ आगते सति एव, कः एतादृशः महापुरुषः यो **धान्यवृद्धिं विदधे?** 'श्री+शम्+भवः' = **श्रीशम्भवः**-श्रीसम्भवनाथस्तृतीयतीर्थङ्करः॥

---

श्रीअभिनन्दनस्वामिजिननामस्तवनरूपं मूलपद्यमाह-

**करोति भूषां गृहधर्मिणां का?, कं वैष्णवाः स्वे हृदये दधन्ते?।**
**को लीलया विश्वजनस्य जेता?, सुपर्वभिः को महितश्च नेता?॥५॥** (उपजातिवृत्तम्)

**अन्वयः -'का गृहधर्मिणां भूषां करोति?, वैष्णवाः कं स्वे हृदये दधन्ते?, विश्वजनस्य लीलया को जेता?, सुपर्वभिः को महितश्च नेता?' इत्यन्वयः।**

**व्याख्या-**

(१) **गृहधर्मिणां** गृहस्थजनानां **का** कीदृशी **भूषां** शोभां करोति? **'सा-लक्ष्मी'।**

(२) **वैष्णवाः** विष्णोः अनुयायिनः जनाः **कं** कीदृशं **स्वे** निजे **हृदये** चित्ते **दधन्ते** धारयन्ति भजन्ते वा? 'अम्-विष्णुम्'।

(३) **विश्वजनस्य** जगज्जन्तोः **लीलया** हेलया को जेता-**को जेतुं** समर्थः? 'वरिः-कामदेवः'।

(४) सुपर्वभिः उत्तमपर्वभिः कः कीदृशः महितश्च पूजितश्च नेता स्वामी? 'सा-अम्-वरिः'-सांवरिः।

सारांश : गृहस्थजनानां भूषा 'श्री-लक्ष्मीश्च', वैष्णवाः 'अम्' विष्णुं ध्यायन्ति, लीलया हेलया एव जनानां चेतांसि कः जेतुं शक्तिमन्तः 'वरिः-कामदेवः' इत्युत्तरः, वरि त्र्यर्थात् कामः, = उ+[1]अरिः, गुणः वरिः, उः = ईश्वरः। - तस्य अरिः शत्रुः कामः 'सा-अम्-वरिः'-सांवरिः श्री संवरनृपस्य पुत्रः **श्रीअभिनन्दनस्वामी** इत्यर्थः॥

प्रबन्धकादौ प्रणतासुभाजां प्रयच्छ नित्यं निजपादसेवाम् ॥१०॥

---

१) ''अत्र इवर्णादिरस्वे स्वरे य-व-र-लम्''इतिसूत्र कार्यं ''उ+अरि-व्+अरि'' भवति।

## अवचूरित्रिकयुता –

# 'संसार दावानल' स्तुतिः

– अमृत पटेलः

(निजायुषश्चरमसमये याकिनीमहत्तरासूनुना 'भवविरह' पदाङ्कितेन श्री– हरिभद्रसूरिवरेण प्रणीतेयमित्याम्नता– 'संसारदावानल' इत्याद्यपदेन 'संसारदावानलाभिधया प्रख्यातिमाप्ता श्रीवीरजिनस्तुतिः। अत्र प्रथमम् अवचूरित्रिकेन सार्धं प्रकाश्यते। सम्पादने प्रयुक्ताः प्रतयः – तत्र (अव १) राधनपुरस्थितस्य अखीदोशीप्रतोलीलामध्यस्थस्य श्रीलावण्यविजयजी–जैन–ज्ञानभण्डारस्य ८६७ क्रमाङ्किता पञ्चपाठमण्डिता प्रतिः। (अव०२) साधुसोमगणि–प्रणीताऽवचूर्याः द्वितीया प्रतिः राधनपुरस्थस्य शेठ–गोडीदास–डोसाचन्द–जैन जैनशालायाः ३६६९ क्रमाङ्किता अस्ति। (अव० ३) तृतीया च प्रतिः पत्तनस्थस्य हेमचन्द्राचार्य–जैन–ज्ञानभण्डारस्य २३२८ क्रमाङ्किता अस्ति।

तिसृणामवचूरीणां कर्तारो भिन्नाः सन्ति। अतोऽत्र अस्माभिः अव–१, अव–२, अव–३ इति सङ्केतेन मूलपद्यमध एव सम्पादिताः, तिसृणां लेखनसमयोऽनुमानत एकोनविंशो वैक्रमीयः शतको ज्ञायते । स्तुतेरस्याः टीका ज्ञानविमलसूरिभिर्विरचिता, सा दयाविमलीयग्रन्थमाला–८ अमदावादतः मुद्रिता विद्यते। सम्पादनेऽस्मिन् तत्र तत्र चिह्नानामुपयोगः कृतः अर्थबोधाय। सम्भाव्यपाठः ( ) अस्मिन् कोष्ठकेः न्यस्तः। हस्तप्रतौ नास्ति किन्तु अपेक्षितः पाठः [ ] अस्मिन् कोष्ठके दत्तः। क्षतीः सूचयन्तु महात्मानः। इति।)

**संसारदावानलदाहनीरं, सम्मोहधूलीहरणे समीरम्।**
**मायारसादारणसारसीरं, नमामि वीरं गिरिसारधीरम् ॥१॥** (उपजातिः)

अव–१ 'अहं वीरं नमामि' इति क्रियासण्टकः। किं लक्षणं वीरं?– **संसार०**–संसारो=भवः, स एव दावानलो=वनवह्निः सः तस्य दाहो ज्वलनं, तस्मिन् नीरमिव, नीरं = जलं। तस्य विनाशकत्वात्। पुनः किं लक्षणं? – समीरो=वायुस्तस्य तुल्यस्तम् सम्मोहधूली०सम्मोहो मौढयं, तदेव धूली = रेणूः, तस्याः हरणं विनाशः, तत्र। पुनः किं लक्षणं? मायारसा० माया = वक्रता सैव रसा = पृथ्वी, तस्या दारणं = भेदनं, तत्र सारः प्रधानः, सीरं = हलं – तम्। पुनः किं लक्षणं? – गिरिसारधीरम्–गिरिराशिषु= पर्वतेषु सारः =प्रधानो मेरुरित्यर्थः, तद्वद् वीरः, तम्।।१।।

अव–२ वीरं=श्रीमहावीरम् अहं नमामि। कीदृशं वीरं? – संसारदावानलदाहनीरं– संसार एव दावानलः, तस्य यो दाहः=तापः, तस्मिन् नीरं = पानीयम्। अयमर्थः–यथा नीरेण दावानलस्य दाह उपशाम्यति, तथा श्रीमहावीरप्रणामेन संसारदाह उपशाम्यति। पुनः श्री वीरं कीदृशं?–सम्मोह०–सम्मोह एव धूली, तस्या हरणे समीरं=महावायुः। यथा महावायुर्धूलीमपहरति, तथा भगवान्

सम्मोहमपहरति। पुनः कीदृशं वीरं?–माया० मायैव रसा = भूमिः, तस्या दारणे सारसीरं=प्रधानहलमिव, यथा हलेन भूमि विंदार्यते तथा स्वामी, मायां विदारयति। पुनः कीदृशं वीरं? –गिरिसारो०– गिरिसारो=मेरूः, तद्वद् धीरम्। यथा मेरुः केनापि चालयितुं न शक्यते तथा जगन्नाथोऽपि शुभध्यानाद् देव–दानवैरपि चालयितुं न शक्यते।
एवंविधं श्रीवीरं प्रणमामि।।१।।

अव–३ वीरं नमामि=स्तौमि इति क्रियापदम। किं विशिष्टं वीरं?–संसरणं संसारो=भवः, स एव दावानलो=दावाग्निः, तस्य दाहः, तस्य विध्यापनकर्तव्ये नीरमिव, नीरं=तोयं, अतः तं संसार...नीरम्...। मोहं मोहनीयकर्म, सम् एकीभावेन मोह=सम्मोहः, स एव धूली, तस्या हरणे, तत्र समीर इव समीरः तम्। [ माया०– ] मायैव रसा, तस्या दारणं, तत्र सारं सीरं प्रधानलाङ्गुलं, तद्वद्यः तम्। गिरीणां सारो मेरूः, तद्वद् वीरोऽक्षोभ्यः परिषहोपसर्गादिभिः यः, तम्।।१।।

**भावावनामसुर-दानव-मानवेन-**
**चूलाविलोल-कमलावलिमालितानि।**
**सम्पूरिताभिनतलोकसमीहितानि;**
**कामं नमामि जिनराजपदानि तानि ।।२।।** (वसन्ततिलका)

अव – १ भावा० व्याख्या–अदम्भानि जिनराजपदानि नमामि। जिनानां राजानः–तीर्थङ्कराः, तेषां पदानि=चरणान्। पद शब्दपुन्नपुंसकः, 'नमामि' इति 'णम्' प्रह्वी[1] इति धातुः। कथं कामम्? अत्यर्थकम्। किं लक्षणानि जिनराजपदानितानिनि?–तानि प्रसिद्धानि। पुनः किं लक्षणानि जिनरानपदानि?–भावाव०–भावेन = भक्त्या, अवनामः= प्रणामो येषां ते, एवंविधा ये सुराः=स्वर्गवासिनः, दानवा=ये विमानवासिनो देवा न संति ते, मानवाश्च मध्यलोकवासिनो मर्त्याः, तेषामीनाः=स्वामिनः, तेषां चूलाः=शिरस्य शिखाः, तासु विलोलानि=चपलानि, यानि कमलानि= पङ्कजानि, तेषाम् आवलिः = श्रेणिः, तया मालितानि = पूजितानि, माला जाता एषाम्–इति मालितानि। पुनः किंलक्षणानि जिनराजपदानि? सम्पूरि०–सम्पूरितानि = सम्पूर्णीकृतानिअभिनता = प्रणता ये लोकाः, तेषां समीहितानि यैस्तानि। पुन द्वितीया [विभक्तेः] ज्ञापनाय 'तानि' इति।।२।।

अव – २ जिनेषु सामान्यतः केवलिषु अनन्तातिशयरुपया=समृद्ध्या राजन्ते इति जिनराजाः तीर्थङ्करास्तेषां पदानि = स्थानानि, तीर्थानि इत्यर्थः। तानि नमामि = प्रणमामि, कामम्=अतिशयेन। कीदृशानि तीर्थङ्करपदानि?–भावा–भावेन=भक्त्या, अवनमन्तीत्येवंशीला अवनामिनः = प्रणताये सुर–दानव–मानवानाम् इना=स्वामिन, तेषां चूलाः = वेण्यः, तासु विलोलाः = चञ्चला या कमलावलिः=पद्मपङ्क्तिः, तया मालितानि = शोभितानि। पुनः – सम्पूरितानि अभिनतानां प्रणतानां लोकानां समीहितानि यैः, तानि। जिनराजपदानि कामम् अतिशयेन नमामि।।२।।

((१) णम्–प्रहत्वे शब्दे च पा.धा.७८२, है.धा.३८८, कात्यायनी धा०पा०–णम् प्रहत्वे शब्दं च – १५१ – इति मुद्रितेषु धातुपाठेषु)

अव – ३ जिनानां राजानो जिनराजाः = तीर्थकृतः, तेषां पदानिः = पादाः = चरणाः (तान्) नमामि =नमस्करोमि इति क्रिया। किं विशिष्टानि?– भावेन = भक्त्या, अवनमनं येषां ते तथाविधाः सुराः = विमानवासिनो, दानवाः=भुवनवासिनो, मानवाः = मर्त्याः, तेषामिनाः = स्वामिनः, भावावनामाश्च ते सुर–दानव–मानवाश्च, तेषां चूलाः=मस्तकशिखाः, तासु विलोलाः। कमलानां=पद्मानाम् आवलयश्च पङ्क्तयः (भावा....कमलावलयः) ताभिर्मालितानि। सम् एकीभावेन पूरितानि संपूर्णी कृतानि अभिनतलोकानां = प्रणतमर्त्यानां समीहितानि वाञ्छितानि यैस्तानि, कामम्=अत्यर्थम् इति क्रियाविशेषणम्।।२।।

**बोधागाधं सुपदपदवीनीरपूराभिरामं,**
**जीवाहिंसाविरललहरीसङ्गमागाहदेहम्।**
**चूलावेलं गुरुगममणीसङ्कुलं दूरपारं,**
**सारं वीरागमजलनिधिं सादरं साधु सेवे ।।३।।** (मन्दाक्रान्ता)

अव० – १ बोधा०–व्याख्या–अहं वीरागमजलनिधिं सेवे। वीरो=वर्धमानः, तस्यागमः = सिद्धान्तः, स एव जलनिधिः = समुद्रः, तं सेवे = श्रये। षेवृङ्–सेवृङ् (सेवने है. धा. पा. ४/४/१९) इत्यादि दण्डको धाम्' सेवायातुः। से कथं?–सादरं = सोत्साहम्। पुनः कथं?–साधु = सुन्दरम्। किं भूतं वीरागमजलनिधिं?–बोधागाधं =बोधो =ज्ञानं तेऽगाधोऽलभ्यतलस्तस्य, स–अनन्तार्थत्वात्, तं समुद्रपक्षेऽप्ययमेवार्थः अर्थावबोधःस एवागाध उंडत्वं यत्र स तं तमनिर्देशादयमर्थः पुनः किं लक्षणं? – सुपद०–सुपदानि = शोभनानि पदानि तेषां पदवी=पद्धतिः वचनरचनेत्यर्थः। सैव नीरपूरो = जलराशिः तेनाभिरामो मनोज्ञः तम्। पुनः किं लक्षणं वीरा०? जीवा० जीवानां=प्राणिनाम्, अहिंसा=दया, सैवाऽविरलाः सङ्कीर्णा या लहर्य्यः, तासां सङ्गमः परस्परस्य मिलनं, तेनागाहः अविलोऽ नाहों देहः=शरीरं यस्य तम्। पुनः किंलक्षणं वीरा०?–चूलावेलं० –'चूला' इति दशवैकालिकादिग्रन्थप्रान्तगताध्ययनविशेषरूपा, सैव वेला पयसो वृद्धिः यस्मिन् स तम्। पुनः किं लक्षणं वीरा०?. गुरु० गुरवो=महन्तो ये गमाः सदृ [श] पाठाः त एवं मण्यः तैः सङ्कुलं सङ्कीर्णः०, 'मणी' शब्दईकारान्तोऽप्यस्ति, पुं–स्त्रीलिङ्गश्च। पुनः किं लक्षणं वीराः०? दूरम्–अनासन्नं, सारं परतीरं यस्य स तम् 'सयसायरो' इति वचनात् समुद्रपक्षेऽप्ययमेवार्थः। पुनः किं लक्षणं वीरा०?–सारं प्रधानं, द्वयोः पक्षे तुल्यम् इदं विशेषणम्।।१।।

अव०– २ वीरागमजलनिधिं श्रीमहावीरदेवस्य सिद्धान्तसमुद्रं, सादरम्=आदरपरोऽहम् साधु=सम्यक्प्रकारेण, सेवे=भजामि। कीदृशं? बोधा०–बोधो=ज्ञानं, तेनागाधतया, सुपदपदवी सम्यक् पदादीनां मार्गाः, सेव्यनीरपूरस्तेनाभिरामं=मनोहरम् । पुनः किं लक्षणं वीरा०?–जीवानाम् अहिंसा–प्राणरक्षा, सैवाऽविरला संहता लहर्यः, तासां सङ्गमेन अगाहदेहं अलङ्घनीयशरीरम्। पुनः कीदृशं वीरा०?–चूला० चूलाः श्रीदशवैकालिकादिपर्यन्तवर्त्तिन्यः, ता एव वेला यस्य स, तथा तम्। पुनः कीदृशं

वीरा० ?-गुरुगममणिसङ्कुलं गुरवो गमा पाठविशेषाः ते एव मणयः, तैः सङ्कुलं। तथा दूरंपारः प्रान्तो यस्य स तथा तं तथा सा तया सारं प्रधानम् एवविधं श्रीवीरागमजलनिधिम् आदरपूर्वं सम्यक् सेवे ।।२।।

अव०- ३ बोधा० वीरस्य आगमः=सिद्धान्तः, स एव जलनिधिः, तं सेवे इति क्रिया, कथंभूतं ?- बोधेनावगमेनागाधोऽलब्धमध्यो यः तं बोधागाधम्। शोभनानि च तानि पदानि च सुप्-तिङन्तानि, तेषां पदवी=पद्धतिः, सैव नीरं, तस्य पूरः सङ्घातः, तेनाभिरामम्=रमणीयः तं सुपद०-[पुनः किं भूतं ?] जीवाः पृथिव्यादयः, तेषामहिंसा=द या, अत एवा-विरला घना, जीवहिंसाविरलाश्च ता लहर्यश्च जीवाहिंसालहर्यः, तासां सङ्गो मेलापकस्तैरगाधोऽनाकुलो योऽवाप्यो देहो विग्रहः। यस्य स, तथाभूतः तं, जीवा... देहं, चूला एव वेला यत्र तथाभूतः, तं चूलावेलम् । गुरवो बृहत्प्रमाणाः ते च ते गामाश्च नैगमादयः तं एव मण्यः, ताभिः सङ्कुलः सङकीर्णः, तं गुरु...कुलम्। दूरे० पारः पर्यन्तो यस्य स, तथाविधः तं दूरपारं, सारं प्रधानं, सादरं सप्रयत्नं कायं यथा भवति तथा साधु सेवे प[रम]रागश्च तस्याःयथा भवति। द्वे अपि क्रियाविशेषणे।।३।।

**आमूलालोलधूली बहुलपरिमलाऽऽलीढ लोलाऽलिमाला**
**झङ्काराराव साराऽमलदलकमलागारभूमिनिवासे !**
**छायासंभारसारे ! वरकमलकरे ! तारहाराभिरामे !**
**वाणीसंदोहदेहे ! भवविरहवरं देहि मे देवि ! सारम् ।।४।।**

अव० - १ आमू० व्याख्यापदद्वयेन, आद्यं संबोधनपदं, हे आमू०-आमूलाद् मूलं मर्यादीकृत्य, आसमन्तात् लोलं चपलं एवंविधं यत्, पुनः धूली मकरन्दः, तस्य बहुलो महान्, बहल इति पाठे तु बहलः सान्द्रः, यः परिमलो गन्धः तत्र आलीढा आसक्ताः, लोलाश्चपलाश्च येऽलिनो=भ्रमराः, तेषां माला=श्रेणिः, तस्या झङ्कारो 'गुनगुन' इति लक्षणं । स एव रवो=ध्वनिः, तेन सारं=प्रधानम्, एवंविधं यत्, पुनर्मलानि=पवित्राणि, दलानि=पत्राणि यत्रतद् यदेवविधं कमलं=पङ्कजं, तद् एव अगारं=गृहं तस्य भूमी रसा, तस्यां निवासो वासस्थानं यस्याः सा, तस्या संबोधनं-हे आमूला०-

अव० - २ हे देवि ! श्रुतदेवते ! मे = मह्यं सारं = प्रधानं, प्रस्तावान् मोक्षं देहि। कीदृशं ?-भव० भवविरहेण वरं=प्रधानं । हे आमूलालोलधूली०....गारभूमिनिवासे !, आमूलाऽऽलोलं=मूलम् आरभ्य, आसमन्ताल्लोलं च, चञ्चलं० तथा धूली=परागः, तस्य बहुलो घनः, परिमलः तस्मिन् आलीढालिङ्गिता लोला चपला या अलिमाला= भ्रमरपरम्परस्याः, झंकाराखः-झंकार' शब्दः, तेन सारं, तथा अमलदलं निर्मलपत्रं यत् कमलं, तदेवागारं गृहं, तद् भूमौ निवासो यस्याः, तत् सम्बोधनं- आमूला ०- हे छायासम्भारसारे !-छाया=शरीरशोभा, तस्याः सम्भार-समूहः, तेन सारे! हे वरहकमलकरे ! प्रधानकमलहस्ते !, हे तारहाराभिरामे - तारो देदिप्यमानो हारः, तेनाभिरामे !। हे वाणीसन्दोह-वाणीसन्दोह एव देहो यस्याः, तत् सम्बोधनम्, एवंविधे श्रुतदेवते ! भवविरहवरं मोक्षं देहि मह्यम्-इति।

इति स्तुत्यर्थसङ्क्षिप्तरूचिहेतवे **साधुसोमेन गणिना** निर्मिता नन्दताच्चिरम् शुभं भवतु।

अव० – ३ आमू० भवस्य विरहो विनाशः स एव वरं इप्सितार्थसिद्धिः तं, देवि ! भगवति! मे मम देहि यच्छ इति क्रिया। आमूलामूलादारभ्यलोलं, तत्रालीढा संश्लिष्टा, सा चासौ धूली च किञ्जल्कः परागश्च, तया बहलश्चासौ परिमलश्च सौरभ्यं। लोला०यत्र अलीनां=भ्रमराणां माला च, तस्या झङ्कारः=झात्कारः, तस्य आरावः=शब्दः, तेन सारं=वरं, अमलानि दलानि=पत्राणि यत्र तत् कमलं = पद्मम् । आमूलालो०...रावसारं च तद् अमलदलं, च तच्च तत् कमलं च, तद् एव आगारभूमी = गृहं, तस्मिन् निवासो वसनं यस्याः सा, तथाविधा, तस्याः सम्बोधनं छाया=शोभा, तस्याः सम्भारस्तेन सारा वरा या सा, आमन्त्रणे वरं=प्रधानं, कमलं करे यस्याः सा वरकरा सा । सम्बोधनं तारा कनीनिका तयाभिरामा रमणीया या, तस्या आमन्त्रणं हे तारहाराभिरामे!, वाणी भारती, तस्या सन्दोहः सङ्घातः स एव देहः शरीरं यस्या सा तया, तस्या, सम्बोधनं हे वाणि ! हे सरस्वति ! हे भगवति ! भवविरह०....इत्यादि प्रागेव व्याख्यातम्।

॥ 'संसारदावा' स्तुत्यवचूरिः॥०

मम शिरसि परमात्मा स्थितः,
मम सर्वाः प्रवृत्तीः स पश्यति,
तस्य दृष्टौ अहं असाधुः न स्याम्।
इति विचारपूर्वकं यो जीवति–स मानवः।

## विभाग : २ अर्वाचीनकृतयः

# खण्ड : २ यशोप्रज्ञादर्शनम्

(राग : जन गण मन अधिनायक जय हे.....)

जय जय ज्ञानमणिगुणकलितं ! वाचक–श्रीयशोविजय !
जिनशासनधौरेय ! परम ! नैकवादकृतविजय !
नित्यं निजगुणगणरममाण ! भवदुःखदवहरमाण !
ज्ञानप्राप्तशुभसाररहस्या ! ज्ञानतिमिरहरमाण !
ज्ञानगुणैर्गम्भीर ! शास्त्रार्जनमतिधीर !
त्वं सर्वदा जय जय।
ज्ञानरसास्वादनपरिपूत ! वाचकश्रीयशोविजय !
जयतात्। जयतात्। जयतात्।
जय, जय, जय, जयतात्।...............१

ग्रन्थरचनमेकतानमनस्क ! न्यायविषयेरतिबद्ध !
न्यायाऽऽगमवरछन्दोऽलङ्कृतितर्कव्याकरणेष्वतिशुद्ध !
ममाथ आशिः दापय, स्वप्रतिभां मयि स्थापय।
काशीप्राप्तविजय !
परम''श्रेयोदर्शन''सद्म, वाचकश्रीयशोविजय !
जयतात्। जयतात्। जयतात्।
जय, जय, जय, जयतात्।...............२

# परमज्योतिः पञ्चविंशतिका

मूलकाराः
महोपाध्याय श्रीयशोविजयपादाः

वार्त्तिककाराः
आ.श्री कल्याणबोधिसूरिः

अथ निरुपयोग्येवेदं परमज्योतिर्निरूपणम्, कर्मादिभावे तदनुभावोद्भवाभावात्, तथा चास्य खपुष्पप्रायत्वादिति चेत्? न, तद्भावेऽपि तदनुभावस्यानुभूयमानत्वात्, यतः-

**कर्म-नोकर्मभावेषु, जागरुकेष्वपि प्रभुः।**
**तमसाऽनावृतः साक्षी, स्फुरित ज्योतिषा स्वयम्।।५।।**

प्रभुरित्ययमात्मेव, अचिन्त्यप्रभुतोपेतत्वात्, स चात्मगुणाऽऽवारकस्य कर्मलक्षणद्रव्यस्य शरीररूपस्य च नोकर्मवस्तुनः सत्त्वेऽपि स्वयं तमसाऽनावृतः साक्षिमात्रो ज्यातिषा स्फुरति।

न हि पटादिनाऽऽवृतो घटो घटरूपतां जहाति, कटादिरूपतां च प्रतिपद्यते, स्वरूपबाधनाऽऽवरणस्यात्यन्तमसमर्थत्वात्। यथा च पटाद्यावृतोऽपि घटो धारयति जलम्, एवं कर्माद्याऽऽवृतस्याप्यात्मनो ज्योतिषा स्फुरणं बोध्यम्। अवदाम चान्यत्र-९

**एकमेव यथा रत्न-मावृतं वाऽप्यनावृतम्।**
**एक एव तथाऽऽत्माऽपि, ह्यावृतो वाऽप्यनावृतः।।**

- इति (आत्मोपनिषत्-श्लोकवार्त्तिके) सोऽयं सकलजीवात्मगोचरपरमात्मदर्शनसञ्चरः, यमवाप्येहैव परमसाम्यावलम्बनेन जीवन्मुक्तिसौख्यमनुभवन्ति तत्त्वविदः। न ह्यज्ञातपरमज्योतिःस्वरूपाणां सुलभो भवत्ययं सञ्चर इति यतितव्यं तद्धि ज्ञाने, परमानन्दप्राप्त्युपायान्तरविरहादिति भावः।

(क्रमशः)

मिथ्यात्वं नाम सुखरागस्य रागः।

# वृत्तं यशोविजयवाचकपुङ्गवानाम्

संयमग्रहणाभिधद्वितीयस्तबकः

पंन्यासप्रवरश्री सम्यग्दर्शन विजयोगणी

विद्वज्जनमूर्धन्याः, प्रकृष्टविद्वत्तया विद्वज्जनचित्तचमत्कृतिकद्-वचन विन्यासप्रहतमदकुमतवादिविजेतारः, शास्त्रार्थपारङ्गतदृष्टयः, निहतक्रोधादि कषाय-रूपादिविषयजन्यविकाराः, स्वस्वभावानुभूतिशुभ्रपरिणतिधाराधराः, शुद्ध-विशुद्ध संयमसरोजसद्गुणसुरभिप्रसाराः, पूज्यश्री पाठकवर्यश्रीनयविजयगणिवराः, ते निभालयन्ति मुहुर्मुहुः जसवन्तस्य मति चातुर्य प्रतिभा नैपुण्यादिसद्गुणान्। जसवन्तोऽपि कदाग्रहादिदुष्टदोषैरदुष्टः सद्गुरु पद कमले मधुकरीभूय सततं सद्गुणमकरन्दमाचामति, करोति स्वात्मगुणपुष्टिञ्च। विदधाति नूत्न ज्ञानसम्पादनं, आचरति सत्सदाचारान्, स्वं बध्नाति व्रतप्रतिज्ञाभिः निर्वहति जननी जनक सद्गुरुपादानाञ्चाऽऽज्ञां। पठति प्रतिदिनं श्रीमन्नयविजयपाठकान्तिके, नयति तान् साग्रहं स्वगृहे भिक्षादाननिमित्तम्, प्राप्नोति परमानन्दमन्नपानादिभिक्षादानेन। एवं श्रीमन्नयविजयपाठकपादानां परिचय सातत्येन जसवन्तस्य श्रमणधर्मं प्रति प्रवृद्धः परमादरः।

श्रीमन्नयविजयपादाः जसवन्तस्य पात्रतादिसर्वं निरीक्षन्ते। तद्रूचिं च जानन्ति, श्रीजिनधर्मःतं श्रावयन्ति। तस्याऽपूर्वमेधाप्रागल्भ्यं सम्पश्य तेषां मनो नितरां सन्तुष्यति।

अन्यदा श्रीमन्नयविजयपादैः जसवन्तपितरौ प्रोक्तौ, यथाहि-"**भद्रौ ! भवन्नन्दनो नयनानन्दनोऽप्रतीमप्रतिभाभासमानोऽद्भुतक्षयोपशमवान् चाऽस्ति।**" तदर्थे भवतोः का इच्छा वर्तते?। यदि स गृहे स्थास्यति तदा केवलं कुलप्रवृद्धिं कुलप्रख्यातिमेव करिष्यति। पितृकुलं च द्योतिष्यते। कदाचिद् ग्राम-नगरस्योन्नतिं करिष्यति, नत्वधिकं किमपि। किन्तु यदि जैनशासनस्य समर्पितो भविष्यति तदा स्वात्मसमुद्धारेण सह समग्रविश्वं तारयिष्यति, सर्वत्र कीर्तिं यशश्च प्राप्स्यति। जैनशासनप्रभावनां विधास्यति, अनेकेभ्यः भव्येभ्यः सम्यग्दर्शनादि सद्गुणप्रदानं, सज्जनेभ्यश्च मुक्ति मार्गप्रदानञ्च करिष्यति। अनेके भव्यास्तेन सद्धर्मभाविता भविष्यन्ति। स प्रभुवीरपट्टपरम्परां प्रभाविष्यति, जिनशासनरक्षाञ्च करिष्यति।

अत्र तावत् भवद्भ्यां किं कर्त्तव्यं, तत् निपुणं चिन्तनीयम्। नाऽसौ बालः गृहपतिरेव भवितुं योग्यः, अयन्तु जिनशासनाधिपत्यं कर्त्तुं योग्यः, तच्छ्रुत्वा पितरौ विचारविमर्शं कृत्वा, तातपाद श्रीमन्नयविजयपादानां चरणे श्रीजिनशासनसेवायै जसवन्तं समर्पयतः।

कथितञ्च ताभ्यां अस्मदीयोऽयं सुतः श्रीजिनशासन सेवा प्रभावनां रक्षाः करोतु जिनशासनमहानायको भवतु, अनेक भव्यात्मानः संसारसागरात् समुत्तारयतु, सर्वोत्कृष्टसंयमपालनेनानाऽन्येषांमुनिजनानां परमादर्शमयं सच्चारित्रपूर्णं जीवनं जीवतु। इत्यस्माकं अन्तराशीर्वादाः। तज्ज्ञात्वा समग्रश्रमणसङ्घः हर्षोन्मत्तो जातः। सर्वेऽपि जिनशासनरसिकाः कुमार्गकुवादिघूकप्रसरस्य निराकरणं भावि, श्रीमज्जिशासन-स्योद्योतोभावीति सञ्चिन्त्य संतुष्टाः। कनोडाजैनसङ्घेऽपीयं वार्त्ताः सर्वेषां परमानन्दप्रदा सञ्जाता।

अथ जसवन्तस्तत्रैवोपाश्रये स्वगुरुसन्निधौ तिष्ठति। ज्ञानाभ्यासं करोति। सज्ज्ञानं प्राप्य स्वात्मविकासं करोति। स्वनिष्ठदोषान् दूरीकुरुते, वैराग्यवारिधिवेलां वर्धयति। स्वगुरुवर्यं पूर्णकल्याणनिकेतनं मन्यते। समग्रसंसारपदार्थान् कर्मबन्धने निबन्धनं पश्यति। एवं सद्गुणसङ्ग्रहशीलतया सोऽपास्तसर्वमनोविषमताविकारः, विजितप्रायःक्रोधादिकषायचरटः, परास्तविषयजन्यविकारः, प्रतनूकृतभवरागः, प्रबलप्रवृद्घतमजिनवचनरागोऽभवत्। तस्य प्रवृद्धाः सद्गुरुं प्रति प्रीतिः। प्रोल्लसितोऽपारभक्तिप्राग्भारः, प्रवृद्धोत्साहः सर्वक्रियकलापेषु स सदाचारः, सद्विचारस्वस्थः हितमितमधुरवचनविलासेन सर्वेषांमनांसि आह्लादयति। तेन प्रकटिता गुणदृष्टिः, दूरीकृता दोष दृष्टिः, स्वायत्तीकृतमुमुक्षुभावः, त्यक्तो भवरागः, समुज्झितमातृपितृमोहः, तस्य विगलिता धन-विभवस्पृहा। प्रक्षीणप्राय कर्मराशितया जाताऽध्यात्मभावपुष्टिः, स्वाऽऽत्मगुणविशुद्धिश्च।

एवं नैकगुणवैभवप्रापणप्रयासवान् स बालः सद्गुरुश्रीनयविजयवाचकैस्सह विहृतवान्। श्रीमन्नयविजयपादैः कनोडातः तद्रत्नं सर्वसमक्षंगृहीतम्, कनोडानगरसमुद्योतायैव तद्रत्नं, तदा न केनापि ज्ञातं, यदसौ बालः श्रीजैनशासनमपि समुद्योतयिष्यति। श्रीमन्नयविजयानां मनस्तं दृष्ट्वा मोदतेतराम्। ते चिन्तयन्ति यत् **'नाऽहं शक्नोमि श्रीजिनशासनोद्योताय'** किन्तु शासनचरणे शासनोद्योतकरणक्षमसच्छिष्यसमर्पणं कृत्वाऽपि बहुलाभं प्राप्स्यामिं। कनोडानगरकृतमासकल्पेन श्रीमन्नयविजयपादैः बहुमूल्यंरत्नं प्राप्तम्। अन्यदा श्रमणवृन्देन जसवन्तेन च सह विहृतवन्तः ते पाठकपुङ्गवाः। सुदूरं तान् सर्वान् पश्यन्तौ जसवन्तपितरौ, कनोडा सङ्घश्च, तान् स्मरन्तः ते सर्वे स्वस्थानं गताः। पाठकपुङ्गवैः यद्रत्नं प्राप्तं, तं सर्वेऽपि पश्यन्ति, किन्तु न कोऽपि ग्रहीतुं क्षमः। सर्वेऽपि तद्रत्नप्रभावं प्राप्स्यन्ति, किन्तु न कोऽपि तं स्वायत्तं कर्त्तुं क्षमः। तद्बालेन प्रमुदितः श्रमणवृन्दः, प्रमुदितः श्रीसङ्घः, प्रमुदितो नगरजनः, प्रमुदितस्तत्पितरौ च।

(क्रमशः)

# यशोगुर्जरस्तवनानुवादः

– मुनिश्री आत्मदर्शनविजयः

७८)

पञ्चमारके दूषितभरतक्षेत्रेऽद्यार्येभ्यः प्रभूता अनार्यजना दृश्यन्ते।
आर्यजेनष्वपि जैनाःकतिपया एव भवन्ति।
तेष्वपि जिनशासनपरिणतजैना अत्यल्पतया भवन्ति।
परिणतजैनेष्वपि साधुवेषभृतो मुण्डितमस्तका अनेके भवन्ति,
भावश्रमणालिङ्गास्तु स्वल्पा एव।।९।।

जिनाज्ञाशुद्धव्यवहारयुक्त एव महाजनः कथ्यते, तस्यैव सङ्गःकार्यः।
अनेकजनमेलकयुक्तोऽपि योऽज्ञानी भवति न स महाजनो व्यपदिष्यते।।११।।

योऽज्ञानी गुरुर्गच्छं प्रवर्तयति सोऽनंतसंसारी विज्ञेयः।
शास्त्रेषु केवलं पल्लवग्राही मुनि र्ज्ञानी न कथ्यते।।१३।।

यः साधु र्हृदये निश्चयद्रष्टिं न धारयति,
स बहुश्रुतो बहुजनसम्मतोऽनेकशिष्यपरिवारवानपि
भूत्वा जिनशासनस्य प्रत्यनीको जायते।।१४।।

यो जिनाज्ञां पालयति तस्योपरि परमात्मा प्रासादं कुर्वते, तस्य सर्वापदश्चछेदयति।
आज्ञाकृज्जनो यद् यद् वाञ्छति तत्सर्वं ददातीति।।२४।।
– साडा त्रणसो गाथा स्तवन (ढाळ १, पृष्ठ – २७३)

७९)

हे प्रभो ! दुषमकाले यद्यपि निर्गुणगच्छे मुनि र्वसेत्,
तथाऽपि तन्निर्गुणगच्छेमुनिर्विनयादिकार्येषु द्रव्यतो
व्यवहारेणैव प्रवर्तयेत्, भावतस्तूदासीन एवाऽऽसेत्।।६।।

स्वस्खलितेषु केवलं मिच्छामि दुक्कडं दत्वा यो मुनिस्तद्भावेनैव दोषं सेवेत,
स निश्चयेन मायामृषावादं पापस्थानकमेव सेवते इति आवश्यकनिर्युक्त्युक्तम्।।१७।।

उत्कृष्टपदे तु भावप्रतिक्रमणं पापस्याऽकरणेनैवोक्तमिति तत्वम्।। १८।।
(साडा त्रणसो गाथा स्तवन) ढाळ-२, पृष्ठ २७६

८०)

यो मुनि मंदसंवेगवान् भवति स एव हीनालम्बनानि गृह्णाति।
यश्च तीव्रसंवेगवान् भवति स उत्तमसंयमालम्बनानि गृह्णाति।।१५।।
(साडा त्रणसो गाथा स्तवन) ढाळ-३, पृष्ठ २७८

८१)

यो मुनि-र्निभयं शुद्धमोक्षमार्गं प्ररुपयति,
स एव भवसमुद्रे द्वीप इव भव्यानामालाम्बनभूतो भवति।।३।।

शुद्धमोक्षमार्गोपदेशकरणे साधु-र्न बहुजनमेलापकमिच्छति,
अपितु निस्पृहः सन् मार्गं दर्शयेत्।
यदि बहवो जनाः समागच्छेयुस्तर्हि वरं,
धर्मलाभं च लप्स्यन्ते लोका इति मनुते ।।७।।

यदि मुनि र्मुग्धजनान् शुद्धमोक्षमार्गं न दर्शयेत् तर्हि सः
चारित्रधर्मस्यां तरायकर्म समुपार्जयति।
सत्यां च शक्तौ यो गूहयति तस्य
प्रबलश्रुतज्ञानावरणीयकर्माबन्धमायाति।।८।।
(साडा त्रणसो गाथा स्तवन) ढाळ ४, पृष्ठ २७९

८२)

शुद्धमार्गप्ररुपणे यद्यपि शिथिलाचरिताणां दोषा, प्रकटेयुः, न तन् निन्दा कश्यते ।
यतः शुद्धमार्गोपदेशको गुरुः सर्वेषामुपरि समचित्तपरिणामेन हितं करोति।।९।।

खलपुरुषास्तु गुणेष्वऽपि पयसि प्रतरा इव दोषानेव पश्यति।
अतस्तस्य वचनानि न प्रमाणं स्युः।
अत एकमेव जिनवचनाचरणे एव स्थातव्यं येन सुयशःसुखं प्राप्यते।।१९।।
(साडा त्रणसो गाथा स्तवन) ढाळ- ४, पृष्ठ २७९

८३)

यः साधुः गीतार्थाज्ञानिरपेक्षसाधुयोगेषु प्रवर्तेत,
य केवलं मिथ्याभिमानेन कायकष्टमेव करोति।
प्रायेण स ग्रंथिदेशमपि न प्राप्तो भवति,
अतो गाढमिथ्यात्वांधकारे एव दुःखानि प्राप्नोति।।३।।

गुरुकुलवासे तिष्ठतः साधो-र्विनयादिगुणा वृद्धिं प्राप्नुवन्ति।
विनयगुणश्च जिनशासनस्य बीजम्।
तथा च सम्यग्दर्शनशुद्धिः, उचितप्रवृत्तिः,
गुणानुरागश्च गुरुकुलवासे संभवन्ति।।९।।

एवमाऽऽचार्यतपस्वीवृद्धशैक्षाऽसहिष्णुप्रभृतीणां
वैयावृत्यकरणे, पापकर्माणि नश्यन्ते,
क्षमामृदुताप्रमुखागुणाः पुष्णन्ति,
हितोपदेशश्रवणे सत्पुरुषसङ्गमे च ब्रह्मचर्यगुप्तिः परिपाल्यते।।१०।।
(साडा त्रणसो गाथा स्तवन) ढाळ ५, पृष्ठ २८१

हीनक्षयोपशमवतामपि ज्ञानवृद्धसम्पर्के ज्ञानादियोगेषु पुरुषार्थकरणाय मनः समुल्लसति।
गच्छे च सर्वेषामेकरुपे आचरणादर्शने जनानां बुद्धिभेदो न जायते ।।११।।

यावज्जीवं यो गुरुकुलवासं न मुञ्चति स सम्यग्ज्ञानस्य भाजनं भवति,
तथा तस्य चित्तं सम्यग्दर्शन चारित्रयोगेषु स्थिरतरं भवति।।१२।।

यद्यपि गुरुकुलवासे वसनेनैषणासमितौ बहव दोषाः प्राप्यन्ते,
तथापि सापेक्षभावयुक्तस्य मुनेः सम्यग्ज्ञानदिगुणा वृद्धिं प्राप्नुवन्ति।।
अतो ज्ञानादिपुष्टालम्बने दुष्टाहारकरणेऽपि शुद्धसाधो र्न दोषो प्राप्यते।।१४।।

यथा सर्वेषां सुगुरुः पूजनीयो भवति तथा तस्य परिवारभूताः
शिष्या अपि पूजनीया भवन्तीति
धर्मरत्नप्रकरणोपदेशपदप्रमुखग्रन्थेषूक्तम्।।१५।।

सुगच्छे वासं करणेण साधुः सारणावारणाप्रमुखशिक्षां प्राप्य मोक्षमार्गमाराधयति।
परस्परशुभाचरणादर्शने शुभवीर्यवृद्ध्या सुक्रियापि सिद्ध्यति।।१६।।

यथा समुद्रसंक्षोभासहमानः स्थलं प्राप्य दुःखी भवति तथा
गच्छगतशिक्षामगृह्णन् मुनिरपि गच्छं त्यजन् दुःखी जायते ।।१७।।

यथा वेदिकारहितसरोवरे जलं न तिष्ठति,
कायां च विना जीवो न तिष्ठति तथा मुनिरपि गीतार्थं विना
संयमयोगेषु न स्थातुं शक्नोति, यश्च तिष्ठति तस्य
सर्वक्रियाकलापो मिथ्याकष्टरुपमिति कथ्यते।।१९।।
(साडा त्रणसो गाथा स्तवन) ढाळ ५, पृष्ठ-२८२

संसारस्य नाम भ्रमणायतनत्वम्
मोक्षस्य च स्थिरायतनत्वम्
'अयं मम अयं च तव' इति स संसारः।

## विभाग : २ अर्वाचीनकृतयः

# खण्ड : ३ सूरिरामचन्द्रदीक्षाशताब्दीभावाञ्जलिः

(रागः आज मारा प्रभुजी.....)

रामगुरुं भक्त्या वन्देऽहं, गुणमङ्गलश्रीकारम् रे;
गुरुदेवं सद्गुणविस्तारं, मिथ्यातापघनसारम् रे..... रामगुरुं।।१।।

शुद्धदेशनासङ्गतिधारं, तपगच्छगगनमणिसारम् रे;
हतक्रोधादिकषायप्रसारं, निर्विकारविचारम् रे.....रामगुरुं।।२।।

कृत समतामृतरसवरपानं, नहि तृष्णातापप्रचारम् रे;
येन क्षमाख्यं भोज्यं प्राप्तं, द्वेषो दग्धस्तारम् रे.....रामगुरुं।।३।।

शास्त्रार्थपूतं मधुरं वचनं, नयनं करुणाधारम् रे;
परमं ''श्रेयः''पदं याचेऽहं, ''दर्शन''गुणविस्तारम् रे.....रामगुरुं ।।४।।

# विजयप्रेमसूरिस्तवाष्टकम्

कृतिकाराः पू.आ.श्री विजयभुवनतिलकसूरेः
शिष्यरत्नपंन्यासश्री भद्रङ्करविजयजी गणिवराः

श्री प्रेमसूरिं नतभूरिसूरिं
चारित्रचिन्तामणिचारुरूपम्।
नैपुण्यकारुण्यसुपुण्यधन्यं
प्रेम्णा प्रमोदात् प्रणमामि पूज्यम्।। ।।१।।(इ.व.)

श्रीब्रह्मचर्यं नवगुप्तिशुद्धं।
बिभर्ति वर्यव्रतसारभूतम्।।
श्रीस्थूलभद्रस्मृतिकारको यः
स प्रेमसूरिर्जयति व्रतीन्द्रः।। ।।२।।(उप.)

गुप्तौ समित्यामुपयोगवान् यः।
सदा चतुर्थारकसाधुतुल्यः।।
आत्मार्थिमुख्यो भवभीतिभीतः।
स प्रेमसूरिर्जयतान्मुनीन्द्र।। ।।३।।(उप.)

परीषहेभ्यः परवादितश्च।
बिभेति नो यो नरसिंहरूपः।।
चारित्रसिद्धान्तसुरक्षणार्थं
स प्रेमसूरिर्जयतादभीतः।। ।।४।।(उप.)

कर्मप्रकृत्यादिविशिष्टशास्त्रे।
प्रभुत्वभाक् शास्त्रपथि प्रवृत्तः।।
शिष्यान् स्वतुल्यान् कलयाऽकरोद् यः।
स प्रेमसूरिर्जयतात् कलाभृत्।। ।।५।।(उप.)

यद्ग्लानसेवाकरणैकभावः।
सर्वत्र गच्छे गतभेदभावः।।
श्रीसङ्घसच्छान्तिसमाधिकारी।
स प्रेम सूरिर्जयतात् क्षमीन्द्रः।। ।।६।।(इ.व.)

तपोगुणेनैकतपस्विमुख्यस्–
तपोगणव्योमसहस्ररश्मिः।।
यस्त्यागवैराग्यसुभाग्यसिद्धः।
स प्रेमसूरिर्जयति प्रसिद्धः।। ।।७।।(उप.)

सप्रेम प्रेमसूरीशं,
श्रीसिद्धान्तमहोदधिम्।
मूर्तिमत्प्रेमसिद्धान्तम्;
वन्दे वात्सल्यवारिधिम् ।।८।।(अनु)

भुवनतिलकाचार्य।
शिष्य भद्रङ्करेण वै।।
रचितं कर्नुले ग्रामे।
प्रेमसूरिस्तवाष्टकम्।। ।।९।।(अनु)



# श्रीप्रेमसूरिप्रार्थनाऽष्टकम्

– मुनिश्रीपूर्णचन्द्रविजयजी म.सा.
(साम्प्रतं – आ. विजय पूर्णचन्द्र सूरिः)

(इन्द्रवज्रावृतम्)

सिद्धान्तबोधं विरलं यदीयं,
दृष्टैवयस्मै गुरुणा पदं हि,
प्रादायि सिद्धान्तमहोदधिस्तु,
स प्रेमसूरिः प्रतनोतु भद्रम् ॥१॥

कर्मप्रकृत्यादिगभीरभाषा,
येन स्वबुद्धया पठिता प्रयत्नात्,
प्रेम्णा परेभ्यः प्रतिपाठिताश्च,
स प्रेमसूरिः प्रतनोतु भद्रम् ॥२॥

श्रीजैनसाहित्यविशालसिन्धौ,
स्तोकं समालोक्य हि कर्मशास्त्रं,
येनाऽऽदृतं सर्जनवर्यकार्यं,
स प्रेमसूरिः प्रतनोतु भद्रम् ॥३॥

सङ्घस्य भद्रं तु चतुर्विधस्य,
कर्तुं य आसीत् कटिबद्ध–बुद्धिः,
श्रीसङ्घकौशल्यविचारचारः,
स प्रेमसूरिः प्रतनोतु भद्रम् ॥४॥

दीक्षाप्रदानस्य सुलब्धलब्ध्या,
शिष्याः [1]प्रभूताः प्रचुराश्च येन,
स्वच्छो यदीयः प्रथितश्च गच्छः,
स प्रेमसूरिः प्रतनोतु भद्रम् ॥५॥

गच्छाधिपत्यं विरलं यदीयं,
राद्धान्तरागोऽनुपमो यदीयः,
यः कर्मसाहित्यसमर्थवेत्ता,
स प्रेमसूरिः प्रतनोतु भद्रम् ॥६॥

प्रस्थानकालेऽपि समागते यो,
विज्ञातदेहाऽऽत्मविभेदवृत्तिः,
आसीदहो! प्राप्तसमत्त्वतत्त्वः,
स प्रेमसूरिः प्रतनोतु भद्रम् ॥७॥

यस्याऽतिचित्रं प्रथितं चरित्रं,
यद्विप्रयोगेन जगद् रुरोद,
यः पूर्णचन्द्रोज्ज्वलकीर्त्तिमूर्त्तिः,
स प्रेमसूरिः प्रतनोतु भद्रम् ॥८॥

---

१) प्रकर्षेण भूताः–प्रभूताः–उत्तमत्वेन सहैव सञ्जाता इत्यर्थः

# महासत्यगाण्डीवटङ्कारकारी

– गच्छाधिपतिः पू. आ. श्रीविजयपुण्यपालसूरिः

चतुष्षष्टिदेवेन्द्रसंसेविताय, धराधीशपद्मावतीपूजिताय।
त्रिखण्डेश–शङ्खेशहृन्मौक्तिकाय, नमस्ते प्रभो ! पार्श्वशङ्खेश्वराय ॥१॥

भुजङ्गप्रयातवृत्तम्

शमाम्भोदिश्रीप्रेमपट्टोदयाद्रौ, महाऽज्ञानकुध्वान्तसूर्याय तस्मै।
भवाम्भोधिपाराऽऽप्ति नौवैभवाय, नमो रामचन्द्राय सूरीश्वराय ॥२॥

क्व खद्योतपोतः क्व तिग्मांशुदीप्तिः, क्व मे सर्षपाभा मतिस्तु क्व तेषाम्।
गिरां गोचरातीतमूर्तेश्चरित्रं, कथं गीयते स्वल्पबुद्ध्या मया हि ॥३॥

कथं गीयते ते गुणो मन्दबुद्ध्या, कथं कीर्त्यते त्वद्गुणस्तुच्छबुद्ध्या।
तवान्तः कथं दृश्यते नेत्ररोगैः, कथं सेव्यते त्वत्पदं भावरोगैः ॥४॥

शिशुत्वेऽपि कीदृग् रतिर्मोक्षमार्गे, विरक्तिस्सदा घोरसंसारमार्गे।
सदोल्लासिचित्ताय संस्कारप्राप्त्यै, नमस्ते मुनीन्द्राय कल्याणप्राप्त्यै ॥५॥

मुदा प्रत्यहं यच्छते धर्मलाभं, जनाय प्रभूताय सम्यक्त्वलाभम्।
विरक्तिप्रसादं सुचारित्ररत्नं, सदा यच्छते सन्मतिं सद्गतिञ्च ॥६॥

यदीयं मनः सा[१]र्वपादेषु लीनं, महारोगकाले प्रभोर्भक्तिलीढम्।
सदा शास्त्रभक्त्यान्वितं ज्ञानपीनं, मुदे स्यात्स सूरीश्वरो रामचन्द्रः ॥७॥

---

१) सार्वाः जिनाः सर्वेहन्तः, तेषां सर्वेषामर्हतां इति बहुवचनतो व्याख्येया इति–पादेषु–शब्दे बहुवचनं युक्तम्

त्वयादर्शि दीपो महामोहकूपे, त्वयारक्षि लुट्यन्वृ[२]षश्छद्मवद्भिः।
त्वयाऽऽनायि सङ्घो जिनोक्ते सुमार्गे, त्वया शास्त्रदृष्ट्या कृता सङ्घचिन्ता ॥८॥

त्वया प्रोज्झिता लोकसञ्ज्ञाऽऽतिदूरे, विनष्टा यया के गता दुःखपूरे।
मुनिर्लोकसञ्ज्ञोज्झितः शास्त्रगोभिः, कृतार्थीकृतो येन तस्मै नमोऽस्तु ॥९॥

कलौ केऽपि शैथिल्यभाजो बभूवुः, कलौ केऽपि सन्मार्गभ्रष्टा बभूवुः।
तदात्वेऽपि ये मार्गरक्षैकदक्षा, जयन्तु प्रकर्षेण ते रामचन्द्राः ॥१०॥

चिरञ्जीव दुर्वादिघूकाय भानो! जनानन्दपद्माऽऽसमुल्लासभानो!।
समस्तास्तदोषाय दोषाकराय, नमोऽस्तु प्रभो! रामचन्द्रेश्वराय ॥११॥

जिनोपज्ञसन्मार्गसन्देशकाय, सुभव्यान् सदा सत्पथि स्थापकाय।
मदोन्मत्तवादीन्द्रनागाङ्कुशाय, नमो रामचन्द्राख्यसूरीश्वराय ॥१२॥

महासत्यगाण्डीवटङ्कारकारी, महामोहदैत्या-ऽत्यये यो मुरारिः।
तपागच्छनेता जगज्जन्तुभर्त्ता, जयं प्राप्नुयात् कामनाशे स्मरारिः ॥१३॥

सदा सत्यमार्गैकबद्धक्रमाय, परोलक्षश्राद्धैः सुपूज्यक्रमाय।
नमस्ते त्रिलोक्यां सदा विश्रुताय, नमस्ते नमस्ते नमस्ते नमस्ते ॥१४॥

नमस्तेऽद्वितीयक्षमाशालिने हे, नमस्तेऽद्वितीयप्रभामालिने हे !।
नमस्ते सदा सङ्घशान्त्यैककर्त्रे।, नमस्ते चिदानन्दसद्भोगकर्त्रे। ॥१५॥

नमस्ते सदा सुप्रसन्नाय दौःस्थ्ये, नमस्ते विरागैकरूपाय सौस्थ्ये।
जिनाज्ञास्फुरच्चन्द्रलेखावहाय, नमः शास्त्रमार्गैकसन्दर्शकाय ॥१६॥

जिनाज्ञा स्थिता यस्य वै भालपट्टे, सदा शोभते शारदा वक्त्ररन्ध्रे।
सहोल्लासमायाति कारुण्यवार्धिः, नमः सार्वपादाम्बुजे षट्पदाय ॥१७॥

---

२) वृषः - धर्मः

नमस्ते वचोऽतीतपावित्र्यमूर्त्यै, जगज्जीवजीवातुकारुण्यमूर्त्यै।
स्फुरद्देहकान्त्या त्वहो ! काममूर्त्यै, नमस्ते नमस्ते प्रभो! स्वेष्टपूर्त्यै ॥१८॥

व्रतीशैकनाथाय तुभ्यं नमोऽस्तु, कृपाम्भोधिरूपाय तुभ्यं नमोऽस्तु।
नमः सत्यमार्गैकनिष्ठाय तुभ्यं, नमः पुण्यपुञ्जाय वीराय तुभ्यम् ॥१९॥

प्रदत्ता सुदृष्टिः प्रदत्तः सुमार्गः, प्रदत्ता विरक्तिर्हतोऽज्ञानमार्गः।
प्रभोर्मार्गरक्षाबलं येन दत्तं, नमो रामचन्द्राय सूरीश्वराय ॥२०॥

नमस्ते मुदा सूरिवन्द्याङ्घ्रिपद्म!, सदोल्लासकृद्भाग्यसौभाग्यसद्म!।
कलौ स्मारिताहर्त्सुपुण्यैकलक्ष्मि!, नमो रामचन्द्राख्यसूरीश्वराय ॥२१॥

तितिक्षागुणाद् निर्जिता येन पृथ्वी, वरेण्यैर्गुणैर्लङ्घितो मेरुशृङ्गः।
कृतोऽधः कृपातः स्वयम्भूः समुद्रः, नमो रामचन्द्राख्यसूरीश्वराय ॥२२॥

नमस्ते स्थिरात्मन्! नमस्ते महात्मन्!, नमस्ते गुणात्मन्! नमस्ते परात्मन्!।
नमस्ते वचोऽतीतवाग्वैभवाय, नमो कामदेवाऽत्यये शम्भवाय ॥२३॥

सुमार्गैकरक्षासुमेरुश्च धीर!, प्रभो! मोक्षमार्गैकजल्पे सुवीर!।
नमस्ते गुणैः सुप्रसिद्धैः प्रसिद्ध!, नमस्ते नमस्ते नमस्ते नमस्ते ॥२४॥

सज्जनतायाः द्वौ गुणौ स्तः,
१) दोषं स्वस्य पश्येत्
२) गुणं परस्य पश्येत्
यदि परस्य दोषो दृष्टः तदा
तं हृदयैककोणे समुद्रतटपतितं पदार्थमिव
स्वं पश्यति- स सज्जनः।

# श्रीप्रेमशतकम्

– आचार्यश्रीविजयमुक्तिप्रभसूरिः।

नैकान्येवं जिनवरसदने स्थापनादीन् प्रकुर्वन्,
वर्षे चन्द्रग्रहनवबुधे सङ्घविज्ञापितः सन्।
हारीजाख्यं प्रवरनगरं प्राप्तवान् दानसूरिः
शैथिल्येऽपि, निजकवपुषः, स प्रतिष्ठामकार्षीत् ॥७०॥
(मन्दाक्रान्ता)

सङ्घस्यात्याग्रहपरवशः, पत्तनं राजधन्यं,
पश्चात् तूर्णं जिनसदनसद्–दर्शनार्थं ययौ सः।
स्वीयाऽऽसन्नान्तिमसमयविद् दानसूरिः स्वशिष्यं,
तूर्णं तत्राऽऽह्वयदतिगुणं पाठकं प्रेमसञ्ज्ञम् ॥७१॥

गुर्वादेशं, निजशिरसि सङ्गृह्य शिष्यः सशिष्यः[१],
सान्निध्येऽगादणहिलपुरात्, पत्तनात् तूर्णमेव।
प्रादात्, तस्मै, गुरुरपि बलात्, तत्र चैत्रे तृतीय–
माचार्याख्यं, पदमनुपदं, प्रेमसूरिः स जातः ॥७२॥

कृत्वा वर्षावसनमथ स, प्रेमसूरिः सशैक्षो[१],
गुर्वाज्ञातो, झटिति गतवान्, स्थम्भतीर्थाधिराजम्।
एवं सङ्घाग्रहपरिगतः, पाटडीग्राममध्ये
सूरिर्दानः, शिथिलगतितोऽगात् प्रतिष्ठापनार्थम् ॥७३॥

---

१) पंन्यासरामविजयगणिसहितः।

माघे शुक्ले, जिनगृहप्रतिष्ठापनं सूरिपादः,
सोत्साहं सोऽकृत निरुपमं, सद् द्वितीयादिनाग्रे।
रात्रौ तस्यां, दिवि स गतवान्, हन्त! हा! दानसूरिः,
**को जानीते, क्व च खलु कदा, यात्ययं कालधूर्तः** ।।७४।। (युग्मम्)

आकर्ण्यैवं, स्वगुरुवपुषो, नाशवृत्तं व्यथाकृद्-
दुःखाक्रान्तौ, गुरुविरहतः, स्थम्भतीर्थे स्थितौ तौ।
किं कर्तव्यं, क्व च विहरणं, सद्गुरोरन्तरेण,
**सत्यं तावद्, विधिविलिखितं, लङ्घितुं कः क्षमः स्यात्?** ।।७५।।

ध्यायन्नित्यं निखिलगुणभृत्-सद्गुरोर्मूर्तिमन्तः[1]
स्वल्पे काले, स्वमतिबलतो, ब्रह्मतेजोबलाच्च।
लोके लब्धाप्रतिमसुयशा राजमानः समन्तात्
प्रेमाचार्यस्तरुणतरणिः, सङ्घखे भात्यतुल्यः ।।७६।।

राधे शुक्ले, युग-नव-नव-स्यन्दवर्षस्य षष्ठ्यां
मुम्बापुर्यामनुपमसमुत्साहतः प्रेमसूरेः।
आचार्याख्यं, पदमनुपमं, प्राप्य सोऽन्वर्थनामा,
मान्यो जातः, सकलजगतां सूरिराड् रामचन्द्रः ।।७७।।

गत्वा कोल्हापुरमथ गुरुः, प्रेमसूरिः सशिष्यः[2],
सप्त-ग्रैवेयक-निधि-विधौ, वत्सरे वर्यमासे।
लक्ष्मीपुर्यां जिनवरमहा-चैत्यमध्येऽर्हतां तौ,
सोत्साहं सोत्सवमकुरुतां, सत्प्रतिष्ठाऽञ्जने च ।।७८।।

मुम्बापुर्यां तदनुगुणकृच्चोपधानं प्रधान-,
मेकः श्राद्धः, सफलविभवं, भक्तितोऽकारयत् सत्।
लक्षोल्लङ्घ्यो, द्रविणनिचयात्, तद्गुरोः सन्निधाने,
ह्यष्ट-ग्रैवेयक-निधि-निशानाथसंवत्सरेऽग्रे ।।७९।।

---

१) मूर्तिम् + अन्तः = हृदये । २) पंन्यासरामविजयगणि सहित इत्यर्थः।

सप्तम्यां ग्लौ-विधु-गगन-दृग्वर्षवैशाखशुक्ले,
सत्तारायां, विलसति शुभे, शासने प्रेमसूरेः।
त्रायस्त्रिंशत् प्रवरपुरुषाः, प्राव्रजन् मोक्षलक्ष्म्या-
आसन् येषु स्थविरवयसोऽनैकबाला युवानः ॥८०॥

तत्तुर्येऽब्देऽनुपममहिमा, निर्गतो भावसारो,
राजस्थानाद्, विपुलजनसङ्कीर्णसिद्धाद्रिसङ्घः।
गुरुप्रेमाचार्यप्रवरगुरुसत्सन्निधानेऽग्रधर्मा,
सिद्धं शैलं, प्रतिसमगमत् सोत्सवं पूज्यसङ्घः ॥८१॥

सिद्धक्षेत्रात्, स च पुनरगात् प्रेमसूरिः सुरेन्द्र-
ग्रामं तत्रातिशयमतिभिः, कर्मसाहित्यकार्यम्।
प्रारब्धं तन्निरुपमशुभामाशिषं प्राप्य शिष्यै-
राशीर्वाणी फलति नितरां, सद्गुरोः सर्वदैव ॥८२॥

तत्रायातो, गुरुमकथयत्, पिण्डवाडाग्रसङ्घो-
ह्यागन्तव्यं, गुरुवर ! यथा, पूर्णतामाप्नुयान्मे।
हर्षात् कृत्यं, जिनगृहयुगेऽर्हत्प्रतिष्ठाञ्जनस्य
स्वीकृत्यैतज्झटिति गतवान्, प्रेमसूरिः पुरं तत् ॥८३॥

राधे शुक्ले, रस-शशि-वियन्-नेत्र वर्षस्य षष्ठ्यां,
तस्मिन् ग्रामे, जिनवरप्रतिष्ठाऽञ्जने स व्यधत्त।
यत्र व्यापारितमुपनवं, लक्षमानं धनं सद्-
यस्मिन् ह्यासन्, शतमुनिवराः, प्रेमसूरेः प्रशिष्याः ॥८४॥

वर्षेऽष्टै-काऽ-म्बर-युगमिते, राधशुक्ले चतुर्थ्यां,
प्रेमाचार्योऽञ्जनमथ प्रतिष्ठां व्यधात् राजपुर्याम्।
कुर्वन्नेवं जिनगृहप्रतिष्ठामथ प्रेमसूरिः
ग्रामाद्ग्रामं, विहरति सदा, संयमेऽत्यप्रमत्तः ॥८५॥

क्रमशः

# रामचन्द्रसूरिस्तुतिविंशतिका

– आ. श्रीविजयतपोरत्नसूरिः

मतिस्फीततादर्शिताज्ञाप्रमाणा, जिनेन्द्रागमाबाधितार्थप्रसारा।
अधृष्यास्ति यद्देशना धैर्यसारा, ममैकः शरण्यो गुरूरामचन्द्रः ।।१।।

(भुजङ्गप्रयातवृत्तम्)

विचारे सतामध्वनां स्मार्तधैर्यात्, प्रचारे सतामध्वनां स्फूर्तिमत्त्वात्।
सुरक्षे सतामध्वनां लब्धलक्ष्यो, ममैकः शरण्यो गुरूरामचन्द्रः ।।२।।

पतङ्गोदये या तिथिः सैव मान्या, विमुक्त्यर्थमेवास्ति सद्धर्मसेवा।
प्रघुष्टं वचो यस्य दुर्वाद्यभेद्यं, ममैकः शरण्यो गुरूरामचन्द्रः ।।३।।

स्मृतिं नीतमात्रः सुषड्व्यञ्जनश्च, चतुःस्वारिकश्चिन्तितार्थस्य सिद्धिम्।
ददात्येव यन्नाममन्त्रोऽचिरात्स, ममैकः शरण्यो गुरूरामचन्द्रः ।।४।।

सुमार्गाच्च्युताः केवलं पादमात्रं, समृद्धा महाशक्तिवन्तोऽपि नैव।
यदीये हृदि स्थानमाप्तुं समर्था, ममैकः शरण्यो गुरूरामचन्द्रः ।।५।।

मनःशून्यता–श्रीत्व–दौर्भाग्यरोगै–रधैर्या–ऽज्ञता मुग्धता कौतुकैश्च।
यदर्चाप्रियो वीक्ष्यते नो कदापि, ममैकः शरण्यो गुरूरामचन्द्रः ।।६।।

असत्स्वात्मदोषेष्ववर्णं वदन्तोऽधिकानुग्रहामत्रतां यत्कृपालोः।
भजन्ते स्तवैरद्भुतैर्नावलिप्तो, ममैकः शरण्यो गुरूरामचन्द्रः ।।७।।

विदग्धासु भक्तिप्रणीताञ्जलीषु, सुलावण्यपुण्यासु सौभाग्यदासु।
विकारं य आपन्न शीलप्रभावान्, ममैकः शरण्यो गुरूरामचन्द्रः ।।८।।

समस्ताधिसन्ताप-दुःखापहारि, प्रसन्नीकरं निर्विकारीकरं च।
स्मितं यस्य रुष्टानपि प्रीणयत् स, ममैकः शरण्यो गुरूरामचन्द्रः ॥९॥

अनिष्टेष्टसंयोग-नाशैर्दयार्हं, जगद्रोग-रोगै र्भृशं पीड्यमानम्।
गिरा योऽस्ति जैन्योद्दिधीर्षन् कृपालुर्ममैकः शरण्यो गुरूरामचन्द्रः ॥१०॥

सदाराधकव्रातवात्सल्यसौम्यः-स धर्मात् स्वकीर्तेर्ववरीयस्त्ववन्द्यः।
तिरस्काररौद्रौऽतिसूक्ष्मार्थदर्शी, ममैकः शरण्यो गुरूरामचन्द्रः ॥११॥

पराक्रम्य यश्शासनाक्रान्तकाले, पराधृष्यतां जैनधर्मे प्रचख्यौ।
सदा प्राप्तसिद्धिः सदा धैर्यवृद्धि, र्ममैकः शरण्यो गुरूरामचन्द्रः ॥१२॥

यदीयात् प्रतापात् समस्तेऽपि सङ्घे, सपर्याच्छलेनाऽपि शास्त्रार्थबाह्याम्।
प्रवृत्तिं विधातुं समर्थो न कोऽपि, ममैकः शरण्यो गुरूरामचन्द्रः ॥१३॥

स्वपापात् स्वधर्मान्तरायात् परस्मिन्, न यद्भक्तलोकात् परो निर्जुगुप्सः।
नमन्तीसु सम्पद्विपत्सुप्रशान् स, ममैकः शरण्यो गुरूरामचन्द्रः ॥१४॥

यदङ्गे महोरूप-सौन्दर्यसिन्धौ, सुधौते सुतृप्ते दृशावन्यरूपे।
न धौत्या न तृप्त्यापि तल्ले विमुग्धे, ममैकः शरण्यो गुरूरामचन्द्रः ॥१५॥

अशान्तिप्रिया यौवने क्लिष्टचित्ता, अपि स्थाविरे यस्य निश्रामहिम्ना।
अदैन्यं समाधिं लभन्ते सलीलं, ममैकः शरण्यो गुरूरामचन्द्रः ॥१६॥

मनो विह्वलं स्यान्न दृष्टेऽपि रम्ये, रहस्यक्षि लुब्धं भवेन्नो सुरूपे।
न सञ्चारदोषोऽपि यद्ध्यानतोऽसौ, ममैकः शरण्यो गुरूरामचन्द्रः ॥१७॥

पमहियकुमय-व्वक्खाणवायप्पई जो, जिणवयणवसत्तेणं परूवेइ सव्वं।
स स-परमयमम्मण्णूप्पहू सूरिणाहो, हरउ कुमइतावं रामचंदो विहु व्व ॥१८॥

यन्नामस्मृतिरेकशो हृदि कृता, शल्यं निकृन्तेदरम्,
यद्वाक्यश्रुतिरेकशोऽपि विहिता, वैराग्यसञ्जीवनी ।
स्पर्शो यत्पदपद्मयोर्विकृतिसंहारे दृढप्रौढिमा;
मह्यं ग्रन्थममुं, ददत् परिणतिं, देयात्परब्रह्मणि ।।१९।।

स्वच्छादन्तः प्रचारान्नियमितनियतेर्निश्चयाकम्पसत्त्वात्,
सर्वस्मिन् कार्यजाते, प्रयतलवमपि, प्रापयन् लीलयाऽन्तम्।
सर्वस्या इष्टलब्धेरुपकरणमुखो-ऽमोघ औन्नत्यतायी;
ज्योतिश्चाराङ्कुशोऽसौ, जयति जनहितो, रामचन्द्रो गुरुर्मे ।।२०।।

यः सुखं भोक्तुं शक्यप्रयत्नेन
कस्यापि सहायं न मार्गयति।
क्षुधाकृते यदि आवश्यकं भवति
तदा मार्गयेत् तद् अन्यवार्ता,
क्षुधाशमनाय रोटिका
अपेक्षिता सा नाम क्षुधा,
किन्तु रोटिका सह व्यञ्जनाऽपेक्षा
तन्नाम सुखशीलता।

# श्रीरामचन्द्रीयमहाकाव्यम्

अथ षष्ठः सर्गः

– पंन्यासप्रवरश्रीमोक्षरतिविजयोगणी

प्रतिकरोषि यस्योक्तीः, किं रे व्रतिन्! न वेत्सि तम्।
भारतस्योन्नतिं कर्तुं, योऽवतीर्णोऽस्ति भूतले ।।३३।।

महात्मेति प्रजा सर्वा, यं बहुमन्यते यते!
तमाक्षेप्सुस्तव क्रुद्धा, साऽपकर्त्री न किन्नु किम् ।।३४।।

सत्त्वशालिशिरोरत्नं, प्रत्युत्पन्नमतिर्यतिः।
स्मित्वा प्रतिबभाषे तान्, न्यक्कृताम्भोधिनिःस्वनः ।।३५।।

सोऽस्तु नेता महात्मा वा, यादृशस्तादृशोऽथवा।
असत्यस्य प्रतीकारे, प्रमाद्यामः कदापि न ।।३६।।

कर्मणि तादृशि कैश्चिद्, विघ्निता विरमन्ति ये।
तेऽन्ये, निपीतजैनोक्ति,-सिंही दुग्धा वयं न हि ।।३७।।

[1]सवस्त्रावरणं चाद्य, विद्यते तस्य मस्तकम्।
विना जिनाज्ञया शीर्षे, धरामः किञ्चनापि न ।।कलापकम्।।३८।।

राजत्सात्त्विकशौर्यां गा[2]मिमामाकर्ण्य वर्णिनः।
मृगा इव मृगेन्द्रस्य, पलायन्ते स्म ते ततः ।।३९।।

स्वसंस्थावश्यकस्वार्थं[3], प्राग् यन्नामाप्यलं जने।
तद्गान्धिप्रेरणाप्यर्वाक्, कान्ताररुदनायते ।।४०।।

---

१) वस्त्रावरणं 'टोपी' इति भाषायाम्। २) वाणीम्। ३) स्वं लौकिकभाषायाम् धनम्।

एवं स्वमानहानीः, स्वधाम्नि ह्यालोक्य मूढहृत्।
गान्धी भक्तानुरोधेन, वाचिकं प्रेषयद् यतेः ।।४१।।

आजिगमिषुरस्म्यद्य, भवतोऽनुज्ञया सभाम्।
एतद् वाक्यमितो गान्धि-वाचिके संयतोऽपठत् ।।४२।।

स्मयमानाननः किञ्चिद्, विस्मयमानमानसः।
यतिः स्म साम्प्रतं तस्मायुत्तरयति तत्क्षणम् ।।४३।।

पुरेऽस्मिन्नाऽऽमहापौरमाऽऽसामान्यप्रजाजनम्।
यः कोऽपि धर्मजिज्ञासुः, सकलोऽप्यनिवारितः ।।४४।।

नित्यमायाति सद्धर्मसभायामिह तेन नः।
नानुज्ञाऽऽवश्यका किन्तु, जिज्ञासा नम्रता च वः ।।४५।।

अन्यच्च नः प्रतिज्ञास्ति, यद् भाषितुं न शक्यते।
गृहिणे गच्छ वाऽऽगच्छ, नाऽऽगच्छ गच्छ नाथवा ।।कलापाकम्।।४६।।

गान्धी न गतवाँस्तत्र, तद्भक्ता भूरयः परम्।
मुनिं श्रोतुं ययुर्नित्यं, सत्यं तत्त्वं च लेभिरे ।।४७।।

इतश्चान्यो महादेशनेता वल्लभसञ्ज्ञकः।
पटेलोपाह्व एतत्पूर्-वासी भासितभारतः ।।४८।।

[1]अयः पुरुषताख्यातः पुम्परीक्षाविचक्षणः।
व्याख्यानपर्षदि श्रीमद्रामर्षेरेकदाययौ ।।४९।।

आकर्ण्य वर्ण्यमानं तं, वर्णिना धर्ममार्हतम्।
दध्यावेष विशेषज्ञश्चित्रीयमाणमानसः ।।५०।। (क्रमशः)

---

१) लोहपुरुषः इति

# स्तुवे रामचन्द्रं तपागच्छनाथम्

– मुनिश्रीज्ञानभूषणविजयः

गुरो रामचन्द्रस्य सूरेः कृपातो, गुरो हेमपादस्यभृङ्गायमानः।
गुरूणां गुणानामवाप्त्यै प्रमोदात्, स्तुवे रामचन्द्रं तपागच्छनाथम् ।।१।।

सदा धैर्य–गाम्भीर्य–माधुर्यवर्यं, क्षमा–साम्य–कारुण्य–माध्यस्थ्यभव्यम्।
अहो! शुद्धचारित्रपूर्णं च वृत्तं, स्तुवे रामचन्द्रं तपागच्छनाथम् ।।२।।

मनो यस्य सद्ध्यानयोगैकलीनं, वचो यस्य भव्यप्रबोधैकनिष्ठम्।
वपुर्यस्य चारित्रधर्मे निलीनं, स्तुवे रामचन्द्रं तपागच्छनाथम् ।।३।।

भवोद्धारकै र्मार्मिकैर्यस्य वाक्यै र्हतो मङ्क्षु संसारवासानुरागः।
भवेत् संयमौत्सुक्यमध्यात्मयुक्तं, स्तुवे रामचन्द्रं तपागच्छनाथम् ।।४।।

नवादित्यवद् यस्य वाणी प्रभाभिर्विनष्टा मिथ्याप्रवृत्त्यन्धकाराः।
प्रफुल्लानि ताभिः प्रबोधाम्बुजानि, स्तुवे रामचन्द्रं तपागच्छनाथम् ।।५।।

महाकालिकामन्दिरे छागहिंसा–प्रवृत्ताऽर्चकैरेव कारुण्यहीनैः।
वचोभिर्निरुद्धा वरैर्येन सेयं, स्तुवे रामचन्द्रं तपागच्छनाथम् ।।६।।

महद्देशनायाः प्रभावोऽस्य दीक्षां, त्रिसंवच्छतेभ्यो दुरापामिदानीम्।
अनायासतो भव्यलोका लभन्ते, स्तुवे रामचन्द्रं तपागच्छनाथम् ।।७।।

जिनाज्ञानुसारिश्रुतज्ञानयोगात्, कृता देव–गुर्वादिसम्पत्तिरक्षा।
सदा येन शास्त्रैकनिष्ठेन युक्त्या, स्तुवे रामचन्द्रं तपागच्छनाथम् ।।८।।

# प्रेमसूरीश्वराणां प्रसङ्गद्वयी

–[1]पण्डितप्रवरश्रीमत्तृप्तिनारायण झा

श्रीमत्–सततस्मरणीय–सम्यक्चारित्रगुणाधार–तपोगच्छाधिपति–श्वेताम्बर–जैनशासन–समनुशिष्ट–सज्जनतागगनमण्डनदिनमणि–रागाविविक्त–प्रेममयसंसारैककेवलप्रेमपरिपूर्ण–निर्दुष्टस्वान्तागार–विजय–प्रेमसूरीश्वरमहाराजमहोदयानाम्। शास्त्रविहितकर्मानुष्ठानपराकाष्ठाभास एकस्मिकप्रत्यःक्षेक्षणक्षणे

तथाहियदुष्णर्तु–कर्मकरग्रीष्मस्तरुण–तीक्ष्णांशुकिरणकूर्चिकया राजनगरस्थ–राजमार्गस्य परमाणुपरमाणु–प्रत्यन्तरनिलीनान्धतमसदुष्कर्म–पुञ्जसमूलोन्मूलनव्यापृतमना आसीत्, तदा गुहानिलीनानपि समस्तान् जन्तून् प्रदग्धुकामे महाप्रलयकालकल्पे कालांशे स्थण्डिलात् परावर्त्तमाना महामनसः, स्वचरणकमलरक्तिम्ना कणकणान्तरे–नवरक्तसञ्चारं विदधतः, तेषाम्भाविसिद्धपदा–वस्थितत्वमभिव्यञ्जयन्त इव स्मयमाना मुखमण्डलादा–चरणाङ्गुलि श्वेतस्वेदकणजालव्याजेन देवगणविसृष्टकल्पकुसुमसम्पर्काभिव्यक्तधन्यवादार्हत्वमासादय–न्तोऽपि सर्वथा हर्षविषादाति–रेकव्यतिरेकपरिपूर्णा इवालक्ष्यन्त।

शास्त्रमर्मस्पर्शिताभासः प्रथमसाक्षात्कारसमये प्रेममूर्त्तस्वरुपाणां कियत्स्वेव पदेषुर तथाहि–नास्यां मान्यतायां कैरपि विचिकित्सितव्यमस्ति यत;–सांसारिकजीवनोपयोगिनो यावन्तः प्रशस्ताः पन्थानः सम्भावनया विषयीक्रियन्ते, तेष्वैकैकस्मिन्वयमात्मप्राण्यर्पणविधीयमानप्रयासैर्विचरणसौभाग्य–साम्राज्या–धिपत्यमाप्नुवाना अपि न जातु स्वान् कृतकृत्याननुभवामोऽनुभवामश्चास्मान्नवीनं नवीनं पन्थानमन्वेष्टुं सदास्तन्न्यस्तचेतसः। सन्तु तेषामन्यान्यानि रूपाणि–परन्तु मन्यामहे जीवानामिमां दशां व्याहन्तुकामा एव प्राचीनमहर्षयो विविधाः सरणीः प्रदर्शयितुमकामयन्त। नचात्मपरिचयमन्तरा महर्षिसमुपदृष्टि–पथविचरणस्य किमपि फलान्तरमुपयुक्तमुत्पश्यामः। आत्मपरिचयसाधनेषु च प्रथमसाधनस्य नाम न नामाविदितं कस्यापि भगवत्या गीर्वाणभारत्या दिनद्वयमपि चरणसरोरुहं सश्रद्धं जुषाणस्य जनस्य। तदिदं शास्त्रज्ञानाभिधं प्रथमं साधनं प्रमाण–प्रमेयशास्त्ररुपायां द्वेधा विभक्तुं शक्यते। अद्यत्वे चास्माकीना स्थितिः प्रमाणशास्त्रार्थावगमोपायकियच्चित्पदार्थज्ञान–गर्विष्ठानामुद्भट–विद्वांसम्मन्यमानानां समाश्वस्ततया "पङ्के गौरिव सीदति" इति रीत्या यथा दुर्दशाग्रस्ता;–सा न केषामपि विशुद्धशेमुषीजुषां कदाप्यविज्ञाता। इतः कियदेवपूर्वं "जडान्वेषणेनैवानवशिष्टकृत्या" ये विपश्चितः, स्वान् कृतकृत्यंमन्वानाः पाण्डित्यप्रकाशनैककर्माणो जायन्ते; न वा हं तेभ्यो

१) व्याकरण–न्याय–साहित्याचार्यः

देवानांप्रियानपि निकृष्टान् मन्ये'' अनया देशस्यास्य भूतपूर्वराष्ट्रपतेराधुनिकदार्शनिकशिरोरत्नस्य डॉक्टरराधाकृष्ण-न्महोदयस्योक्त्या केषां न दर्शनशास्त्रविदां चेतांसि क्षणं प्रकम्पनपराणि जातानि? परं षड्दर्शनशास्त्रतत्त्वस्पर्शिनोऽपि मम स्वान्तं यन्नतां दशामापन्नं, तद् भगवतां प्रथमवार्त्ताप्रसङ्गे समासादितस्य जगत्कल्याणमयीकर्तुं समर्थस्यापर-भास्करसहस्रस्येव वचनसमुच्चयस्य माहात्म्यम्। स्वभावश्चायं समेषां शाश्वतो यत्; स्वकल्याण-कृत्वेनाभ्युपगते मार्गे कियन्तं कालं निर्भयत्वमाशासाना यदा केनापि निमित्तेन स्वान् सर्वथा निष्कलान् पश्यन्ति; न पश्यन्ति चापरं ग्रहीतव्यमार्गान्तरं तदा, तेषां चित्तानि शरणाभावान्धकारावृतानि सन्ति सन्त्येव भीत्या प्रकम्पनपराणि, सत्यपि प्रकम्पनयोग्यत्वे सेयमापत्तिः, कुतो मां पर्यत्याक्षादित्यस्य बीजन्तु प्रागेव प्रतिपादितं मया, यद् राधाकृष्णन्महोदयस्योक्त्या प्राप्स्यमानकिंकर्त्तव्यविमूढत्वतमोराशिमपुनर्भावं व्याहन्तुं समर्थं वचनसमुच्चयं कालं वर्णनीयमाहात्म्यस्य पदोच्चयस्यानभिव्यक्त्या पाठकानां जाग्रत्या समुत्कण्ठया यन्मनांसि नितरां खेदितानि मया, तदागः प्रशान्तये महात्मनां करुणैकशरणानां सुधामयं सारस्वतं सत्वरमेवोपस्थापये समक्षम्। सर्वथा क्लेशमननुभूयानुभूयापि सुखसाम्राज्यं नाभीष्टास्वादभाज; केचनेति क्षमार्होऽहं तेषामित्याशासे। सेयवचनपरिपाटीवार्ता प्रसङ्गे **''पण्डितप्रवर! प्रमाण-शास्त्राण्येवाधीतानि भवताथवा प्रमेयशास्त्राण्यपि?''** समुपस्थिते चास्मिन्नभिनवे प्रश्ने शिरोनमनमन्तरा शरणान्तरमपश्यन्तं मामर्द्धनिमीलकयावलोक्य कृपया वक्ष्यमाणवचनपरिपाटीरज्ज्वलम्बनेन कल्लोलमालासहस्रकुलेऽपारे पारावारे निःसहायं निमज्जन्तं बालमिव सत्त्वरमेवोदधरन् पूज्यपादाः-''किं विमृशति भवान्? प्रमाणशास्त्रज्ञानस्य फलं प्रमेयशास्त्रज्ञानं तस्य च विदितकर्मानुष्ठानम्। प्रमाणेन चक्षुषा यदि सन्मार्गा न दृष्टाः, दृष्टेष्वपि तेषु यदि कण्टकाकीर्णमार्गगामित्वं नाऽजहात्, तदा जन्मान्धाच्चक्षुष्मता भवताऽपि भवता किमधिकं **''लब्धव्यं लब्धमिति विमृश्य यथारुचि साध्यतां स्वकीयं साध्यम्''**। नाद्यावधि चित्तं मे वचनपरिपाटीमिमां जातु जिहासतीति।

सद्गुणगरिमेरितहृदयस्याभ्यां शब्दाभ्यां सद्गुणसङ्कीर्तनपवित्रित वाङ्ग-मनसी अधिशयानस्य।

> यस्य जीवने पशुधर्मस्याऽऽचरणंनास्ति
> स्वस्मिन् च यः पशुधर्मःतस्य यद् परिवर्तनं
> - स एव मानवधर्मः।





# विभाग : २ अर्वाचीनकृतयः

## खण्ड : ४ प्रकीर्णककृतयः

(इन्द्रवव्रजावृत्तम्।)

नव्यं सुरम्यं वरशुभ्रपत्रम्,
सद्वर्णसौरभ्यरसाभिसिक्तम्।
भव्यभ्रमरैर्ध्वनितं सुकाव्यम्,
निःश्रेयसं सत् कमलं गृहाण ।।१।।

सत्सन्धिलेखैकसुवर्णरक्तम्,
दुर्वादपङ्कान्नितरामलिप्तम्।
दृष्टान्तपुण्यैकप्रमोदमूलम्,
निःश्रेयसं सत्कमलं गृहाण ।।२।।

विद्वन्मरालैः परिसेवितं यत्,
सद्वृत्तकिञ्जल्कमहार्घ्यशोभम्।
पुण्यप्रपाप्रापणपुण्यसद्म,
निःश्रेयसं सत् कमलं गृहाण ।।३।।

– श्री.....

# ।। आगमस्यामृतम्।।

– आचार्य श्रीविजय कल्याणबोधिसूरिः

विचित्रः खल्वयं संसारः। प्रतिपदमत्र व्यवस्थितो मोहराजप्रयुक्तः पाशः। अनवरतमेव क्लिश्यन्तेऽत्र तत्पतितोत्पीडिता जीवाः। अत एतद् दारुणतरमसमञ्जसं दृष्ट्वोपदिष्टवन्तोऽस्माकं पूर्वमहर्षयः–

**।। णीवारे व ण लीयेज्जा।।**

(द्वितीयागमस्वरूपं परमपावनं श्रीसूत्रकृताङ्गसूत्रम्)

शूकरग्रहार्थं हि व्याधा धान्यमयस्य नीवारस्य प्रयोगं कुर्वते। तल्लुब्धा हि शूकराः सुखमेव तदन्तव्यवस्थितपाशगोचरीभवन्ति। एतदेव दृष्टान्तं पुरस्कृत्यात्राभिदधन्ति परमर्षयः– नीवारकल्पा हि विश्वविश्वोदरविवर्त्तिनो विषयाः, अयमेव त्वद्ग्रहार्थं मोहराजेन प्रयुक्तस्य पाशस्य सहायगणः, साक्षात् पाश एव वाऽयम्, बन्धनहेतुत्वाविशेषात्।

स्त्री वाऽस्तु धनं वा, स्वर्णं वाऽस्तु रजतं वा, रत्नं वाऽस्तु सौधो वा, मा भूदत्रोपलयनम्। न ह्यतोऽपि परः पाशो विश्वेऽपि विश्वे। न हि सोऽपायः, योऽत्रोपलीनानां न प्रजायते। अहो दुर्मतिता मोहमूढस्य, यदसावात्महितहेतोर्धर्मात् शङ्कते, न तु परमार्थरिपोर्विषयव्रजात्, तदुक्तम्–मूढात्मा यत्र विश्वस्तस्ततो नान्यद् भयास्पदम्। यतो भीतस्ततो नान्यद्, अभयस्थानमात्मनः–इति (समाधितन्त्रे)।

निदर्शनमत्र दशाननः, येन परस्त्रीरमणमनोरथेन हारितं प्राज्यं साम्राज्यं विमलं यशः स्वजीवितञ्च। अत एव विषाधिका विषया इत्याहुस्तत्त्वविदः, यदाहुः–विषस्य विषयाणां च दूरमेवास्ति चान्तरम्। उपभुक्तं विषं हन्ति, विषयाः स्मरणादपि–इति। भवत्वतो भविनां नीवारपरिहारेण पाशविमुक्तिः, परमसौख्याधिगमश्चेत्यभिलषन् विरमत्येष गुणिनामनुचरः।

(क्रमशः)

सुखेषु न हृष्यति, दुःखेषु च न शोचति
तस्य जीवितं स्वाधीनम्।

विविध प्रकार संवलिता द्वादशमी

# श्री चारित्रसप्तविंशतिका

।। माङ्गल्यम्।।

- पंन्यासप्रवरश्रीसम्यग्दर्शनविजयगणी

(शार्दूलविक्रिडीतम्)

ऐन्द्रैश्वर्चितपादपद्मयुगलं, सर्वार्थसिद्धिप्रदम्,
कन्दर्पादिविकारकक्ष[1]मसमं, निर्मूलने वारण[2]म्।
आत्मौकः सुप्रकाशनेऽतिविशदं, दीप्रप्रदीपं शुभम्,
वन्दे वीरप्रभुं त्रिलोकपरमं, विघ्नाग्निधाराधरम् ।।१।।

(वसन्ततिलका)

चारित्रमेकममलं प्रवदन्ति सन्तः,
चारित्रमेकमसमं सुचरन्ति धन्याः।
चारित्रमेकमतुलं सुखमर्पयेच्च,
चारित्रमद्भूत-गुणं प्रणमामि भक्त्या ।।२।।

चारित्रमेकमचलं गुणराजिभ्राजम्,
चारित्रमेकमनघं गुणरत्नराजम्।
चारित्रमक्षयपथे सुजवः सुवाजी,
चारित्रमद्भूतगुणं प्रणमामि भक्त्या ।।३।।

चारित्रमेव हरते कुविकारभावम्,
चारित्रमेव ददते शुभसौख्यदानम्।
चारित्रमेव कुरुते गुणसत्प्रचारम्,
चारित्रमदभूतगुणं प्रणमामि भक्त्या ।।४।।

चारित्रमेव मम जीवनमस्तु नूनम्,
चारित्रमेव पावननेत्रमस्तु।
चारित्रमेव समभाव निबन्धनं स्यात्,
चारित्रमद्भूतगुणं प्रणमामि भक्त्या ।।५।।

तृण्यां यथा दहति वह्निररं तथैव,
कोटीभवाऽर्जितमघं चरणं क्षणेन।
देवाऽसुरेशनरनाथसमूहपूज्यम्,
चारित्रमदभूतगुणं प्रणमामि भक्त्या ।।६।।

एको यथा जलगतो बहुधा विभाति,
इन्दुस्तथैव चरणं बहुधा विभाति।
वक्ष्येऽत्र तच्चरणमेकमनेकरुपम्,
चारित्रमद्भूतगुणं प्रणमामि भक्त्या ।।७।।

भेदप्रभेदविशदं वरदं विखेदं,
भाग्यं यथाऽस्त्यसुमतां सफलं सदैव।
तद्वत् भवेच्चरणमेकमनेकभेदम्,
चारित्रमद्भूतगुणं प्रणमामि भक्त्या ।।८।।

## एकप्रकारं चारित्रम्

आत्मस्वभावरमणात्मकमेकमेव,
पापारिवृन्दरहितं चरणं प्रशस्तम्।
सर्वात्मनामभयदानमयं विशिष्टम्,
चारित्रमदभूतगुणं प्रणमामि भक्त्या ।।९।।

१) वनं २) हस्ती

### द्विविधं चारित्रम्

चारित्रमेव सुखदं द्विविधं जगत्यां,
यत् सर्व देशविरतात्मकमात्मनीनम्।
रागेण रोषप्रसरेण सदैव मुक्तम्,
चारित्रमद्भूतगुणं प्रणमामि भक्त्या ।।१०।।

### त्रिविधं चारित्रम्

चारित्रमौपशमिकं प्रथमं प्रसिद्धम्,
शास्त्रे क्षयोपशमिकं तत एष प्रोक्तम्।
श्री क्षायिकं चरणमस्ति निवृत्तिदातृ,
चारित्रमद्भूतगुणं प्रणमामि भक्त्या ।।११।।

सज्ज्ञानदर्शनव्रतात्मकमेतदेव,
रत्नत्रयीमयमऽदः सफलं त्रिभेदम्।
चारित्रमेव मम शाश्वतसौख्यकारम्,
चारित्रमद्भुतगुणं प्रणमामि भक्त्या ।।१२।।

### पञ्चविधसंयमः

सामायिकादिचरणं कृतपञ्चभेदम्,
छेदं तथैव परिहार–विशुध्दिनाम।
सूक्ष्मं यथाकथितमेतदहो सुसारम्,
चारित्रमद्भुतगुणं प्रणमामि भक्त्या ।।१३।।

### दशविधसंयमः

क्षान्तिस्तथाऽऽर्जवमृदुत्वविमुक्तिभावः,
शुध्दं तपश्चरणसंयमसत्यभावः।
शौचं स्वकिञ्चनगुणोदशमञ्च ब्रह्म,
चारित्रमद्भुतगुणं प्रणमामि भक्त्या ।।१४।।

### सप्तदशप्रकारसंयमः - १

पृथ्व्यादि पञ्चविषये सुदयाभिरामम्,
द्विन्द्रयादि रक्षणयुतं करुणाऽप्यंजीवे।
प्रेक्षा सुसंयमपरं चरणं ह्युपेक्षा,
चारित्रमद्भुतगुणं प्रणमामि भक्त्या ।।१५।।

नित्यं प्रमार्जनगुणः, प्रवरश्च त्यागः,
चेतः शरीरवचनैः शुभसंयमाऽऽढ्यम्।।
श्रेष्ठोऽस्ति संयमसरो गतपापपङ्कम्,
चारित्रमद्भुतगुणं प्रणमामि भक्त्या ।।१६।।

### सप्तदशप्रकारसंयमः - २

पञ्चाऽप्यहो ! करणनिग्रहपुण्यपात्रम्,
सन्निर्झरं परमपञ्चमहाव्रताह्वम्।
दंडत्रयैः विरहितञ्च कषायमुक्तम्,
चारित्रमद्भुतगुणं प्रणमामि भक्त्या ।।१७।।

### सप्तविंशतिगुणसंयमः

षड्जीवकायपरिपालनपुण्यलक्ष्यम्,
श्रीषड्व्रतस्य परिरक्षणबध्धकक्ष ।
मिन्द्रियपञ्चपरिसंवरणे सुदक्षम्,
चारित्रमद्भुतगुणं प्रणमामि भक्त्या ।।१८।।

रक्षेद्व्रतम् जयति लोभभटम् सुवीरम्,
वर्या क्षमां धरति यत् शुभभावनाभिः।
शुद्धक्रियासहितसंयमयोगयुक्तम्,
चारित्रमद्भुतगुणं प्रणमामि भक्त्या ।।१९।।

सुखीजनस्य रोगतुल्यं संसारसुखम्।

चेतोवचः करणगुप्ति[३]विशुद्धिपुष्टम्,
पुष्टैर्गुणै परिषं[१]हान् सहनाददुष्टम्।
दुष्टोपसर्गसि[१]हनात् समतैकतुष्टम्,
चारित्रमद्भुतगुणं प्रणमामि भक्त्या ॥२०॥

**सप्ततिप्रकारसंयमः**

प्रा[८]णातिपातविरतादिकपञ्चपापम्,
पूर्णक्षमा[१०]दिकरणे गतकर्मतापम्।
पृथ्व्या[५]दिरक्षणकरं शुभदं प्रतापम्,
चारित्रमद्भुतगुणं प्रणमामि भक्त्या ॥२१॥

'निर्जीवरक्षणपरं', वरभावसारम्,
प्रेक्षा[१]सुसंयमधरं, शमसौख्यधारम्।
उपेक्षा[१]णैकभवनं, हतपापचारम्,
चारित्रमद्भुतगुणं, प्रणमामि भक्त्या ॥२२॥

त्या[२]गप्रमा[२]र्जनपरं शुभयोग[३]युक्तम्
आ[१]चार्य पाठक[२]तप[३]स्विसु[४]बालशिष्ये[५]-
ग्ला[६]नादिसाधु[७]पदसेवनतत्परं तम्,
चारित्रमद्भुतगुणं, प्रणमामि भक्त्या ॥२३॥

सङ्घे कु[८]ले वरग[९]णे समुपासनार्द्रम्,
नित्यं त्रिधा त्रिविधतो नवब्रह्म[९]गुप्तम्।
बाह्यान्तरेण त[१२]पसा परिपुष्टदेहम्,
चारित्रमद्भुतगुणं प्रणमामि भक्त्या ॥२४॥

नित्यं कषायरहितं निजभावशुद्ध-
मेवं तु सप्ततिविधं चरणं प्रशस्तम्।
प्राणाः धनञ्च सकलं चरणं मम स्यात्,
चारित्रमद्भुतगुणं प्रणमामि भक्त्या ॥२५॥

चारित्रभावपरिपूतमनो भवेन्मे,
चारित्रपुष्टिकरणं वचनञ्च मे स्यात्।
चारित्रयोगसहितं सुभगं तनुः स्यात्,
चारित्रमद्भुतगुणं प्रणमामि भक्त्या ॥२६॥

(शिखरिणी)
स्मृतं शुभ्रं भक्त्या, बहुविधगुणं शुद्धचरणम्,
भृतो भावो नूत्नः, शिवसुखकरः, स्वात्मसुखदः।
कृतः सौख्याधायी, भवभयहरः, पापविगमः,
ततः ''श्रेयः'' ''सम्यग्''
परमपददं, ''दर्शनकरम्'' ॥२७॥

नागरिको नाम यः सर्वनगरवासीनां
चिन्तां कृत्वा
स्वस्मात् कस्यापि अशुभं मा भूत् इति
सावधानतया जीवति सः

# उपशम-क्षायिक-क्षायोपशमभाववर्णन संवलिता -त्रयोदशमी श्री चारित्रसप्तविंशतिका

(छन्द :- शार्दूलविक्रिडीतम्)

ऐन्द्रैः संरचिता शुभा जिनपतेः, पूजा यशोदायिनी,
विघ्नव्रातविदारिणी, गुणकरी, सद्दर्शनस्पर्शिनी।
यस्याःप्रौढप्रभावतः हितमतिः, सद्भाव श्रेयस्करी,
भूयान् मे परमादरः प्रतिभवं, श्रीशासने सर्वदा ।।१।।

(छन्दः- इन्द्रवज्रा)
चारित्रमेतत् त्रिविधं विशुद्धं, कल्याणकारं शिवधाम दत्ते।
स्वभावसत्धारण धैर्यमूलं, चारित्रमेकं प्रणमामि नित्यम् ।।२।।

दुष्कर्ममोहोपशमेन युक्तं, कर्मक्षयात् क्षायिकभावबद्धम्।
कर्मक्षयाच्चोपशमाद् द्विरूपं, चारित्रमेकं प्रणमामि नित्यम् ।।३।।

चारित्रमाद्यं विवृणोमि साध्यं, कर्माणि सर्वाण्युपशामयेद् यद्।
नो दुःस्वभावाः प्रकटेच्च येन, चारित्रमेकं प्रणमामि नित्यम् ।।४।।

एकादशस्थानकसद्गुणे य-दाद्यं भवोपशमं सुस्पष्टम्।
क्रोधादिभावोपशमञ्च भूयात्, चारित्रमेकं प्रणमामि नित्यम् ।।५।।

वच्मि प्रसङ्गात् प्रथमं तु तत्र, सम्यक्त्वभावः क्रमतः कथं स्यात्।
मूलं विना नैव भवेद्धिशाखा, चारित्रमेकं प्रणमामि नित्यम् ।।६।।

अनन्त कालाद् भविनां भवन्ति, तथाविघा ये मनसः विचाराः,
यथाप्रवृत्ताख्यतया प्रसिद्धाः, चारित्रमेकं प्रणमामि नित्यम् ।।७।।

पश्चाद् भवेत् शुद्धयथाप्रवृत्तः, सद्भावशुद्धिः सफला ततःस्यात्।
एषा विशुद्धिः समये भवेत् तच्-चारित्रमेकं प्रणमामि नित्यम् ॥८॥

कर्म स्थितिस्तत्र तदा च भूयात्, आयु र्विना सप्तकुकर्मणां हि।
अन्तश्च कोटिस्थितिका भवेत् सा, चारित्रमेकं प्रणमामि नित्यम् ॥९॥

तत्राऽपुनर्बंधकभाग्भवेद्य-दुत्कृष्टकर्मस्थितिबन्धको न।
रागाद्यराते स भवेत् निहन्ता चारित्रमेकं प्रणमामि नित्यम् ॥१०॥

उत्कृष्टर्मस्थिति बंधको यो, यद्येकवारं हि भवेत् सदा सः।
सकृत्स्मृतो बन्धकभावभागी; चारित्रमेकं प्रणमामि नित्यम् ॥११॥

द्विर्बन्धको संसरणेऽत्रनूनम्, वारद्वयं सोत्कटकर्मबद्धम्।
मिथ्यात्वभावं च करोति मन्दं, चारित्रमेकं प्रणमामि नित्यम् ॥१२॥

ऊर्ध्वादिशुद्धि र्हि तदैव भूयात्, षट्स्थानतः शुद्धि र्विशुद्धिलाभः।
प्राप्नोत्यपूर्वकरणं विशिष्टम्, चारित्रमेकं प्रणमामि नित्यम् ॥१३॥

स्थित्यादिघातं प्रकरोति तत्र, रागादिग्रन्थिं च निराकरोति।
सम्यक्त्वलाभाऽध्यवसायजातं, चारित्रमेकं प्रणमामि नित्यम् ॥१४॥

प्राप्याऽन्तरं यत् करणं विशिष्टं, पुञ्जत्रयं तत्र करोति भव्यः।
सम्यक्त्वमत्रोपशमं लभेत, चारित्रमेकं प्रणमामि नित्यम् ॥१५॥

अन्तमुहुर्त्तात् परतो भवेत् तत्, शुद्धः क्षयः सोपशमः स्वभावः।
कर्मक्षयात् क्षायिकभावमेति, चारित्रमेकं प्रणमामि नित्यम् ॥१६॥

मोहस्य सर्वोपशमो जिनैः स, प्रोक्तोऽन्यकर्मप्रचयेषु देशात्।
सम्यक्त्वमुक्तं चरणं च वक्ष्ये, चारित्रमेकं प्रणमामि नित्यम् ॥१७॥

आसप्तमस्थानकतः सदैव, शुद्धः क्षयः सोपशमेन युक्तः।
चारित्रमोहोपशमे स योग्यः, चारित्रमेकं प्रणमामि नित्यम् ॥१८॥

देशादिभेदै र्विरतिं यदाऽऽप्यात्, तत्राऽपि नूनं करणं विधेयात्।
श्रेणिं समारोहति सोष्टमे तच्- चारित्रमेकं प्रणमामि नित्यम् ॥१९॥

तत्र स्थितः सोऽप्युपशामकः स्यात्, शुद्धिप्रभावादुपशान्तमोहे।
एकादशस्थानकनष्टपाप, चारित्रमेकं प्रणमामि नित्यम् ॥२०॥

षट्षष्टिवार्धि स्थितिमान् स्वभावः, प्रोक्तः क्षयः सोपशमस्तु नाम्ना।
स्यात् तत् समेतं चरणं तदेव, चारित्रमेकं प्रणमामि नित्यम् ॥२१॥

मोहक्षयात् क्षायिकभावयुक्तं, श्रेणिप्रयुक्तं चरणं प्रशस्तम्।
स्यात् केवलज्ञान पदं सदैव, चारित्रमेकं प्रणमामि नित्यम् ॥२२॥

कैवल्यशुद्धं चरणं तु तत्र, सन्दर्शितं क्षायिकभावपूर्णम्।
लोकावलोकैकविशुद्धभावं, चारित्रमेकं प्रणमामि नित्यम् ॥२३॥

हेयं हि पापं भवताद् भवेऽत्र, ज्ञेयः सदात्मा तु भवे शिवे च।
आदेयमेवं चरणं सुधीभिः,चारित्रमेकं प्रणमामि नित्यम् ॥२४॥

चारित्रतः स्वात्मगुणर्द्धि लाभ-श्चारित्रतो निर्मलसत्स्वभावः।
चारित्रतः स्यात् सुलभैव सिद्धिश्, चारित्रमेकं प्रणमामि नित्यम् ॥२५॥

चारित्रतः पापवियोग एव, चारित्रतो दुर्गतिदुःखनाशः।
चारित्रतः सन्मतिसौख्यमेव, चारित्रमेकं प्रणमामि नित्यम् ॥२६॥

[शिखरिणी]

मया शुद्धस्पृष्ट श्चरणविषयो भावमसमः,
हतं क्लिष्टं कर्म कलुषखचितं दोषरचितम्।
शुभं सर्वत्र स्यादखिलजगतां शुद्धमनसां,
**परं 'श्रेयो' भूयाद् भवभयहरं 'दर्शन' गुणात् ॥२७॥**

पञ्चविधचारित्रवर्णनगर्भिता

# चतुर्द-शमी श्री चारित्र सप्तविंशिका

(वसंततिलका)
ऐन्द्रैः कृतं स्तवनमस्य निरस्तपाशम्,
पाशं छिनत्यशुभकर्मततेःस पार्श्वः।
पार्श्वप्रभुः सकलसिद्धिसमाधिदाता,
दाता श्रियो शिवमहाध्वसुविघ्नहर्ता ।।१।।

(उपजाति)
चारित्रमेकं गुणरत्नवासम्,
वासात् कुदोषस्य समस्त नाशः।
नाशात् भवेत् मोक्षसुखस्य लाभः,
नमोऽस्तु तस्मै चरणाय भक्त्या ।।२।।

सामायिकाद्यानि प्रकारकानि,
पञ्चानि तानि श्रुतवर्णितानि।
भव्याङ्गिभिर्यानिनिसेवितानि,
नमोऽस्तु तस्मै चरणाय भक्त्य ।।३।।

सामायिकं शुभ्रव्रतं च वन्द्यम्,
ततस्तृतीयं परिहारशुद्धम्।
छेदादुपस्थानपनामतोऽथ,
सूक्ष्मं यथाख्यातमनन्तऋद्धम् ।।४।।

सामायिकं तत्र बहु प्रकारम्,
दृष्टं तु तन्त्रे त्रिविधं गुणाध्यम्।
सामं[1] समं[2] सम्मकरं[3] विशुद्धम्,
नमोऽस्तु तस्मै चरणाय भक्या ।।५।।

सामं तु माधुर्यप्रभावयुक्तम्,
यद् शर्करास्वादो समानमुक्तम्।
मैत्री तथा स्यात् मृदुता करुणा,
नमोऽस्तु तस्मै चरणाय भक्त्या ॥६॥

क्षमायुतं हिंस्यविकारमुक्तम्,
आद्यं तु साम[१] प्रगुणं ददाति।
भवेत् सदा जीवगणेषु मैत्री,
नमोऽस्तु तस्मै चरणाय भक्त्या ॥७॥

सम[२]ं द्वितीयं प्रतिपादितं यत्,
मानेऽपमाने च सुखे च दुःखे।
सर्वत्र माध्यस्य स्वभावलीनम्,
नमोऽस्तु तस्मै चरणाय भक्त्या ॥८॥

शास्त्रार्थवाक्षु परिशीलनं यत्,
संयोगवियोगविकारमुक्तम्।
साम्याद् हतं दुष्टविभाववीर्यम्
नमोऽस्तु तस्मै चरणाय भक्त्या ॥९॥

सशर्कराखीरसमं प्रकृष्टम्
ज्ञानादिरत्नत्रयपूर्णपात्रम्।
सामायिकं सम्म[३]करं तृतीयम्,
नमोऽस्तु तस्मै चरणाय भक्त्या ॥१०॥

पुनश्चतुर्धा कथितं तदत्र,
सम्यक्त्व[१] सामायिकमाद्यमुक्तम्।
श्रुतं[२] च[३] देशं चरमं[४] तु सर्वम्,
नमोऽस्तु तस्मै चरणाय भक्त्या ॥११॥

अष्टौ पुनः सार्थकनामभेदाः,
शास्त्रे कथाभिः सह सुप्रयुक्ताः
सामायिकं स्यात् सुरसालसारम्,
नमोऽस्तु तस्मै चरणाय भक्त्या ॥१२॥

आद्यं श्रुतोक्तं ''समभाव[१]'' नाम,
''सम[२]'' ''यिकेनैव'' युतं सुनाम।
ततश्च भव्यःसुदयार्द्रपूतः,
निरागवाक्स्यात्, ''समवाद''नाम्ना ॥१३॥

''समास[४]'' नाम्ना शुभतत्वसारम्,
''संक्षेप[५]'' शास्त्रार्थविचार पारात्।
पापारिमुक्ताद् ''ह्यनवद्य[६]चारम्'',
नमोऽस्तु तस्मै चरणाय भक्त्या ॥१४॥

सज्ज्ञानलाभाच्च भवेत् ''परिज्ञा[७]'',
''त्याग[८]:'' पदार्थस्य विरागहेनुः
नाम्नाऽपि सामायिकमस्ति शुद्धम्,
नमोऽस्तु तस्मै चरणाय भक्त्या ॥१५॥

दृष्टान्तमाद्ये दमदन्त[१] साधुः,
मेतारज[२]ः साधुवरो द्वितीये।
श्री कालिक[३]ः सूरिवरस्तृतीये,
नमोऽस्तु तस्मै चरणाय भक्त्या ॥१६॥

पुनश्चिलाती[४] शुभपण्डिता[५]श्च,
षष्ठे पुनो धर्मरूचि[६] र्विशिष्टः।
ईलाकुमार[७]ः किल तेतली[८] स्यात्,
नमोऽस्तु तस्मै चरणाय भक्त्या ॥१७॥

योगत्रयेणात्मविशुद्धभावम्,
सामायिकं शुद्धफलान्वितं स्यात्।
सुदुष्टयोगस्तु भवाब्धिहेतुः,
नमोऽस्तु तस्मै चरणाय भक्त्या ।।१८।।

क्रौधादिदुर्भावनया प्रमुक्तम्,
शान्तेन दान्तेन सदा प्रयुक्तम्।
अध्यवसायेन विशुद्धधर्मम्,
नमोऽस्तु तस्मै चरणाय भक्त्या ।।१९।।

छेदो द्वितीयं चरणमनोज्ञम्,
महाव्रतारोपणयोगयुक्तम्।
पर्यायछेदाच्च भवेत् स छेदः,
नमोऽस्तु तस्मै चरणाय भक्त्या ।।२०।।

इमे चरित्रे च भवेत् सदैव,
षष्ठे तथा सप्तमके गुणस्थे।
चिद्ज्ञानरूपे रमणं स्वभावे,
नमोऽस्तु तस्मै चरणाय भक्त्या ।।२१।।

सद्भक्तियुक्तैर्नवसाधुभिस्तद्,
चरेत् तृतीयंपरिहारशुद्धम्।
नित्यं विशुद्धोत्तरकालिकं यद्,
नमोऽस्तु तस्मै चरणाय भक्त्या ।।२२।।

सत् साधुवृन्दैस्तपसा समेतम्,
ज्ञान-क्रिया-व्यापृतभावपूतम्।
अष्टादशै र्मासवरैः सुशुद्धम्,
नमोऽस्तु तस्मै चरणाय भक्त्या ।।२३।।

पश्चाद् भवेत् स्वात्मबलं च तस्य,
तदा तु कुर्याज्जिनकल्पभावम्।
नो चेत् तदा गच्छप्रवेशमेति,
नमोऽस्तु तस्मै चरणाय भक्त्या ।।२४।।

सूक्ष्मीकृतो दुष्टभवाब्धिमूलो,
सुक्ष्मे गुणस्थे दशमे च लोभम्।
तस्य क्षयाद् स्याद् गतरागभावः,
नमोऽस्तु तस्मै चरणाय भक्त्या ।।२५।।

यथोदितं यच्चरणं जिनेन्द्रैः,
तथैवतद् साधयति व्रतेन्द्रः।
अनघं यथाख्यातगुणं तथोक्तम्,
नमोऽस्तु तस्मै चरणाय भक्त्या ।।२६।।

(शिखरिणी)
मया दृब्धा भेदाश्चरणविषये शुद्धगुणदाः,
न भो ! रागो द्वेषोश्चरणविभवात्, पीडयति यः।
स्मृतेर्मात्रात् कुर्यात्, सुगुणचरणं दोषहननम्,
ततो याचे ''श्रेयः'' परमपददं ''दर्शन'' गुणम् ।।२७।।

सत्यवार्तायां यः कदापि विकल्पं न करोति।
सत्यवार्तां च यः सहजतया स्वीकरोति–स प्राज्ञः।

पञ्च महाव्रतभावना–चरणकरणसत्तरि समन्विता

# पञ्चदशमी श्रीचारित्रसप्तविंशितिका

(शार्दूलविक्रिडीतम्)

**माङ्गल्यम् :-**

ऐन्द्रश्रेणि विबुद्धवृन्दमहितः, स्याद्वादसिद्धाञ्जनः,
पादाम्भोजरजः, पवित्रसुजनः, श्रीपार्श्वनाथः प्रभुः।
पापोत्ताप महाष्मपांशुपवनः, सज्ज्ञानशैत्यप्रदः,
विघ्नव्रातकुमाररोगहरणो भूयात् सदर्थाय वः ।।१।।

**महाव्रतस्तवनम् :- (स्रग्धरा)**

सर्वज्ञोक्तात्मकृत्य विनयगुणपरं, शुद्धसद्भावरूपम्,
क्षान्तिमुख्यार्थमूलं वसुमणिनिकरे, स्यात्प्रमुक्तिप्रदायम्।
भिक्षाचर्यादिवृत्यागतरसरसनं, ब्रह्मवृत्या सुगुप्तम्,
चारित्रं भावशुद्धं, सुमुनिवरगणा धारयन्त्येकमेव ।।२।।

संसाराम्भोधिकूलं शिवनगररथं नष्टदोषारिवृन्दम्,
सद्भावैर्वर्धमानं, शुभततिनिलयं, कर्मदावानलाम्भः।
श्रेयःसत्पुण्यपृथ्वी गुणसुरभिमयं, मोक्षमार्गावतारम्,
आद्यं प्राणातिपाताद् सुविरमणव्रतं, स्यात् सदा सौख्यधाम।।३।।

**महाव्रतकीर्तनम्:-**

चारित्रं मेरुसारं सुनृते नियमतो, दोषभारैर्विमुक्तम्,
हिंसात्यागी विरागी न च वदति कदाऽवर्णपूर्वंहय्सत्यम्।
नैव स्तैन्यं विधत्ते, प्रबलभयभृतं, दोषपोषेप्रधानम्,
सेव्यं श्री ब्रहमचर्यं विरतिरतिपतिं, तत्ववैराग्यसारम् ।।४।।

द्रव्यादौ मामकत्वं त्यजति यतिवरः, यत्कृते वैरभावः,
रात्रौ भुङ्क्ते न जैनो, व्रतततिसहितः, स्वात्मसंवित्तिवृत्तिः।
शुभ्राचारैः सुसूत्रैर्ग्रथितगुणमणिं, हारमाधाय साधुः,
सर्वस्वत्यागयुग् यो, व्रतगुणकलितः, भावतोऽहं स्तुवे तम् ।।५।।

**परिणतिस्तवनम् :-**

श्रेयः सौख्येकमाता यतिषु परिणतीः, राजते जैनधर्मे,
या श्री सज्ज्ञानदीपादपहरतिमनो–तामसं दोषपोषम्।
मैत्रीपीयूषपुष्टाकुमतिबलहरी, सन्मनीषाऽर्चिताऽऽज्ञा,
जैनी श्रद्धाम्बुधारा चरणमलहरी, नष्टसंसारचारा ।।६।।

**प्रथमं श्री प्राणातिपातविरमणमहाव्रतम्:-**

सार्वाःशुष्काऽघपङ्काः सुविहितमहितां, वाचमेवं प्रचख्युः,
श्रद्धापूतैः सुयोगैः शिवपदफलदैः, शुद्धभावै र्मुनीभिः।
सम्यग्चारित्रचर्या सुचतुरच[१]रणैः, प्राणिपातप्रमुक्तैः,
रक्ष्याः सत्वाःस्तु सर्वे, शुभचरणधनैः, स्वात्मबुद्ध्या सुधीभिः।।७।।

मा हिंस्याज्जीवमात्रं, मनसि न विचलेत्, जीवरक्षादिभावात्,
द्रव्यक्षेत्रादिभावान्, निपुणमतितया, भावयेदात्मसौख्ये।
द्रव्यात् षट्जीवराशीं हननविषयतः, क्षेत्रतः सर्वलोके,
कालात् सर्वत्र साधुश्चरणसुखमयो, भावतो रागमुक्तः ।।८।। (अर्थयुग्मम्)

**द्वितीयं श्री मृषावादविरमणमहाव्रतम्:-**

सेवे सद्भावयुक्त्याऽखिलजिनमहितं, सद्व्रतं सत्यवाचम्,
कोधाद्हास्याच्चलोभाद्, विविधभयवशान्नो मृषांशोऽपिब्रूयात्।
वाक्सत्यः येन प्राप्तं विबुधमणिसमं सर्ववाञ्छाप्रदातृ,
विश्वे विश्वे कृतार्थः स व्रतरतियुतः, पुण्यधन्यो महात्मा ।।९।।

द्रव्यंश्रित्वा वदेन्नो सकृदपिवचनं, जैनवाचो विरुद्धम्,
क्षेत्राल्लोकेऽप्यलोके जिनवचनरतो, नैव ब्रूयादसत्यम्।
सम्यक्काले तु क्वापि, प्रशमरसरतः सत्यमेवोच्चरेत् सः,
नीरागो भावसत्यः शुचिमधुरवचो, देववन्द्योस्तु सत्यात् ।।१०।। (अर्थयुग्मम्)

---

१) –सुचतुरचरणैः = सु, उपयोगवत्तया श्रेष्ठं चतुरं निपुणं प्रेक्षणप्रभार्जितपथं–
चरणं–गमनं येषां ते – सुचतुरचरणैः। ईर्यापथिकीयुक्ताः तैः सुचतुरचरणैः।

**तृतीयं श्री अदत्तादानविरमणमहाव्रतम्:-**

मन्वानः स्वर्णमुख्यं तृणमिवः सकलं, नह्यदत्तं समीच्छेत्,
चौर्यात् शङ्क्यः पुमान् स्यात्, परधनहरणं त्याज्यमेवात्मशुद्ध्या।
बध्यो वध्य स नित्यं, जननमरणभृत्, स्यादिहामुत्र चौर्यात्;
चौर्यं त्यक्तं विशुद्धै र्मुनिवरनिकरैः, श्रीजिनाज्ञानिबद्धैः ।।११।।

चौर्यं प्रोक्तं चतुर्धा, जिनवर सुगुरु स्वामिजीवाभिधंतत्,
सर्व द्रव्यं तथा नो हरति परधनं, क्षेत्रमात्रेऽपि सद्धीः।
स्वात्माऽऽशी नो पराऽऽशी, परहितनिरतो, निस्पृहः प्राज्ञबुद्धिः,
भव्य पूर्णस्वभावो व्रततरुफलितां मुक्तिमाप्नोति चान्ते ।।१२।। (अर्थयुग्मम्)

**चतुर्थंश्री मैथुनविरमणमहाव्रतम्:-**

लक्ष्मी स्वात्मानुभूति र्जलधिजलसमा, ब्रहमचर्यव्रतस्य,
स्यादाऽऽत्माब्रहमचर्ये, शिवपुरनिकटो निर्जयो निर्ममत्वः।
तिर्यङ्मर्त्यानराणां विषयविषसमा, कामकाङ्क्षा न यत्र,
स्वस्मिन् स्वस्थः सदैवाऽऽत्मरमणसुरतं, ब्रहमचर्यं प्रशस्यम्।।१३।।

तिर्यङ्मर्त्यामरैस्तद् बहुविधमिथुनं, दुःखदं सौख्यविघ्नम्,
मत्वा तत् त्याजयेद् यो, जिनवरवचनैः, आत्मनिष्ठः सुसाधुः।
वन्दन्ते देववृन्दाः स्व-परहितकरं, यद् हरेद् विघ्नजालम्,
सेवेऽहं सद्व्रतं तद् भवजलतरणे, यानपात्रं द्रढीयः ।।१४।। (अर्थयुग्मम्)

**पञ्चमं श्रीपरिग्रहविरमणमहाव्रतम्:-**

मूर्च्छामात्राद् विमुक्तिः, स्वजनधनगतात्, पञ्चमं सद्व्रतं तत्,
आकाशे ये ग्रहास्ते, खलु जनमखिलं, पीडयन्त्येव नैव।
सत्वानां स्वात्मसौख्यं, सपदिविघटते, कुग्रहोऽयं विशिष्टः
श्रेयस्त्यागोऽस्य तस्मात्, प्रसरतु मनसि, त्यागधर्मो जिनोक्तः।।१५।।

**षष्ठं श्रीरात्रिभोजनविरमणव्रतम्:-**

षष्ठं वच्मि व्रतं यन्निजपरसमये, रात्रिभक्तं निषिद्धम्,
जीवौघस्तत्रनश्येज्जिनवचनमपि, निश्चितं स्पष्टमेतत्।
द्रव्ये क्षेत्रे च काले प्रथितमवितथा, श्री जिनेन्द्रस्य वाणी,
नक्तं भक्तं तु हेयं, प्रबलदुरितकृत् प्राणभीतिः पराऽत्र ।।१६।।

**महाव्रतपालनफलम्:-**

नित्यं माङ्गल्यमाला सुमतिरविकला, जैनवाक् सत्फला स्यात्,
नश्येत् पापस्य शाला, विततगुणबलं, शुद्धिरिन्दूज्वला स्यात्।
भाग्याङ्कूराब्दमाला, जनितसुखकला, शान्तरोषाऽऽकला स्यात्,
मोहारातौ कराला, ऽऽत्मकमलकमला, सौख्यमुक्तिकला स्यात् ।।१७।।

उद्युक्तः पालने यो जिनकथितमहासंयमे साधुवर्यः,
श्रेयोधुर्यव्रतेषु प्रथयति हितदं, संयमं मुक्तिमुख्यम्।
कर्माऽऽलानाद् विमुक्त-प्रवरयतिगजो, मुक्तिमेति द्रुतं स,
जैनेन्द्राऽध्वातिपूतो, विनयति विपदं, विश्ववात्सल्यपूञ्जः।।१८।। (अर्थयुग्मम्)

**पञ्चमहाव्रतस्य पञ्चविंशतिभावनास्वरुपम्:-**

**तत्र प्रथममहाव्रतभावना:-**

साधूनां तद्व्रतानां, सितरुचिचरणां, भावना वच्मिभावात्,
ईर्याद्याः शास्त्रप्रोक्ताः, सविधिगतिमया, भक्त-पाने द्वितीया।
आदानाद्ये समितः, शमरसजलधिः, सन्मनःकाययोगात्,
साधुर्यो भावयेत् तां, प्रथमशुभयमं, प्राप्नुयात् तत्फलं स।।१९।।

**द्वितीया-तृतीया-चतुर्थ महाव्रतभावना:-**

हास्याद्ब्रयात्मृषा नो, प्रवरशुभमनाः सद्विचार्यैव जल्पेत्,
क्रोधाल्लोभाद् भयाद्वाऽवितथ वचनात्, भावयेत् सत्यभावम्।
इन्द्राद्यावग्रहाप्ते, र्वसतिमधिवसेद्, वस्तु याच्यं तथैव,
मर्यादावान् स साधु, र्गुरुवरवचना-दाहरेच्चापि भिक्षाम् ।।२०।।

साधुः साधर्मिकोऽन्यो, विनयसुमतिनाऽवग्रहस्तस्य देयः,
भोज्यं गुप्तं च कुर्यान्नलवमपि तनोर्मण्डनं स्त्रीषुनेक्षा।
स्त्रीणां क्षेत्राऽऽशनायात्, परिचितिरहितात्, त्यागतः स्त्री कथानाम्,
भाव्या तुर्ये व्रते भो ! भवजलधितरी, भावना भव्यभावैः।।२१।। (अर्थयुग्मम्)

**पञ्चममहाव्रतभावना:-**

पञ्चानामिन्द्रियाणां विषसमविषये, भावना भावनीया,
शब्दंरुपंरसं चाशुभशुभसुगुणे, स्पर्शग्रन्धौ तु लब्ध्वा।
शुद्धै र्भव्यैः, प्रभावै र्यतिगुणखचितैः, पञ्चमे सद्व्रतेऽस्मिन्,
पञ्चाग्रा विंशतिः स्यादधमलहरणा भावनास्तु व्रतानाम् ।।२२।।

## कान्दर्प्यादिपञ्चाशुभभावनावर्णनम्:-

मालीन्या दुःस्वभावाऽशुभफलदपरा, भावना नैव भाव्याः,
कान्दर्पी[१] कैल्विषी[२] या, जिनपतिसमये, त्वाभियोगी[३] तृतीया।
तृर्या दुष्टासुरी[४] वै, भवभयजननी, स्याच्च संमोहनी[५] सा,
पञ्चैताः वारणीयाः, श्रमणगुणधनैः, र्दुष्टभावाब्धिपूर्णाः ।।२३।।

## करणसप्ततिवर्णनम्:-

धर्मः[१०], पञ्चव्रतानि[५] प्रवरगुणधरः, संयमो[१७] ब्रह्मगुप्तिः[९],
वेयावृत्यं[१०] मुनीनां परिणतिदधतं, ज्ञानपूर्णं[३] तपश्च[१२]।
काषायै[४] र्विप्रमुक्तिः, शुभतरचरणे, सप्ततिर्मूलतो या,
मूलं मुक्ते र्लताया इव शुरभिगुणाः, प्राप्नुयां तान् सदैव।।२४।।

## चरणसप्ततिवर्णनम्:-

पिण्डे[४] शुद्धिश्चतुर्धा, समितिशरगुणाः[५], भावना सूर्यसङ्ख्या[१२]
पञ्चाक्षार्थाद्[५] विमुक्तिः, मुनिगुणशुभगा, प्रत्युपेक्षा[२५] सुखाढ्या।
गुप्तिः[३] योगे विदध्यात्, जिनवचनयुताः, सद्यमाः सद्यतीनाम्,
द्रव्याद्याभिग्रहै[४] र्या; रचयतिकरणं, सप्ततिं सद्व्रतानाम्।।२५।।

## समितिपञ्चवर्णनम्:-

साम्यो गुप्तः सुसाधुः, समितिगुणपरो, रञ्जयेदाऽऽत्मनं सः,
ईर्या[१]भाषै[२]षणा[३] या, सकल गुणखनिः, स्यात्तथाऽऽदानरुपा[४]।
पारिष्ठाप्या[५] विधेया, विधिवचनयुता, शुद्धभावप्रयुक्ता,
प्रञ्चैता भव्यजीवान्, गुणनिकरभरा स्तारयन्ति सदैव ।।२६।।

(शिखरिणी)

मया सच्चारित्रं विविधविषयं वर्णितमथ,
स्तुतैश्चारित्रस्य नवनवगुणैः शुद्धि सरसैः।
चिदानन्दंवर्यं मम प्रभवतात् शाश्वतसुखम्,
तत ''स्श्रेयो''स्यान्मे, परमफलदं ''दर्शन''भवम्।।२७।।

---

१) शर = पञ्च २) सूर्य = द्वादश

# बुद्धिः

– श्रीकमलः

बुध्यतेऽनयेति। = बुद्धिः, सा बुद्धिः सविपक्षा चतुर्विधा
तत्र प्रथमा – सद्बुद्धिः, दुर्बुद्धिः।
द्वितीया – परिपक्वबुद्धिः, अपरिपक्वबुद्धिः।
तृतीया – सन्मार्गगामिबुद्धिः उन्मार्गगामिबुद्धिः।
चतुर्था तावत् – स्वभावपराबुद्धिः, विभावपराबुद्धिः।
इत्येवं प्रकारेण बुद्धेश्चातुर्विध्यम्। अधुना किञ्चिद्विचार्यते तद्विषये–

## • सद्बुद्धि-दुर्बुद्धिः।

यत्र सद्विचारः प्रजायते सा सद्बुध्द्धिः। यत्र दुर्विचारः प्रजायते सा दुर्बुद्धिः। सदसत्कार्ये सद्विचारः सा सद्बुद्धिः, पुनश्च सदसत् कार्ये दुर्विचारः सा दुर्बुद्धिः। तत्र धर्मानुष्ठानं यदा यथाविधि क्रियते, तत् सद्बुद्धेः सामर्थ्यम्, यदा तु धर्मस्थाने एवाऽसत्य–चौर्य–मैथुन–परिग्रहादि पापसेवनं क्रियते, तदा सा दुर्बुद्धिः, इति मन्यते।

## • परिपक्वबुद्धिः, अपरिपक्वबुद्धिः।

परिपक्वबुद्धिः चिरकालानुभवेन प्रादुर्भवति। पुनश्च तस्मिन् तस्मिन् कार्ये निरनुभवा बुद्धिः सा अपरिपक्वा बुद्धिः। यथा चिरकालकृत् वाणिज्येन वणिकस्य या बुद्धिः, सा परिपक्वबुद्धिः। अथवा स्त्रीणां या रसपाकनिर्माणे कार्य–दक्षता सा परिपक्वबुद्धिः। या तु निरनुभवा बुद्धिः सा अपरिपक्वेति।

• सन्मार्गबुद्धि, उन्मार्गबुद्धिः।

तत्र तु सन्मार्गगमनोद्यता धीः सा सन्मार्गबुद्धि, या तु उन्मार्गप्रस्थानप्रेषिका सा तु उन्मार्गबुद्धिः। सन्मार्गगामिनी बुद्धिः, सद्गतिं नयति। उन्मार्गगामिनी बुद्धिः दुर्गतिं नयति। अतः सदैव सन्मार्गबुद्धिप्रापणोद्यमः कार्यः।

• स्वभावपराबुद्धिः, विभावपराबुद्धिः।

स्वभावस्य=अध्यात्मभावस्यजननी आध्यात्मिकी स्वभावपरा बुद्धिः, आत्मनः-परःपौद्गलिको भावः-विभावः, तत्परा विभावपरा- विभावभावजननी बुद्धि वैभाविकी कथ्यते। तत्र आत्मनि शुद्ध-विशुद्धतराध्यवसायप्रापणैकप्रवणा या मतिः सा आध्यात्मिकी। यत्र स्वतः निरन्तरं स्वात्मदर्शनं, अर्थात् स्वात्मनि ये ये दोषाः तान् पश्यति। अथवा स्वस्वभावं प्रति दृष्टिः-भावः-अध्यवसायः सा आध्यात्मिकी बुद्धिः। यत्र पुनः विभावदशा-'रागो, द्वेषः, कलहः, स्वपरेति भावः, इदं मे शरीरं, इदं मे स्वं, इदं मे गृहं, अयम् मे पुत्र' इत्यादिकाः सर्वे भावाः विभावाः तत्र कारणभूता बुद्धिः सा वैभाविकी इत्येवं निर्णयं कृत्वाऽयोग्या त्याज्या। योग्या तु प्राप्या। इति तन्मार्गे प्रयत्नातिशयं कृत्वा स्वसद्बुद्धिप्रापणे उपायः मृग्यः।

।। इति शम्।।

यत् साधनं भवेत् तस्य त्यजनम्,
साधनास्याऽपेक्षायाः त्यजनम्
साधनं विना च जीवितुमिच्छा
तद् जीवनं 'जीवनम्'।

# श्री सरस्वतीस्तोत्रः

गुर्जर रचयिता : पू.आ.मुक्तिप्रभसू. म.सा.
अनुवादक : मुनि श्री ज्ञानभूषणविजयः

दृश्यन्ते देव देव्यस्तु, विश्वे विविधरूपतः।
सर्वमान्यस्वरूपेण, नैकापि दृश्यते मया।।१।।

सूरि भूप धनेशाश्च, तुभ्यं स्निह्यति सर्वदा।
सज्ज्ञानदात्रि ! मय्यज्ञे। प्रसीद हे सरस्वति ! ।। २।। (युग्मम्)

'ऐँ नम' इति मन्त्रस्तु, बीजमन्त्रः प्रकाश्यते।
'ॐ ह्रीँ क्लीँ ब्लीँ' 'तथैवाऽस्वरै' ह्रसकलैः' सदा ।।३।।

पुनः 'ह्रीँ ऐँ नम' इति, महामन्त्रश्च गण्यते।
सज्ज्ञानदात्रि ! मय्यज्ञे। प्रसीद हे सरस्वति ! ।।४।। (युग्मम्)

मातर् ! जयन्ति त्वन्नाम विश्वे नैके सरस्वति !
सन्मुखीभूय त्वन्नाम, भजेऽहमपि भावतः।।५।।

वर्धताम् ज्ञानलक्ष्मीर्मे, देवि ! देहि वरं सदा।
सज्ज्ञानदात्रि ! मय्यज्ञे। प्रसीद हे सरस्वति !।।६।। (युग्मम्)

कविहृद्वासिनि ! देवि ! काव्यशक्तिस्त्वमेव हि।
वक्तृत्वशक्तेर्दानाय, समर्थाऽसि त्वमेव हि ।।७।।

सूरिमन्त्राद्यपीठस्याऽधिष्ठायिका त्वमेव हि।
सज्ज्ञानदात्रि ! मय्यज्ञे प्रसीद हे सरस्वति! ।।८।। (युग्मम्)

हेमचन्द्र–हरिभद्र–मुनिसुन्दरसूरयः।
बप्पभट्टी वृद्धवादि यशोविजयवाचकाः।।९।।

त्वज्जापाद् रामचन्द्राश्च, सिद्धसारस्वताः खलु।
सज्ज्ञानदात्रि ! मय्यङ्गे प्रसीद हे सरस्वति! ।।१०।। (युग्मम्)

निर्ग्रन्था नैव मन्यन्त–आराध्या श्रीः कदाचन।
ध्यायन्त्याराध्यरूपेण, तेऽपि त्वां हृदि सर्वदा।।११।।

त्वां साधयन्ति सर्वेऽपि, मन्त्रजापैः प्रयत्नतः।
सज्ज्ञानदात्रि ! मय्यङ्गे प्रसीद हे सरस्वति! ।।१२।। (युग्मम्)

त्वत्करे रममाणां हि, पश्यामि जपमालिकाम्।
त्वत्करे स्थितशास्त्राणि, दृष्टवाऽऽप्नोमि मुदं सदा।।१३।।

वादयंति! करे वीणां गीयसे हंसवाहिनि !
सज्ज्ञानदात्रि ! मय्यङ्गे, प्रसीद हे सरस्वति ! ।।१४।। (युग्मम्)

निवासं कुरु जिह्वाग्रे, स्मरामि त्वां यदा तदा।
वाणीप्रवाहं मे वाणि ! वाहयाऽस्खलितं सदा।।१५।।

**मुक्त्यंशु**ज्ञानसज्ज्योति–र्मत्स्वान्ते त्वं प्रकाशय।
सज्ज्ञानदात्रि ! मय्यङ्गे, प्रसीद हे सरस्वति !।।१६।। (युग्मम्)

यत्र सम्यग्रीत्या मृत्योः सज्जता
तद् जीवनंसत्यतापूतम्।

# समर्पणसौन्दर्यम्।।

– मुनिश्री दर्शनरक्षितविजयः

* गुरोः प्रत्येकं वचनं मम परमतारकमस्ति, अहङ्कारस् तु प्रतिपदं मम,– महामारकोऽस्ति इति हृदयेऽङ्कितं भवेत्,– तर्हि गुरुसमर्पणं हस्तगतं भवेत्।

* यत्र इच्छाया अस्तित्वं न भवेत्, किन्तु गुर्वाज्ञाया,– एवाराधनं भवेत्, साम्राज्यं सम्भवेत्, – तत्र समर्पणसौन्दर्यं भवेत्।

* ममेच्छा, इति मोहाज्ञा, गुर्वाज्ञा इति जिनाज्ञा, या रोचते तां कुरु।

* यदा गुरुं प्रति समर्पणं त्रुट्यति, तदा गुर्वाज्ञा एव न खण्ड्यते,– परं गुरुं प्रति शिष्यस्यास्था खण्ड्यते।

* गुरुवाक्परतन्त्रः शिष्यो गुरोर्दूरप्रदेशस्थोऽपि, भावतो गुरुचरणयोः स्थितोऽस्ति। गुरुवाङ्निरपेक्षः शिष्यो गुरोः समीपस्थोऽपि लक्षयोजनदूरस्थितइवाऽस्ति।

* समर्पणकुक्षेः शिष्यत्वस्य प्रसवो जायते, स्वच्छन्दतास्मशाने शिष्यत्वस्यान्तिमसंस्कारो जायते।

* गुरुवचनम् + शिष्यकर्णौ = तहत्ति, तहत्ति + आज्ञापालनम् = गुरुहृदये शिष्यस्य स्थिरतरं स्थानम्।

* यत्र पराधीनता तत्र कर्मकरभावः, यत्र शरणागतता तत्र समर्पणभावः,

* पुष्पस्य मूल्यं सुगन्धेन भवति, शिष्यस्य मूल्यं समर्पणेन भवति।

* यथा गुरोः पुरतः शिष्यो भिक्षामालोचयेत्,
तथा गुरोः पुरतः स्वदोषानालोचयेत् – तर्हि समर्पणसौन्दर्यं भवेत्।

* गुरुपादौ = महदुडुपौ । तौ समालम्ब्य शिष्यो संसारसागरं तरति,
भवाऽकूपारपारंप्राप्नोति ।
गुरचरणे = महोपवने । तत्रोपविश्य शिष्यो गुणसुवासमनुभवति।

* स एव शिष्यः–शासितुमर्हः, यो गुरोः पुरतः स्वात्मदोषान् आविष्करोति
स एव गुरुः । यः शिष्यं तद्दोषानपहाय निर्दोषं कुरुते

* पुरुषस्य सौन्दर्यम् = सत्त्वम्, स्त्रियाः सौन्दर्यम् = शीलम्।
श्रमणस्य सौन्दर्यम् = श्रमणत्वम् क्षमा च, शिष्यस्य सौन्दर्यम् = समर्पणभावः

* गुरुदेवः मम नोपकारी, न महोपकारी, किन्तु परमोपकारी ।
यतः इह भवे य उपकरोति स उपकारी,
परभवे य उपकरोति स महोपकारी, भवे भवे य उपकरोति स परमोपकारी।

* एकत्र गुरुसेवा, एकत्र गुरुप्रसन्नता, द्वयोर्मध्ये सेवायास्तादृश आग्रहो न कर्तव्यः,
यया गुरोः प्रसन्नता खण्डिता भवेत्।

* गुरुभगवन्तो मयि सदा प्रसन्ना भवेयुः । – तादृशी शिष्यस्य प्रार्थना ।
गुरुभगवन्तो मम कारणेन कदापि अप्रसन्ना न भवेयुः – तादृशी शिष्यस्य मनःकामना।

* यथा गुरुदेवानां वात्सल्यं शिष्योऽहोभावेन स्वीकरोति, तथैव यदि –
गुरुदेवानां हितकृत्कटुवचनान्यपि द्विगुणाऽहोभोवन स्वीकरोति
स तर्हि गुणशिखरमारोहति।

* एकत्र गुर्वाज्ञा, एकत्र मोहाज्ञा। द्वयोर्मध्ये शिष्यस्य परीक्षा भवेत्।
यत्र मोहाज्ञा तत्र मोहान्धता, यत्र गुर्वाज्ञा तत्र गुरुसमर्पितता द्युतिः।

* स्वस्य तृणसदृशामिच्छां पूरयितुं गुरुदेवानामाज्ञारत्नं खण्डितुमिच्छा स्वप्नेऽपि न कुर्यात्।

* संसारसागरं तारयितुं द्वे यानपात्रे स्तः,-एकः प्रभुः, द्वितीयो गुरुः,
प्रभुः परमपूज्योऽस्ति-गुरुः परमश्रद्धेयोऽस्ति।
प्रभुः परमादरणीयोऽस्ति-गुरुः परमाचरणीयोऽस्ति।
प्रभुः परमस्मरणीयोऽस्ति-गुरुः परमसन्माननीयोऽस्ति।

* स्वात्मकल्याणं सद्गुरुसंप्राप्त्या न जायते, किन्तु गुर्वाज्ञाराधनेन जायते।

* यो गुर्वाज्ञां न मन्यते, स गुरुमेव न मन्यते।

* गुरु-पित्रोर्भेदः-पिता पुत्रस्य कदिच्छामपि पूरयति गुरुः शिष्यस्य स्वेच्छां चूरयति ।

* गुरुभ्यो द्वितयं देयम्-मनश्च मतिश्च, गुरुभ्य श्चादेयं द्वितयमिदं - भक्तिश्च मुक्तिश्च।

* शिष्यस्य पात्रतां मातुमनुग्रहकृपाया निग्रहकृपा बलवती वर्तते।

* गुरुभिरिदृशी आज्ञा कथं कृता? मह्यमेव कथं कृता? अन्यस्मै कथं न कृता?
इति चिन्तयतः शिष्यस्य जीवने गुर्वाज्ञा कदापि जीवन्ती=फलवती न भवेत्।

* शाश्वतमन्त्रः - परमेष्ठिनमस्कारमहामन्त्रः, सिद्धमन्त्रः - गुरुवचनम्,
सदा मन्त्रः - गुर्वाज्ञापालनम्।

* गुरोश्चरणाम्बुजं सेवितुमुद्यताः सर्वे शिष्या भवन्ति, गुरोर्वचनाम्बुजं सेवितुमुद्यताः
शिष्या विरला एव भवन्ति।

* यस्य वचनेन सर्वसंसारस्त्यक्तः। तस्य वचनं कदापि न त्यजनीयम्।

* समर्पणः सत्यङ्कारो नास्ति, किंतु अनपेक्षितः शरणागतभावोऽस्ति।

* प्रभु-चरणयोः समर्पयितुं श्रेष्ठफलम्-श्रीफलम्, गुरु-चरणयोः समर्पयितुं श्रेष्ठाङ्गम्-शिरः।

* समर्पणयज्ञवेदिकायां यदा मनोगतेच्छानामाहूतिर्दीयते तदा गुरुदेवता आराधिता भवेत्।

# बहुरत्नावसुन्धरा

- मुनिश्री दर्शनरक्षितविजयः

समाधि सौख्याच्च परं न सौख्यम् - सहस्रफणापार्श्वनाथेन विभूषितायां सूर्यपुरनगरसमीपवर्तिनवसारीनगर्यामेको जैनधर्मनिष्ठः परिवारो वसति। तस्मिन् परिवारे एको दारको जातः। यदा स दारको द्वादशवर्षायुः संजातस्तदा तद्देहे भीमो व्याधि रुत्पन्नः। बालस्य मुम्बापुर्यां टाटाकेन्सरचिकित्सालये चिकित्सा कृता, चिकित्सकैः कथितं अस्य वालस्य तृतीयकक्षायाः केन्सरव्याधिरस्ति। अतः बालोऽसौ चिरं न जीविष्यति।

पुत्रस्य व्याधिविद्धमनाः माता गुरुभगवतः समीपमागत्य स्वपुत्रस्य व्याधिवृतान्तो वर्णितः, विहिता च विज्ञप्तिः। मम पुत्रस्य कथमपि दुर्गति र्न भवेत् तादृशो मार्गो भवान् दर्शयतु। गुरुभगवता कथितं सर्वप्रथमं बाले दृष्टे सति भवत्या न रुदितव्यं, प्रतिदिनं बालस्य प्रभुपूजा, गुरुवंदना, धार्मिककथाश्रवणं च कारयित्वं क्षणमपि तस्य दुर्ध्यानं न भवेत्, यथा मनसि च व्याधिदुःखं न प्रविशेत् तथाकर्तव्यम्।

श्राविकया गृहं गत्वा स्वपतिदेवं प्रति कथितं, अद्यप्रभृत्यहं गृहकार्यात् भवत्कार्याच्च निवृत्ता भवामि। आवयोः पुत्रस्य समाधिदानार्थं संपूर्णं समयं दास्यामि। पतिदेवेन सहर्षमनुमतिर् दत्ता। एकस्मिन्नपवरके स बालो रक्षितः। अपवरकस्य परितो भित्त्यां शत्रुंजय-रैवताचलमहातीर्थ-शंखेश्वरपार्श्वप्रभूणां प्रतिकृतयस्स्थापिताः। अपवरकस्य बहिः सूचनापत्रकं लिखितम्। मम बालस्य सन्मुखं गत्वा रोदनं न कर्तव्यम्, यदि मद्बालं दृष्ट्वा कोऽपि रोदनं कुर्यात् तर्हि अंतो न प्रवेष्टव्यम्।'

प्रतिदिनं माता साधु-साध्वीः स्वगृहे निमन्त्रयति, बालस्य हस्ताभ्यां प्रतिलाभयति। पुण्यप्रकाशस्तवनं, पद्मावत्याराधना-ऽमृतवेलस्वाध्यायं समाधिप्रदस्तवनस्वाध्यायानि च श्रावयति। बालस्य कर्णयोः प्रतिदिनं द्विवारं त्रिवारं चतुर्वारं च कथयति, 'मरणमस्माकं परं मित्रमस्ति तर्हि मरणाद् न भेतव्यम्'। अस्माकं शरीरं प्रतिभवं म्रियते, आत्मा तु कदाचिदपि न म्रियते। यदा नो मृत्यु र्भवति तदा शरीरमिह तिष्ठति, आत्मा तु परलोके एकक एव गच्छति।

अस्माभिस्सह अस्मत्कृतानि शुभाशुभकर्माण्येवायान्ति अतस्त्वं सर्वदात्मचिन्तां कुरुष्व, ईदृशानि समाधिप्रदानि वाक्यनि श्रुत्वा स बाल ईदक्विधेऽव्याधावपिप्रसन्नमानसोऽभवत्।

यदा तस्य बालस्य जीवनस्यांतिमदिनोऽभवत् तदा तन्मात्रा प्रभुदर्शनं गुरुवंदनं च कारितम्। बालस्य व्याधिवेदना शनैः शनै वर्धिता। मात्रा समाधिप्रदानि वाक्यानि पुनः पुनः संबोधितानि, हे वत्स ! इदं शरीरमात्मना भिन्नमस्ति प्रतिभवमस्माभिरनेकशः शरीराणि गृहीतानि त्यक्तानि च

सन्ति। शरीरस्य लेशमात्रमपि रागो न कर्तव्यः। पुरातनगृहं त्यक्त्वा नूतनगृहे वसनाय भवतः समयः संजातः अतस्त्वं सावधानीभूय तिष्ठतु। जीवनस्यांतिमसमयः जीवनपरीक्षासमयोऽस्ति, यस्यान्तिमसमये समाधिर्भवेत् तस्य परलोकस्सुचारु र्भवेत्।

यदान्तिमक्षणः संजातः तदा मात्रा धृतिमवलम्ब्य बालस्य द्वौ हस्तौ स्वहस्तेन योजयित्वा शंखेश्वरपार्श्वप्रभोर्दर्शनं कारयित्वा नमस्कार महामंत्रस्य स्मरणं कारितम्। स बालोऽपि 'नमोऽरिहंताणं'इति पदमुदित्वा देहमत्यजत् तत्पश्चात् मात्रा धृतिं त्यक्त्वा बहुवारं रुदितं, स्वहृदयञ्च शोकरिक्तीकृतम्, स्वपुत्रस्य समाधिदानस्यानन्दोऽनुभूतः।

या माता स्वबालस्य देहचिन्तां त्यक्त्वात्मचिन्तां करोति सा माता धन्यातिधन्या भवेत्।

इदं प्रसंगं पठित्वा मे मुखात् शब्दो निर्गतः **"अहो बहुरत्ना वसुन्धरा"**

## कृपा फलवती तव

– मुनिश्री दर्शनरक्षितविजयः

हे प्रभो ! अहं दुःषमकाले जातः, यत्र सदाचारस्य नामाऽपि न श्रूयते, परितो भ्रष्टाचारी जनो दृश्यते। कोऽपि जनो विश्वासपात्रो न भवति। माताऽपि स्वोदरे स्थितं स्वदारकं हन्ति, पिताऽपि धनार्थं स्वपालितं पुत्रं गृहाद् निष्कासयति, सोदरभ्राताऽपि धनभागार्थं गलं मोटयित्वा भ्रातरं मारयति नाऽत्र कोऽपि कस्यापि त्राता भवति।

रागद्वेषरहितस्तीर्थंकरोऽधुना न विहरति, तथाविधो विशुद्धधर्मदेशको विशिष्टज्ञानी गुरुवरो न मिलति। शास्त्राण्यपि सर्वांगसंपूर्णानि नोपलभ्यन्ते। जनः प्रायेण प्रमादबहुलो जातः। धर्मोऽद्य प्रचारेण पीनो जातः, आचारेण च हीनो जातः। प्रायेण सर्वजनः सुखशीलस्वभावो जातः। प्रतिदिनं सुखं प्राप्तुं प्रयतते "टी.वी. रेफ्रिजेटर टेपादि" सुखसाधनानि सर्वै गृहे स्थापितानि। वस्त्र–पात्र–भोजन–पानादिषु सर्वं परिवर्त्तितम् हे प्रभो! अहं तवाग्रे दुःखेन पूत्करोमि त्रायस्व मां, त्रायस्व मां, किं करोम्यहं, किमहं झम्पापातं करोमि? – किमहं कूपे पतामि? – किमहं ज्वलनकुण्डे प्रविशामि?

कस्याग्रे मम मानसव्यथा प्रकटीकरोमि। कोऽस्ति मम तारकः। कस्य च शरणं स्वीकरोमि? त्वं मां मार्गं दर्शय, इति व्यथितहृदयोऽहं यदा जातः, तदैव भाग्यवशात् कलिकालसर्वज्ञ–श्रीहेमचंद्रसूरीश्वरैः कुमारपालभूपालकृते विरचितस्य वीतरागस्तोत्रग्रन्थस्य नवमप्रकाशस्य द्वितीया गाथा पठने आगता। हृदये चाद्भूता चेतना प्रादुर्भूता जीवितुं स्पृहा संजाता। एकया गाथया एव मे सर्वा व्यथा नष्टा। सा च गाथेयम्–

"सुषमातो दुःषमायां, कृपा फलवती तव।
मेरुतो मरुभूमौ हि, श्लाघ्या कल्पतरोःस्थितिः॥"

सुषमकालतो दुःषमकाले तव कृपा फलवती भवेत्। परमात्मनः करुणा सर्वजीवेषु समानतया वर्षति किन्तु प्रभोः कृपा तु यः शरणे आगतोऽस्ति तस्योपर्येव संपूर्णतया समा पतति, यस्य च प्रभुं प्रति मामकीनो भावोऽस्ति, तस्योपरि संपूर्णतया पतति वर्तमानकाले यदि कोऽपि जनः कमपि जनं पश्नः पृच्छेत्

देहः कस्य ? – गृहं कस्य ? – धनं कस्य ?।

सर्वेषां पश्नानामेकमेवोत्तरो भवेत्– 'मम'।

अपरः प्रश्नः पृच्छेत् –

जिनालयं कस्य ? – भगवान् कस्य ? – उपाश्रयः कस्य ?।

सर्वेषां प्रश्नानामेकमेवोत्तरो भवेत् – **'सङ्घस्य'।**

द्वयोः प्रश्नयोरुत्तरेण ज्ञायते प्रभुं प्रति कस्य कियान् मामकीनो भावोऽस्ति। यावत् प्रभुं प्रति मामकीनो भावो न जायते तावत् प्रभोः कृपा न प्राप्यते। एकः प्रज्ञाचक्षुः स्वेष्टदेवस्य दर्शनार्थं गतवान्। तदा मन्दिरे दर्शनार्थं परिपाट्यां स्थितं तं दृष्ट्वा भक्तजना वदन्ति हे अन्ध! त्वञ्चक्षुषान्धोऽसि तर्हि प्रभुदर्शनार्थं परिपाट्यां कथं स्थितोऽस्ति, सोऽन्धो वदति, अहमक्षिभ्यां प्रभुं न पश्यामि किन्तु प्रभोः कृपादृष्टिः यदि ममोपरि पतेत् तर्ह्यहं पवित्रो भविष्यामि, यथा लौकिकेऽप्युक्तम्। गङ्गाया दर्शनेनात्मा पवित्रो न भवति, किन्तु गङ्गाजलस्पर्शनेनात्मा पवित्री– भवति, तथैव प्रभुदर्शनेनात्मा पवित्रो न भवति किंतु प्रभुकृपयात्मा पवित्रीभवति।

यथा–कोऽपि रोगी चिकित्सकस्य समीपे देहचिकित्सां कर्तुं गच्छति चिकित्सकस्तद्देहस्य सुष्ठुरीत्या चिकित्सां कृत्वौषधं ददाति। रोगी यथासमयं यथामात्रं, यथापथ्यञ्चौषधं गृह्णाति। दशदिनान्तरं रोगी निरोगो जायते। तर्ह्यस्मिन् विषये कस्य महत्त्वं, रोगिणः,औषधस्य, चिकित्सकस्य वा?। चिकित्सकस्य, यदि चिकित्सको न भवेत् तह्यौर्षधं को दद्यात्, औषधं विना रोगो नापगच्छति तर्हि जनो निरोगी न भवेत्।

तथैव प्रभुकृपास्माकमुपरि न पतेत् तर्हि सम्यग्धर्मौषधं को दद्यात्, सम्यग्धर्मं विना भवरोगो नापगच्छति, भवरोगात् तु जीवो भ्रमणदुःखमनुभवति।

अतः सर्वकार्येषु प्रभुकृपा फलवती भवेत्।

यस्य आवश्यकतातोऽधिकं प्राप्तुं इच्छा न भवति।
अथवा आवश्यकताधिक प्राप्तिप्रयासः
पापमस्ति–इति यः जानाति–सः सज्जनः।

# कार्यसिद्धिः

– मुनिश्रीप्रशमरक्षितविजयः

कोऽपि जनो यदि कार्यसिद्धिसमेच्छुस्तर्हि, तस्मिन् कार्ये प्रयत्नप्रकारत्रितयात्यावश्यकं मन्यते १सातत्यप्रयत्नः ; २ चिरकालप्रयत्नः ; ३ सादरप्रयत्नः

वर्तमाने जगति केषांचिज्जनानां जीवनेऽदृष्टपूर्वा काऽपि कार्यसिद्धिर्दृश्यते, तस्यामेतत् प्रयत्नत्रयं कारणभूतम्।

कार्यसिद्ध्यर्थिनि तस्मिन् जने स्वेष्टकार्यस्य सिद्धये ध्रुवं क्रियाशीलता भवति। यत्र परिश्रमस्य निरन्तरता भवेत्, स एव सातत्यप्रयत्न कथ्यते। यत्र कार्यसिद्धिं दृश्यते, तत्र सातत्यप्रयत्नः प्रायो निबन्धनं भवति।

प्रधानतरं लक्ष्यं यदा भवेत्, तदा सातत्यप्रयत्नोऽवश्यमेव भवत्येव, प्रधानतरलक्ष्यसम्बन्धनार्थं तस्मिन्नेव विषये भूयोभूयश्चिन्तनं, तदर्थमेव योजनाकरणं, सर्वत्र सर्वदा च लक्ष्ये ऽवधानं, तर्हि खलु सातत्यप्रयत्नो भवेत्।

ग्रीनीशेत्यभिधानेन जगत्प्रसिद्धे पुस्तके लिखितमेतत्–धावनक्रिया–व्यायाम–गर्त्तोल्लङ्घन–शिलोत्पाटन–भारोद्वहन–शस्त्रकला–शास्त्रनिपुणतादिकार्याणां सिद्धिस् तत्तत्साधकेषु सातत्यप्रयत्नेन दृश्या भवति।

सातत्यप्रयत्नस्याऽभावेऽश्वो वेगेन गन्तुं न शक्नोति, सैनिकः कुशलतया योदधुं न समर्थयते, महिष्या भारोऽपि नोह्यते, भारवाहकः जनोऽपि भण्डोपकरणादिसामग्रीं वोढुं नालंभविष्णुः।

अतः सातत्यप्रयत्नो ह्यत्यावश्यकः। अस्मिन् विषये दृष्टान्तः–

१) एकस्मिन्नगरे न्यायनिपुणमतिमान् राजा बभूव। तस्य शीलालङ्कारविभूषिता राज्ञीआसीत्। सा स्वशक्तिपरिमाणार्थं स्वमत्यैकमुपायं विचारितवती। प्रतिदिनं सा महिषीबालं स्वस्कन्धे समारोप्य बाल्यकालत एव सौधस्य सोपानं चारोहत्यवरोहति स्म।

केनचिज्जनेन प्रोक्तो राजा, भवतां मान्या राज्ञी महिषीभारं वोढुं शक्तिमत्यस्ति, तत् श्रुत्वा राजा न प्रत्येति यदा, तदा जनेन प्रोक्तं...राजन्! आदिश्यतां राज्ञी, नूनं प्रत्ययो भविष्यति।

अन्यदा सभासदसि स्थितेन राज्ञा परीक्षणार्थं सा कथिता, त्वं स्वस्कन्धं समारोप्य महिषीमानय, तदनन्तरं तया सातत्यप्रयत्नत्वात् स्वल्पप्रयत्नेनैव स्कन्धं समारोप्य महिष्यानीता, तद् दृष्टवा राजा प्रसन्नोऽभवत्, तेन पृष्टया तया सातत्यप्रयत्नस्य सिद्धिः कथिता।

अतः सातत्यप्रयत्नः सकलजनेन कार्यसिद्धिपर्यन्तमादरणीयः। न च केवलं कार्यसिद्ध्यर्थं सातत्यप्रयत्न एव कारणं, परंतु चिरकालिनोऽपि प्रयत्नः कारणम्। यत् कार्यार्थं चिरकालं प्रयतते, तत् सिद्धिफलदं भवति। यत्र चिरकालं न प्रयतते, तत्र कार्यं सिद्धिफलदं न भवति।

२) यथा च भयङ्कररोगाक्रान्तो जनः रोगापनयनायचिकित्सार्थं वैद्यस्य समीपे गच्छति। कुशलमतिना वैद्येनोपदिष्टोऽपि सातत्यप्रयत्नेन चिरकालप्रयत्नेन च यदि सदौषद्यं न प्रयुज्यते, आस्तां रोगनाशः, प्रत्युत वृद्धिभावं गच्छति। ततः सातत्य-चिरकालिनप्रयत्नाभ्यां गृहीतमौषधं गुणकरं भवति। तथैव ताभ्यां कृतं कर्म निश्चितं फलदं भवति। अतः कार्यसिद्धौ द्वावपि कारणं, न चैकम्।

३) एतौ द्वौ सन्तावपि यदि कार्यसिद्ध्यर्थिनि सादरप्रयत्नो न भवेत्, तदापि न भवति कार्यसिद्धिः सादरप्रयत्नो नाम निःशङ्कता च श्रद्धायुक्तता चैकाग्रता च। विद्यासिद्ध्यर्थं सातत्य-चिरकालिनप्रयत्नाभ्यां सार्धं सादरप्रयत्नोऽपि कारणम्। न सादरप्रयत्नो यत्र, तत्र प्रायो न काऽपि सिद्धिः। मन्त्रविद्यासिद्धिसाधनं सादरप्रयत्नं विना न फलितं भवति। सादरप्रयत्नाच्च फलितं भवति। तद्विषये दृष्टान्तः।

यथा कस्मैचिज्जनाय तुष्टेन विद्याधरेण विद्या काऽपि दत्ता। ''विद्यासाधनं तु वने वंशजालमध्ये मुख्यमधोकृत्य वह्निना प्रज्वलितकाष्टसंजातो धूमः पेयः तथा मन्त्रजपनं कर्त्तव्यम्'' विद्यासंप्राप्तेस्तुष्टः स विद्याजपनाय वनं गतवान्। तेन षण्मासं यावत् प्रयत्नः कृतः, शङ्कितःस यद्-एतावता विधानेनापि मत्कार्यं सेत्स्यति न वा? एतया शङ्कया विद्यासिद्धिविधिं विधातुं नोत्सहते। एतस्मिन्नवसरे कोऽपि चौरः कुतः समागतः, तेनोक्तं, किं करोति भवान्?

अहं विद्यां साधयामीत्यादि निरवशेषं वृतान्तं तेन कथितं। चौरेण चेङ्गितात् ज्ञातं, यदयं शङ्कितत्वाद् विद्यां साधयितुं न सामर्थ्यवान् तदा तेन चौरेणोक्तं, यदि योग्योस्म्यहं, तर्हि देहि मे विद्याम्। तदा तेन चौराय सा विद्या दत्ता। तेन निःशङ्कमनसा सा विद्या प्रारब्धा संसिद्धा च।

ततः प्रयत्नत्रयात् कार्यसिद्धौ ''न प्रयत्न एकः'' न द्वौ प्रयत्नौ वा कारणं, परं च प्रयत्नत्रयं यदि युगपद् संपद्येत, तदा कार्यसिद्धिरवश्यं संपन्ना भवति।

अतः कार्यसिद्ध्यर्थिना प्रयत्नत्रये प्रयतितव्यम्।

दुःखोपरि यो द्वेषः स्यात्,
तस्मात् सहस्रगुणमधिको द्वेषः पापोपरि यस्य भवति
स विवेकी मानवः।

# किञ्चित् विनोदाय

– मुनिश्री दिव्यदर्शनविजयः

१)

पाणिग्रहणात् पूर्वं०, प्रथमं पतिर् वक्ति भार्या च श्रुणोति
तत्पश्चात् भार्या वदति पतिश्च श्रुणोति
किञ्चित्समयान्तरे तु द्वौरपि वदथः
प्रातिवेश्मीकास्तु श्रुण्वन्ति
बोधः– (हा! हा! हा! अहो संसारे वैचित्र्यम्)

* * *

२)

अध्यापकः – भो! वीरेन! कथम् गृहपाठस्तु त्वया न कृतः
वीरेनः – पूज्याः! क्षम्यताम्
अहन् तु न गृहे वसामि, किन्तु छात्रालये वसामि
ततो न गृहपाठः कृतः
बोधः– आलस्येन कुतर्का नो कर्त्तव्याः।

* * *

३)

हितेनः – मम जनकपार्श्वे प्रभूतं धनमस्ति,
ततो ममाध्ययनमपि अेक्सपोर्टज्ञानालये भविष्यति
विरेनः – (अलं) मम पितुः पार्श्वे तु एतावद् धनम्, यत मम ज्ञानार्जनम्
केम्ब्रिज–विद्यापीठे भविष्यति।
सौम्यः – (एतद् किम्) मम पितृसमीपे बहु बहु धनम्, अतः मां ज्ञानार्जनाय
कुत्राऽपि न प्रेषयिष्यति।
बोधः–गुणार्जनाय ज्ञानार्जनम्, नतु धनार्जनाय।

* * *

४)

पत्नीः – प्रातरुत्थाय प्रतिदिनम् वारिणा मन्मुखम् किम् सिञ्चसि? वदतु परमार्थम्।

पतिः – लग्नपूर्वे तव पिताऽकथयत् माम्, यद् ''मम पुत्री पुष्पवत् कोमलाङ्गी अस्ति'', अतः संरक्षणीया, ततोऽहं वारिणा सिञ्चामि

बोधः– कस्यचिदपि वाक्यस्य परमार्थो ज्ञातव्योऽविवेको न कर्त्तव्यः।

* * *

५)

टक् टक् टक्

अध्यापकः – भो ! घटिका-भार्यायोः को भेदः यूयम् यदि जाणीथ तदा प्रत्युत्तरम् देयम्

प्रथम छात्रः – अेका निर्जीवा, द्वितीया सजीवा ।

द्वितीय छात्रः – घटिका यदा निष्क्रिया भवति तदा टक् टक् ध्वने र्समाप्ति, भार्या यदा निष्क्रिया भवति तदा टक् टक् ध्वने प्रारम्भः।

बोधः– सहशीलता वोढव्या

* * *

६)

हितेनः – मित्र ! त्वम् कथम् न सम्यक् खादसि?

ईशानः – किम् ?

हितेनः – समोसा पदार्थस्याभ्यन्तरस्थित व्यञ्जनम् केवलम् भक्षयसि ननु?

ईशानः – वैद्यः कथयति बहिस्थितपदार्थानि त्यक्तव्यानि ज्ञातम् किम् ?

बोधः– अतिलोलुपता नो कर्तव्या

* * *

७)

दक्षः – परीक्षायाम् चौरीं कर्तृमिच्छा ममासीत्, तदर्थे पुस्तकमपि गृहितं तथाऽपि चौरी न कृता

हितेनः – सुष्ठु जातम् ! शोभनम् ।

दक्षः – किम् ! रे ! शोभनम् परिक्षा तु पौराणिकविषयकासीत् भूगोलविषयकश्च पुस्तकम् गृहीत्वा गतवान्

## कॉलेजः

अथैकदा सन्तेन पुष्टा अेका कन्या
कॉलेज नाम किम् ! तस्यार्थम् निवेदय
साऽवदत् विद्याप्राप्तिः
यत्र भवेत् सः कॉलेजः
सन्तरकथयत्-निरर्थकम् मा
वद, असत्योऽयमर्थः।
कालस्य क्षयः यत्र भवति सैव कॉलेजः
भुतानि नश्यन्ति भुतेभ्यः तदवत्
कालं च यान्ति कालेज्यः
कॉलेजज्ञानालये यः पठन्ति
सः कालपुरुषस्य वेश्म यान्ति

## क्षारद्रव्यम्-जलम्

पापप्रायश्चितार्थे तपोकर्तव्यम्
(तपसा निर्झरा) इति शास्त्रोक्ति
किन्तु तस्मिन् पश्चातापस्याश्रूणि
अपि अत्यावश्यकम्।
मलीनवस्त्रानाम् शुद्धयर्थे क्षारेन सह
वारि तु अनिवार्यम् मात्र क्षारेन क्षालनेन
वस्त्रानि शिथीलीभवन्ति
तपस्तु क्षारद्रव्यम्
पश्चात्तापाश्रूणि तु वारि

## पुस्तकम्-मस्तकम्

मस्तकपुस्तकयोरविभाज्यसंसर्गः मात्र म-पुयोः भेदम्।
किञ्चिद्वैशिष्टमत्रप्रतिभासते तत्तु विचारणीयम्।
पुस्तकम् मस्तकस्य ज्ञानसमृध्दिमातनोति तथा च
ज्ञानविशिष्टमस्तकात् एव पुस्तकस्यार्विभावोस्ति
विना पुस्तकम् निर्गुणम् चैव मस्तकम्
मस्तकान्तरेण निर्माल्यमेव पुस्तकम्
यस्मिन् पुस्तके मस्तकस्योपयोगोऽत्यन्तकष्टतया कृतमस्ति
तदैव विद्वद्भोग्यम् वर्णनातीतम् च प्रशंसां लभते खलु
तथैव यम्मस्तकम्, पुस्तकप्रपयाऽमृतपानयुक्तमस्ति
तदैव नैक जनेभ्यराधारतुल्यम् रोगीवौषधतुल्यम्
प्रतिभातीति....

## प्रश्न प्रहेलीका

पदस्य त्रीणिवर्णानि
प्रथम-द्वितीयाक्षरमिलनेन सावधानेति
भावो भविष्यति।
द्वितीय-तृतीयाक्षरसंयोगेन शरीरेति वर्णावली।
प्रथमतृतीयवर्णेनालङ्कारम् इति ख्याति।
संपूर्णपदस्यात्मा इति परिभाषा संङ्गमिष्यति।
तर्हि सुज्ञ जना! विचारयन्तु मनसि
दियताम् उत्तरम्, यदि न स्फुरयति, तर्हि शोध्यतामंकेषु।
**(चेतनः)**

## नम्रता

चीनदेशेष्वतिष्ठल् लाओत्से नाम तत्वचिन्तकः
तस्यशिष्यः चांगत्सु, तेनैकदा प्रज्ञप्ति! कृता पूज्याः!
नम्रता नाम किम्?, ज्ञातव्यम् भवता,
सुष्ठवाधारय, गुरुणा स्वमुखमुद्घाटीतम्।
जीव्हा च दर्शीता, । पश्यतु मद्जिव्हा । एतादृग्वयस्यपि न
जीर्णा पूर्ववदेव कार्यं करोति.।
अधुना तु मम दन्तश्रेणी पश्यतु । मान्याः! नास्ति
भवतामानने काऽपि श्रेणी । ज्ञातम् किम्?
जिव्हा-कोमला-मुद्वी च अतः अद्यावधि शोभना,
दशनश्रेणी तु स्तम्भवत् कठीनाऽतःमङक्षु नष्टा त्रुटिता च
स एव चमत्कारो नम्रतायाः । आम्! आम्!

# आर्यत्वमिदम् रमणीयतरम्

(गुर्जरमूलम्: डॉ. शरदः ठाकरः)
(अनुः. देवार्थः)

'चलतु मातः। उपविशतु अस्मिन् याने।'

'किमर्थम्?'

'भवती धोळकां नेतव्या ।
नेत्रमणि–चिकित्सार्थम्।'

'हे!!!'

धोळकाकेन्द्रस्य कस्मिंश्चित् दूरवर्तिनी लघुग्रामे निवसत्याः निर्धनवृद्धायाः मुखं इषद् विकसितम् एव अस्थात्।

'अयि जातक! चिकित्सार्थं तु धनस्य आवश्यकता भवति ननु' सा अपृच्छत्।

'धनस्य न मातः।, समयः एव अपेक्षितः। किं स्वयम् एव यानम् उपविशति भवति? उताहो, उन्नीय उपवेशयामि।'

पञ्चसप्ततिवर्षीया मोंघीबाई रोदितुं लग्ना। द्वारं पिधाय वराकी सा यानम् उपविष्टा।

**'मातः! किमर्थं रोदिषि?'**

'दारक! एतद् कलियुगम्, उताहो सत्युगम्?'

'निश्चप्र चं कलियुगम्। मातः! किमर्थं पृच्छनम्?'

' न किमपि।'

ईश्वरेण अपत्यसुखात् अहं वञ्चिता अस्मि।

अद्य प्रथमवारं कस्यचित् मुखेन **'मातः'** इति संबोधनं श्रुतवती अस्मि, तदर्थम्।'

याने अन्ये अपि चतुःपञ्चाः वृद्धकाः उपविष्टाः आसन्। सर्वेषां जीवनकथा समाना एव आसीत्। द्वयदिनात् पूर्वं भाणगढ़ग्रामे नेत्रयज्ञस्य आयोजनं जातम् आसीत्। अहमदाबादीयस्य अरुणत्रिवेदीवर्यस्य नेतृत्वे कार्यमग्नायाः **'भानुमाला ट्रस्ट'** इति अस्याः संस्थायाः उपक्रमे तज्ज्ञैः वैद्यैः अत्र आगत्य निःशुल्कतया रुग्णानां नयनानि परीक्षितानि। केभ्यः औषधानि असूचयन्, केभ्यः च शस्त्रचिकित्सायाः सूचना दत्ता। एवम्, अनया घटनया एव सत्युगे सुवर्णशृङ्ला सदृशी काचन करुण–मङ्गलघटना प्रारब्धा।

**''रेड्क्रोस्''** संस्थायाः साहाय्येन धोळकायाः कीटाणुमुक्ते चिकित्सालये ''फेको''–पद्धत्या नेत्रतारकप्रत्यारोपणस्य सेवायज्ञः वैद्यैः आरब्धः आसीत्। प्रतिग्रामम् अटित्वा निर्धनानां रुग्णानाम् आनयनं कर्तव्यम् आसीत्। एकः रुग्णः, एकः तस्य स्नेहिजनश्च। द्वौ एव। सः रिक्तपाणिः एव इति अंशः प्रथमतः एव परिशीलितव्यः। वराटिका अपि प्राप्ता चेत् प्रत्यर्पणीया। शस्त्रचिकित्सा परिचर्या च, द्वे अपि निःशुल्के। मुख्या चिन्ता तेषां भोजनस्य आसीत्। तस्य अपि समाधानं लब्धम्। एकेन जैनदेवालय ट्रस्टेन एतत् कार्यं सोत्साहं स्वीकृतम्।

---

१) अनुचितसमये इति २) खीचडी

किन्तु सन्ध्याकाले अव्यवस्था अभवत्। येषां शस्त्रचिकित्सा झटिति समाप्ता, तेभ्यः तु न कापि बाधा आपतिता। किन्तु अन्ते सप्तवृद्धानां कार्यसमाप्तौ समयः सप्तवादनः अभवत्। रुग्णाः स्नेहिजनाः च मिलित्वा चतुर्दश–पञ्चदशजनाः यदा भोजनार्थं गताः तदा तत्र देवालय समीपे भोजनालये जैनधर्मस्य नियमान् आश्रित्य भोजनपरिवेशने विरामः जातः आसीत्। आयोजकाः द्वन्द्वभावम् आप्ताः। देवालयीयानां तत्र न कोऽपि दोषः आसीत्। तैः तु प्रथमतः एव स्पष्टता कृता आसीत्। अथ किं कर्तव्यम्? अरुणवर्यः एतद् वृन्दं नीत्वा नगर्याः बहिः आगते एकस्मिन् उपाहारगृहे गतवान्। उपाहारगृहस्वामी अपि द्वार पिधानस्य कार्ये एव सज्जः आसीत्।

'किम् अस्ति?' तस्य प्रश्नविधाने आदिनस्य श्रमः ज्ञायमानः आसीत्।

'[1]कसमये आगम्यते वा? एतद् न युष्माकम् अहमदाबादनगरम्, यत्र रात्रेः द्वादशवादनम् एकवादनं वा यावत् भोजनं प्राप्यते।' तस्य वचने मृदुतायाः अभावः आसीत्।

**'सत्यम्'** अरुणवर्यः स्वस्मिन् नियंत्रणम् अकरोत्। 'किन्तु एतेषां पितृणां कृते...यत् किमपि भवतु...मूल्यं तु पूर्णस्थालिकायाः दास्यामि....भ्रातः। भगवतः कार्यं ननु...।'

'अस्तु...अस्तु... एकया [2]क्षिप्रचटिकया पर्याप्तं वा?' रुक्षम् अवदत् सः।

**'पर्याप्तम्।'**

क्षिप्रा पच्यमाना आसीत्। तावत् तस्य मनसि सु–विचारः स्फुरितः। सूदम् आदिशत्। अन्यस्यां हंदिकायां तक्रपाकम् अपि पाचय खलु। अस्निग्धा क्षिप्रा कथंकृत्वा रोचयिष्यति?' पुनः दशक्षणानाम् अनन्तरं प्रादुर्भूतः ''गच्छ, समीपात् आपणात् चत्वारि पयःस्युतानि आनय। कदाचित् तक्रपाकः सर्वेभ्यः रोचेत् न वा?'

तावत् अरुणवर्यस्य सम्मुखं दृष्ट्वा नेत्रभङ्गिं कृत्वा सः व्यलपत् 'अथ एवं मा चिन्तयतु, यत् अहम् एतान् सर्वान् रोट्टिकाः, व्यञ्जनं च अपि सज्जीकृत्य भोजयिष्यामि। यदि तादृशी अभिलाषा तर्हि सत्वरम् आगन्तव्यम् आसीत्। दधी, पर्पटः, सलाड्, चटणी इत्यादिकं सर्वम् अपि प्राप्तं स्यात् भवता। तथा च एवम् अपि मा चिन्तयतु यद् इमौ क्षिप्रा–तक्रपाकौ अहम् अर्धेन मूल्येन एव दास्यामि। मूल्यं तु पूर्णस्थालिकाया एव ग्रहिष्यामि' इति।

सर्वे उत्पीठिकाऽऽसन्द्योः उपरि आसिताः। वराकी मोंघीबाई!! सा अद्या भूतले एव उपविष्टा।

'अम्बे! उत्तीष्ठ। आसनस्य उपरि उपविश्य भोक्तव्यम्' ''इति अरुणत्रिवेदी व्यजिज्ञपत्।''

'न पुत्रक!, एतद् मम सुखाय न। जीवने धोळका एव प्रथमवारं पश्यामि। अनयोः उत्पीठिकाऽऽसनयोः उपरि तु पञ्चसप्तति–वर्षात्मके जीवने सकृत् अपि न उपविष्टा अहम्।'

अरुणवर्यः हस्तावलम्बनेन ताम् आसने उपावेशयत्। वृद्धाः पुनः अपि रोदितुं लग्ना।

'पुत्रक! एतद् कलियुगं चलति, उताहो!.....' उपाहारगृहस्वामी कलियुगशब्दम् आकर्ण्य कोपाऽऽकान्त एव अभवत्। सः अलपत् 'अपि महाशय ! इमौ क्षिप्रा–तक्रपाकौ भोजयामि चेत् अपि **'कलियुग–कलियुग' रटनम्।'**

अरुणत्रिवेदी तस्य कोपं शिथिलीकृतवान्। सर्वं विस्तरेण अश्रावयत्। निर्धनाः मानवाः... वृद्धावस्था... निराधारत्वम्... नेत्र तारकरोगः... शस्त्रचिकित्सा... निशुल्का परिचर्या। सः शृण्वन्

आसीत्। ततः अवदत् एवम्? एतादृशम् अस्ति? अधुना यावत् किमर्थं न भणितवान् रे! सर्वं पुण्यं भवादृशैः वैद्यै एव सञ्चितव्यं किं वा?'

'अपि भ्रातः!.....'

**'मुखं पिधातु। युष्मदीयं चक्रं समाप्तम्।**

अथ मम चक्रम्। सावधानः भवतु! पञ्चदशानां स्थालिकानां कृते वराटिका अपि व्ययिता चेत्। कथितम् एतद्...' परुषम् उच्चारयत् सः।

**'अरे किन्तु क्षिप्रा-तक्रपाकौ.....'** अरुणवर्यः किमपि वक्तुकामः आसीत्।

तं मध्ये एव निरुध्य सः अवदत्-भवता मदीयम् एकं कथनं मन्तव्यम्। न कथनम्, आज्ञा एव वेत्तु। एतान् पञ्चदशान् अपि पितृन् गृहीत्वा श्वः मध्याह्ने भवता पुनः अत्र आगन्तव्यम्। उष्णोष्णाः रोटिकाः, व्यञ्जनत्रयम्, सलाड्, चटणी, पर्पटः, तक्रं च। ततः अन्तिमौ क्षिप्रा-तक्रपाकौ। नकारः भणितः चेत्...' ततः सः ऋजुः अभवत्।' भवतः चरणे स्पृशामि, मत्पितृक!, ईयत् मात्रं पुण्यं तु मदधीनं करोतु कृपया। किञ्चित् पुण्यम् अहम् अपि प्राप्नुयां ननु।'

अधुना सप्तद्वयाः चतुर्दशाः अपि पितरः साकम् एकीस्वरेण 'एतद् कलियुगं चलति? उताहो सत्युगम्?' इति अपृच्छन्।

श्री सुधर्मास्वामि जैन ज्ञानभंडार
C/o. विमुक्ति विश्व विद्यालय
हिराजैन सोसायटी के पास, रामनगर,
साबरमती, अहमदाबाद - 380005
फोन नं.:-(079) 55220409

यो भौतिकसुखं कर्मफलं कलयेत्,
धर्मसुखार्थं च पुरुषार्थं पुरः कुर्यात्
-स एव विवेकवान्।

# संस्कृतभाषाया आधुनिका जैन ग्रन्थकाराः

– साध्वीजी श्रीविरागदर्शनाश्रीः [卐]

**धन्यास्ते सुरभारतीषु रचनैर्यैरर्जितं सद्यशो,**
**धन्यास्ते भगवद्वचोऽनुसरणैः, शास्त्राणि ग्रथ्नन्ति ये।**
**येषां सूक्तिषु शारदा विलसति, श्रीद्वादशाङ्गिश्रिता,**
**तेषां नाम नमामि पुण्यचरितं, प्रत्येकमत्यादरात्।।**

मनुष्यश्चिन्तनं मनसि करोति, चिन्तनंचाऽभिव्यक्तुं वाणीं योजयति। सामान्यवार्तालापो दूरेऽस्तु, मनुष्यो धर्म–विद्या–कलासु वाणीं योजयति, तदा तेन असाधारणभाषाया आवश्यकता अनुभूयते। वाणीप्रयोगमपि यदा वार्तालापाद् एकं पदं पुरो भूय यावल्लेखनभूमिकां प्राप्नोति तदा सामान्यभाषा स्वयमेव पृथग् भवति।

संस्कृतभाषा भारतवर्षस्य एकाऽसामान्यभाषाऽस्ति। विश्वस्य पञ्चमूलभाषायाः नामानि एवं प्रकारेण सन्ति। **१-आर्य, २-द्राविड, ३-मुण्डा, ४-मन्-ख्मेर ५-तिब्बतचीना। भारतवर्षेऽद्य मराठी-बङ्गला-ओडिया-बिहारी-राजस्थानी-गुजराती-पञ्जाबी-सिन्धी-काश्मीरीभाषाः प्रयुज्यन्ते।** ताः सर्वाः मूलतः आर्यभाषया उत्पन्नाः सन्ति। भारतवर्षे भारतेतरदेशेषु च प्रयुज्यमानानामन्यभाषाणां सम्बन्धो द्राविडादिमूलभाषाभिरप्यस्ति। **'पाइयसद्दमहण्णवो'** ग्रन्थस्य प्रस्तावनायां श्रीहरगोविन्ददासः श्रेष्ठी लिखति 'यद् आङ्ग्लादि सुदूरवर्तिभिःभाषाभिः सह हिन्दीप्रमुखाऽऽर्यभाषाणां वंशगतैक्यस्योपलब्धिर्भवति, किन्तु आभिरनार्यभाषाभिः सह स सम्बन्धो न दृश्यते'।

संस्कृतभाषा आर्यभाषाभ्यः सर्वाभ्यः प्राचीना मन्यते। वैदिकपरम्परायां संस्कृतभाषा, जैनपरम्परायां प्राकृतभाषा, बौद्धपरम्परायां पालिभाषा यद्यपि सर्वाभ्यो भाषाभ्यो महत्त्वपूर्णा भाषा मन्यते, किन्तु भारतीयास्तिकचिन्तनधाराया दृष्ट्याऽवलोक्यते तदा भारतीयग्रन्थकारा अन्यग्रन्थकारेभ्योऽधिकान् ग्रन्थान् अलिखन्। संस्कृतभाषा वार्तालापस्य भाषा भवितुं शक्यते वा न, स विवादश्चलन् भविष्यति। लेखनस्य भाषायाः स्वरूपे संस्कृतभाषा सर्वाधिका विद्वत्प्रियास्ति।

अद्य भारतदेशस्य विविधराज्यानां स्व–स्वभाषाः सन्ति। संस्कृतभाषा किञ्चिदेकराज्यस्य अपि नास्ति, किन्तु सर्वेषां भाषाऽस्ति। आङ्ग्लभाषा विश्वभाषा कथ्यते, हिन्दीभाषा च राष्ट्रभाषा कथ्यते, यत

---

[卐] देवर्धिणा हिंदीभाषायां लिखितस्य संस्कृतभाषाके आधुनिकजैनग्रन्थकारस्य [ चौखम्बा – १/वि.सं. २०६३ ] प्रस्तावनाया अयमनुवादोस्ति ।

आदान-प्रदानेभ्यस् ताः स्वस्वस्थाने अतिप्रचलिताः सन्ति। केवलं यदि ग्रन्थसर्जनस्य वार्तां करिष्यामः, तर्हि संस्कृतभाषायाः गौरवमपूर्वमस्ति। धर्मा-ऽर्थ-काम-मोक्षेषु संस्कृतसाहित्यस्य यद् प्रदानमस्ति तद् स्वस्मिन्नेवानुपममस्ति। ई.स. पूर्व २००० वर्षाद् यावद् अद्य संस्कृतभाषायां महामनीषिभिर् नवसर्जनं क्रियते। प्राचीनसंस्कृतग्रन्थकारेष्वनेके ऐतिहासिका ग्रन्थाः प्रकाशिताः।

शत-सार्धशतवर्षात्पूर्वं संस्कृतभाषायां ग्रन्थानां नवसर्जनस्य पङ्क्त्यां प्रभूतानि नव्यानि नामान्यागतानि सन्ति। सर्वेषां सामूहिकः परिचयः युगपदेव मिलेत तादृगेकं पुस्तकं रचनीयमिति भावनया प्रयासो विहितः।

एतदर्थं वयं एतस्मिन् निबन्धेऽऽधुनिकजैनग्रन्थकाराणां वर्गीकरणं कृत्वा तेषां च योगदानस्य प्राथमिकः परिचयः दातुं प्रयतामहे। आधुनिकजैनग्रन्थानां संख्या १५५ अभवत्।

लघु-लेख-स्तोत्राष्टकादयोत्र न गणिताः। तर्ह्यपि ग्रन्थसङ्ख्या ७०० तोऽधिकाऽस्ति। वयं मन्यामहे यत् संस्कृतभाषाया अन्ये जैनग्रन्थकारा अपि भविष्यन्ति येऽस्माभिर्न ज्ञायन्ते। वयं तेषां सर्वेषामज्ञातग्रन्थकाराणां क्षमायाचनां कुर्मः।

जैनग्रन्थानां प्रधानभाषा प्राकृतभाषाऽस्ति। आधुनिकप्राकृतग्रन्था अपि वयमस्मिन् निबन्धे समाविशामः। ७०१ ग्रन्थेभ्यो प्राकृतग्रन्थानां सङ्ख्या केवलं ३२, शेषाश्च ६६९ ग्रन्थाः संस्कृतभाषानिबद्धाः सन्ति।

वैदिकबौद्धधर्मयोरन्यधर्माणां च भारतीयवैदेशिकग्रन्थकाराः संस्कृतभाषायां यदपि नवसर्जनमकुर्वन्, तस्य विशालसूचीकरणं यदा भविष्यति तदा जैनधर्मस्याधुनिकग्रन्थकाराणां प्रस्तुतसूच्यवश्योपयोगिनी सेत्स्यति। आगमिष्यमाणे समये वयममीषां ग्रन्थानां विस्तृतपरिचयं कारयिष्यामः।

जैनधर्मस्य चतस्रः प्रमुखधारा अधुना प्रसिद्धाः सन्ति-श्वेताम्बरमूर्तिपूजकः, दिगम्बरः, स्थानकवासी, तेरापन्थी च। चतुःपरम्पराणामाधुनिकसंस्कृतसाहित्यस्य सूचीकरणं कदाचित् जैनसङ्घे नव्यः प्रयोगोऽस्ति।

बनारसस्थिते पार्श्वनाथविद्यापीठपुस्तकालयेऽनेकपुस्तकानामवलोकनमभ्यासं च कृत्वा वयमेतन्निबन्धं लिखितुं शक्नुमः।

**लेखनकार्ये डॉ. सुदर्शनलाल जैन-डॉ. श्रीप्रकाश पाण्डेय-डॉ. अशोककुमार सिंहः-विशेषतः श्रीओमप्रकाश सिंहानां हार्दिकं संयोगं वयं लब्धवन्तः। डॉ. भागचन्दजी जैन (नागपुर)-डॉ. कमलेशकुमार जैन-डॉ. सुधाजैनानांमपि सहयोगः श्लाघ्यो भूतः।**

श्वेताम्बरमूर्तिपूजकपरम्परायां आचार्यश्रीशीलचन्द्रसूरि-आचार्यश्रीमुनिचन्द्रसूरीणां मार्गदर्शनमविस्मरणीयमस्ति। चौखम्भाप्रकाशनस्य श्रीसुरेन्द्रकुमारगुप्तस्यादरभावोऽस्माभिर्न विस्मरणीयः।

दि. ११-१२-२०११

# जैनग्रन्थाः

जैनग्रन्थानां रचना आत्मसाधनायै भवति। ग्रन्थकारः स्वाध्यायकरणं मनस्युद्दिश्य ग्रन्थं रचयति। स्वज्ञानगरिमायाः प्रदर्शनविचारः जैनग्रन्थकाराणां मनसि कदापि न संभवेत्। ग्रन्थस्याभ्यासं योऽपि कुर्यात् स आत्मिकतात्त्विकचिन्तनस्य मार्गदर्शनं लभेत। स भावो ग्रन्थकाराणां हृदि भवति। श्रमणभगवतः श्रीमहावीरपरमात्मनः प्रभृति आवर्तमानशताब्द्या अन्तिमदशकाद् ग्रन्थरचना अभूत्। ग्रन्थरचनायाश्चत्वारः प्रकाराः सन्ति।

**१) आगमग्रन्थानां रचना।**

**२) आगमग्रन्थेषु विवरणग्रन्थानां रचना।**

**३) आगमेतरग्रन्थानां रचना।**

**४) आगमेतरग्रन्थेषु विवरणग्रन्थानां रचना।**

उपर्युक्तविभाजनस्य स्वीयं स्वीयं महत्त्वमस्ति। या अपि ग्रन्थरचनाः सन्ति, तासां विषयं दृष्ट्वा चतुर्विभागेषु विभजनं कृत्वा, चतुरनुयोगाः कथिताः-द्रव्यानुयोगः, गणितानुयोगः चरणकरणानुयोगः धर्मकथानुयोगश्च। द्रव्यानुयोगग्रन्थेषु विश्वव्यवस्थायाः तात्त्विकं तार्किकं च निरूपणं विद्यते। गणितानुयोगस्य ग्रन्थेषु ज्योतिष-भूगोलादिविषयकगणितसम्बन्धिनं निरूपणमस्ति। चरणकरणानुयोगस्य ग्रन्थेषु जैनधार्मिकाचारसंहितायाः निरूपणमस्ति। धर्मकथानुयोगस्य ग्रन्थेषु जैनधर्मविषयककथानां सङ्ग्रहोऽस्ति।

## १) आगमग्रन्थानां रचना:-

तीर्थंकरभगवतः श्रीमहावीरप्रभोः समये गणधरभगवद्भिः मूलद्वादशागाङ्खसूत्राणां रचना कृता। ते 'द्वादशाङ्गी' नाम्ना कथ्यते। आचाराङ्गसूत्रं, सूत्रकृताङ्गसूत्रं, स्थानाङ्गसूत्रं, समवायाङ्गसूत्रं, भगवतीसूत्रं, ज्ञाताधर्मकथासूत्रं, उपासकदशासूत्रं, अन्तकृद्दशासूत्रं, अनुत्तरौपपातिकसूत्रं, प्रश्नव्याकरणसूत्रं, विपाकसूत्रं, दृष्टिवादश्च-

अमी द्वादश मूलभूता आगमग्रन्थाः सन्ति। एतेभ्योऽद्य दृष्टिवाद उपलब्धो नास्ति। एकादशाङ्गानाम् आगमग्रन्थानां रचना प्राकृतभाषायामभवत्। दृष्टिवादस्य रचना संस्कृतभाषायामभवत् इति श्रीप्रभावकचरित्रग्रन्थगतलेखः।

अङ्गानाम् आगमग्रन्थानां च पश्चादप्यन्यागमग्रन्थानां रचनापि भूता। सम्प्रति पञ्चचत्वारिंशदागमग्रन्था उपलब्धाः सन्ति। एकादशाङ्गागमग्रन्थानां रचनाकारः श्रीसुधर्मास्वामिगणभृदभूत्। श्रीदशाश्रुतस्कन्ध-श्रीकल्पसूत्र-श्रीव्यवहारसूत्राणां रचना

श्रीभद्रबाहुस्वामिना कृता। श्रीआतुरप्रत्याख्यान-श्रीचतुःशरणप्रत्याख्यानयोः रचना श्रीवीरभद्रगणिभिः विदधे। श्रीप्रज्ञापनासूत्रस्य रचना श्रीश्यामाचार्यैः कृता। श्रीनन्दीसूत्रस्य रचना देववाचकेन कृता। श्रीअनुयोगद्वारसूत्रस्य रचनाम् श्रीआर्यरक्षितसूरिरकरोत्। श्रीदशवै-कालिकसूत्रस्य रचनां श्रीशय्यंभवसूरिश्चक्रे। अन्यागमग्रन्थानां रचनाकारस्य नामानि नोपलब्धानि। आगमग्रन्थाः तीर्थङ्करवाण्याः शाब्दिकावतारोमन्यते। जैनधर्मस्य सङ्ख्यातीतग्रन्थेषु सर्वाधिकं महत्त्वम् आगमग्रन्थानामेव विद्यते।

### २) आगमग्रन्थेषु विवरणग्रन्थः-

मूलग्रन्थस्य अर्थविस्तारो विवरणेन भवति। आगमग्रन्थानां विवरणं चतुर्धोपलभ्यते १ निर्युक्तिः, २ चूर्णिः ३भाष्यं टीकाश्च।

निर्युक्तीनां रचना श्रीभद्रबाहुसूरिजीमहाराजो विदधे। तेन दशाऽऽगमग्रन्थानां निर्युक्तयोः विरचिताः। निर्युक्तयः प्राकृतभाषायां पद्यबद्धरचनाः सन्ति।

चूर्णिरचना श्रीजिनदासगणिमहत्तरः, -श्रीअगस्त्यसिंहसूरिजीमहाराजाभ्यां तथाऽन्याऽज्ञातनामलेखकैः व्यधायि। चूर्णयः प्राकृतभाषायां गद्यबद्धविवरणं सन्ति। सप्तागमग्रन्थानां ११ चूर्णयः उपलब्धाः सन्ति।

भाष्यरचना जिनभद्रगणिक्षमाश्रमण-श्रीसङ्घदासगणिमहाराजाभ्यां व्यरचि। भाष्यं प्राकृतभाषायां रचितं, पद्यबद्धं विस्तृतं विवरणमस्ति।

टीकायाः रचनां अनेकलेखकाः चक्रुः। टीका-वृत्ति-विवरण-रहस्यार्थ-विवेचन-विस्तरार्थ-व्याख्या-अवचूरि-प्रमुख-शब्दैरपि ज्ञायते। केवलमेतावती समानता अस्ति, यत् सर्वशब्दानां केचन विशेषार्थाः सन्ति। सर्वशब्दाः संस्कृतभाषायां रचितं गद्यविवरणस्य प्रकारविशेषमेव निर्दिशन्ति।

### ३) आगमेतरग्रन्थानां रचनाः-

वीरनिर्वाणस्य नवमशतकस्य पश्चादागमरचना नाभूत्। वीरनिर्वाणसंवत्सरस्य प्रारम्भे आगमेतरग्रन्थरचना व्यधायि। भगवतः श्रीमहावीरस्वामिनः शिष्यैः श्रीगौतमस्वामिभिः श्रीपाक्षिकसूत्र-जगचिन्तामणिसूत्रयोः रचनाऽकारि। भगवतः श्रीमहावीरस्वामिनः शिष्यश्रीधर्मदासगणिमहाराजः उपदेशमालामरचयत्। ततःप्रभृति प्रारब्धागमेतरग्रन्थरचनायाः परम्परा अद्य यावद् वरीवर्तते। अतः आगमेतरग्रन्थानां सङ्ख्या अत्यन्तविशाला विद्यते।

### ४) आगमेतरग्रन्थानां विवरणग्रन्थाः-

आगमेतरग्रन्थाः प्राकृत-संस्कृतोभयभाषायां विद्यन्ते। आगमेतरग्रन्थानां विवरणग्रन्थस्य द्वौ प्रकारौ स्तः। स्वोपज्ञविवरणम् अन्यकृतविवरणं च। अधिकांशविवरणग्रन्थाः संस्कृतभाषायां विरचिता विद्यन्ते।

जैनग्रन्थानां विषयदृष्ट्या त्रयोदशविभागेषु विभाजनेन, ग्रन्थानां विविधायामानां बोधो मिलति।

१) आगम साहित्यम्
२) प्रकरणसाहित्यम्
३) कर्मसाहित्यम्
४) व्याकरणसाहित्यम्
५) कोशसाहित्यम्
६) दार्शनिकसाहित्यम्
७) अलङ्कारसाहित्यम्
८) छन्दःसाहित्यम्
९) काव्यसाहित्यम्
१०) अध्यात्म-योगसाहित्यम्
११) उपदेशसाहित्यम्
१२) कथासाहित्यम्
१३) प्रकीर्णसाहित्यम्।

एवं विषयविभजनम् आदर्शं मत्वा वयं जैनग्रन्थकाराणाम् अर्वाचीन-शृङ्खलायाः परिचयं प्राप्तुं प्रयतिष्यामहे। चरम-शत-सार्धशतवर्षेषु जैनग्रन्थकारैः या संस्कृतप्राकृतरचना कृता, तस्या नामनिर्देशं वयं करिष्यामः। एकैकग्रन्थस्य परिचयं लिखितुं प्रयासः क्रियेत, तर्हि एष निबन्धो महानिबन्धो भवेत्। वयम् इदम् आगमिष्यमाणे समये अवश्यं करिष्यामः।

श्वेताम्बरमूर्तिपूजक-दिगम्बर-स्थानकवासि-तेरापन्थि-इत्येताः चतस्रः परम्पराः जैनधर्मस्य ग्रन्थरचनाया आधारस्रोतांसि विद्यन्ते। वयं प्रत्येकपरम्पराया नामानि प्राप्तुं प्रयतामहे। कस्यचिद् ग्रन्थस्य अथवा ग्रन्थकारस्य नाम कदाचिच्छेषं भवेत्, तर्हि वयं क्षन्तव्याः।

यस्य सुखाभिकाङ्क्षा, दुःखभयं च नास्ति
– स एव मानवः श्रेष्ठः।

# काव्यशास्त्रविनोदेन

– साध्वीजी श्रीप्रशमनिधिश्रीः

विदुषां कासु प्रीतिः स्यात्, पाठे किञ्चोचितं मतम्?।
सर्वेषां चिन्तनीयं किम्?, **कलासु स्थिरता हितम्** ॥१॥

गुर्वाज्ञां केऽवमन्यन्ते?, संमान्याऽऽज्ञा गुरोःकदा?।
सुन्दरीणां गतिः कीदृक्?, **मन्दाः सदैव सालसाः** ॥२॥

किं कुर्यादीश्वरं प्राप्य?, विश्वे को धारयेत् क्षमाम्।
किं कुर्यात् सज्जनैः सार्धं?, **भजेत् साधुसमागम्** ॥३॥

विद्वत्सु हास्यपात्रं कः?, कामासक्ताश्च कीदृशः?।
क्व परार्थकराः सन्तः?, **मुर्खो नान्तर्मुखः क्वचित्** ॥४॥

कुर्यात् प्रियवियोगे किं?, प्रभुर्ध्येयः कदा हृदि?।
प्राणिभि र्भावनीया का? **स्मरेन्नित्यमनित्यता** ॥५॥

देवस्य दर्शनं कीदृक्?, भवह्रासं करोति किम्?।
केषां गेया गुणा नित्य? **मवन्ध्यं दर्शनं सताम्** ॥६॥

का कार्या वीतरागेषु?, गुणगानाद् गुणः किमु?।
केषां शीलं प्रशस्यं स्यात्?, **प्रीतिः प्रवर्धते सताम्** ॥७॥

यः स्वगृहीतप्रतिज्ञां प्राणत्यागेऽपि पालयति
–स उत्तमजातिवान्।

# ।। जातस्य ध्रुवं मृत्युः।।

– [1]साध्वीजी श्रीप्रशमनिधिश्रीः

अस्मिन् संसारे यो जायते स जीवति, यो जीवति स म्रियते इति सनातनो नियमः। तत्र, तत्रभवद्भ्यः किं रोचते? जन्म? जीवनं ? मरणं वा ? क उत्तरो ? भवान् वदतु। सर्वे प्राणिनः जन्म एव स्पृहयन्ति, न तु मृतिं, किन्तु कीदृक्–कुत्र वा जननं स्पृह्यं? मानवलोक एव जन्म शक्रादयोऽपि स्पृहयन्ते। किमर्थम्? –

यतो मनुष्यजन्मलाभे सति जनोऽजन्मा भवितुं प्रयतते।

मानुष्ये जन्मन्येव निष्पापं जीवनं जीवितुं शक्यं, मनुजजन्मन्येवानुमृत्यु मुक्तिलाभः शक्यः।

**'जातस्य ध्रुवं मृत्युः'** इति उक्त्या यो जायते स म्रियत एव, अस्माकं जन्मप्राप्तौ हर्षः, मृत्युवार्त्तयाऽपि विषादः परिवृणोति। एतद् विषचक्रस्खलनाय सुज्ञैः चरममृत्युस्वरूपेण मुक्तिलाभायैव प्रयासः कर्त्तव्यः। सर्वज्ञशास्त्रेष्वपि सर्वत्र समाधिमृत्योर्लाभाय प्रार्थना कृता, न तु जन्मप्रापणाय।

जडोऽज्ञो जनोऽमरीभवितुं प्रयतते, न तु निष्पापजीवनं जीवितुम्। दीर्घजीवनाय च बहुनि पापानि करोति।

**अत्रार्थे हृदयवेधिनी पौराणिका कथा प्रस्तूयते। -**

श्रीनारदः विश्वविख्यातः, सर्वत्राऽस्खलितप्रचारः, सर्वैः बहुमान्यश्च । एकदा नारदस्य पिता चिन्तयति **"यदहं वृद्धोऽभवम्। मम सुतः सुन्दरः सर्वमान्यश्च । ततस्तस्य सर्वमान्यताया मम को लाभः? चेत् स मम कार्यं नाऽकरिष्यदिति"**। अत्रान्तरे नारदस्तं प्रणामार्थमागतः। नारदजनकेनोक्तं–वत्स! त्वं सर्वत्र गच्छसि, सर्वे तव बहुमानं कुर्वन्ति। ततो भवान् मदीयमेकं कार्यं करिष्यति? नारदेनोक्तं–भवतां संशयः किमु ?। तथापि पित्रा पुनरुक्तम् – त्वं करिष्यसि, न वा? नारदः प्रोवाच–एतादृक् किं वदथ? प्रथमं तावत् किं कार्यं तद् वदत । जनकेन पुनरुक्तम्–वत्स! भवान् निश्चितं करिष्यति न वा?

नारदोऽवक् – पितः! अहं प्राणान्तेऽपि भवत्कार्यं करिष्याम्येव। तदा नारदपिताऽवदत्–भद्र ! भवादृशात्मजं संप्राप्याहं अमरीभवितुमीहे। त्वं सर्वमान्यस्ततस्त्वं मह्यम् कथमपि, कुतश्चिदपि अमरपत्रकं समानीय देहि। येनाहममरो भवामि। एतच्छ्रुत्वा नारदो दुष्करकार्यं मत्वा चिन्तया व्याकुलोऽभूत्। तदा तज्जनकेनोक्तं मया पूर्वमेव कथितं त्वं करिष्यसे न वा?। तदा नारदेनोक्तं–

---

१) (कविराट् श्रीमद्विजयमुक्तिप्रभसूरीश्वरस्यप्रवचनस्यानुवादः।

पितः! अहं सर्वथा प्रयतिष्ये। तदैव नारदो ब्रह्मान्तिके गतः। तेन स्वजनकस्पृहाकथा ब्रह्मणे कथिता। ब्रह्मणोक्तं **"नारद ! सृष्टिसर्जनमेव मम कर्तव्यं । न तु अमरत्ववितरणाय ममाधिकारः"।** एतदर्थं त्वं विष्णुपार्श्वे गच्छ । अहमपि त्वत्सार्धमागमिष्यामि। ब्रह्मनारदावुभावपि गतौ विष्णुसमीपे । तौ दृष्ट्वा विस्मितो विष्णुः सत्कारपुरस्कारं सह समागमनकारणं पप्रच्छ। तदा नारदेन स्वजनकामरत्वस्पृहाकथिता। विष्णुः प्रत्युवाच-नारद! मदीयं कार्यं सृष्टिसंरक्षणं। नतु अमरत्वप्रदानं। त्वं महेशपार्श्वे गच्छ। अहमपि त्वत्साहाय्यं करिष्ये। तदा ब्रह्मा-विष्णु-नारदा-स्त्रयोऽपि महेशान्तिके गताः। विधि-विष्णु-नारदत्रिकं संपश्य विस्मयविस्मेरो रुद्रोऽवदत्-अहो ! स्वागतं स्वागतं, भवत्पदकमलस्पर्शेनाऽस्माकमावासः पवित्रोऽभवत्। उचितप्रतिपत्तिसमेतं स्वागतं कृत्वाऽऽगमनकारणं पृष्टवान् स। तदा नारदेन सैव वार्त्ता प्रोक्ता-तदा शङ्करोऽवक्-अरे, रे; एतत् कर्त्तव्यं, मम नैव, अहं तु कल्पान्ते सर्वसृष्टिसंहारकोऽस्मि, न तु प्रत्येकं सङ्गृहय मृतिदायकः, तत्र कार्ये तु यमस्यैवाधिकारः। चलत चलत वयं सर्वे यमान्तिके यामः, तस्यैवाधिकारोऽस्मिन् कर्मणि। ततो द्रुतं द्रुतं बह्मा-विष्णु-शङ्कर-नारदाश्चत्वारोऽपि गता यमपार्श्वे। तानाऽऽगच्छतो दृष्ट्वा परमहृष्टो यमोऽवक्-स्वागतं स्वागतं कटरे ! कतिचिद् प्रहरादहं चिन्ताव्याकुलोऽभवम्। भवद्भिः सहसमागत्य मच्चिन्ता दूरीकृता। सर्वैः पृष्टं-किं भवदीयचिन्ताकारणं?। यमोऽवदत्-ह्यस्तनदिने मया चिन्तितं नारदजनको वृद्धोऽभवत्, तेन तस्य मृत्युकाल उपस्थित; तस्यानयनाय दूतः प्रेष्यः किन्तु तन्मरणनिमित्तं किं? इति दर्शनाय मया चित्रगुप्तः समादिष्टः, चित्रगुप्त! मरणोचितजनसूचिपुस्तकं समानय। चित्रगुप्तानीतपुस्तकमध्ये मया नारदजनकमरणकारणं दृष्टं, तत्र लिखितं-**"यदा ब्रह्मा-विष्णु-महेशाः सार्धं मत्समीपं समागच्छेयुःतदैव तस्य मृत्युरिति"।** एतत्पठित्वाऽहं चिन्ताव्यग्रोऽभवम्, यत एतादृगवसरो दुर्लभो, यत् त्रयोऽपि जगन्नाथाः ब्रह्मा-विष्णु-शङ्कराः सम्भूय मदन्तिके समागच्छेयुः। किन्तु भवतां समागमनेनेयं चिन्ता दूरं गता। एतच्छ्रुत्वा नारदो झटिति झटिति स्वगृहे स्वजनकदर्शनार्थं गतः स्वपितुः मृतदेहश्च दृष्टवान्।

एतत्कथां श्रुत्वाऽस्मद्भिः शोचनीयम्। - कुत्रापि कदापि कथमपि कुतश्चिदपि मृत्युः समेष्यत्येव।

**पूज्यपाठकप्रवरैरपि 'शान्तसुधारस' ग्रन्थे प्रोक्तं-**
**विद्या-मन्त्र-महौषधिसेवां सृजतु वशीकृतदेवां।**
**रसतु रसायनमुपचयकरणं, तदपि न मुञ्चति मरणं।।**

ततः मरणसमये समाधिलाभार्थं जीवनं निष्पापं कर्त्तव्यं, अत एवाऽजन्माभावः प्राप्स्यते।

इति शम्।

# सरस्वत्यष्टकम्

– साध्वीजी श्रीचिन्तनप्रियाश्रीः

शुभ्राङ्गि! शुभ्रवर्णे! त्वमज्ञजनशुभावहे!
शुभगे! वरदे! सम्यग्! ज्ञानर्द्धिं मे मुदार्पय ॥१॥

ध्रुवं वृणोति विद्वत्त्वं स्वल्पधीर्योऽबुधो जनः।
त्वद्ध्यानातिशयान्मातः! सन्मतिं च तनोति सः ॥२॥

पद्माक्षि! कामरूपे! त्वं पद्मासन–चतुर्भुजे !
पद्मास्ये! करपद्मे! त्वं देहि मे श्रुतसम्पदः ॥३॥

त्वत्स्वरूपं सदा ध्यायेदेकाग्रीभूय साधकः।
स पश्येत् स्वानने चन्द्रात् प्रविशन्तीं त्रिलोचनाम् ॥४॥

चित्ते! वाग्देवि! कृत्वा त्वां, योजयेद् 'ऐं नमः' पदम्।
स विद्वज्जनगोष्ठीषु, प्राप्नुयान्न पराभवम् ॥५॥

हे! प्रशस्तगुणाधारे!, महाऽ–ज्ञानक्षयङ्करि!
निरुपमाकृते! देवि! सुप्रसन्ना सदाऽस्तु मे ॥६॥

धी–बलवर्धिनि! ब्राह्मि!, धीबलाद्वर्जितोऽस्म्यहम्।
जिनेन्द्रवदनोद्भूते!, मह्यं प्रदेहि धीबलम् ॥७॥

त्वत्सद्ध्यानादृतेस्त्रात्रि!, त्रायि! सुश्रुत**चिन्तनं** भवेत्।
प्रत्यक्ष**दर्शनं** दत्वा, कुरु **श्रेयस्पदं** परम् ॥८॥

# हे ! भो !
# मम प्रार्थनां स्वीकुरु

– अध्यापकश्री तन्मयः ललीतः शाहः

यावन् मम मोक्षो न भवेत्, तवान् मम मतिस् तवाज्ञयाखण्डया सहिता भवेत्।
हे प्रभो! तावत् तवाज्ञासहिताखण्डा मति र्लभेत।
हे विभो! तव आज्ञा एव मम प्राणा भवेयुः।
हे नाथ! तव आज्ञा एव मम जीवनं स्यात्।
हे तारक! तव आज्ञा एव मम सर्वस्वं भवेत्।
हे जगद्गुरो! अखण्डब्रह्मचर्यं पालयेयम्।

आत्मस्वरूपरमणताबुद्धिंगतेन परिणामेन परमानन्दं प्राप्नोमि। कर्मरजांसि निराकृत्य मोक्षस्य मम सम्प्राप्तिः भवतु। मनुष्यत्वं प्रतिक्षणं सुसफलं करोमि। दुष्कृतगर्हा–सुकृतानुमोदना–चतुःशरणगमनेषु पटतन्तुवच्चेतो हं ग्रथ्नामि।

सांसारिकसुखरागं, दुःखद्वेषं समूलकाषं कषामि। अनादितः मोहकर्मणः सञ्चयाः मम प्रत्यामप्रदेशे सुदृढाः जाताः, तान् शिथिलयानि। आत्मवत् सर्वभूतेषु दर्शनं करवाणि। देहात्मनोर्भिन्नतामनुभवानि। मोक्षमार्गे आगतान् विघ्नान् जहानि। प्रतिसमयमनन्तगुणां निर्जरां करवाणि। यदा यदाहं पापं कुर्याम्, तदा तदा कल्याणमित्रं प्रेष्य माम् रक्षत।

आज्ञाराधना–समाधि–स्वाध्यायमय–पापरहित–प्रमादरहित–तोषयोगसहिता–ऽनासक्तभावेनैव संसारे तिष्ठानि। हे! वीतराग! ममात्महितं यत्र भवति, तत्र माम् स्थापय। हे जगदुद्धारक! तवेकैकामाज्ञां, सादरं सबहुमानं सोल्लासं पालयेयम्, तादृशे बुद्धि–बले देहि।

हे सर्वज्ञ ! ममात्महितकारिणीं मनो–वाक्–कायानां स्फुरणां कारय।

हे सर्वज्ञदर्शिन् ! मम मोक्षदायिनं मनो–वाक्–कायानां योगं अनुपालयेः।

हे मोक्षाध्वदर्शक! मनो–वाक्–कायैः का अपि क्षतयः भवेयुस् तर्हि केनापि निमित्तेन माम् रक्षय। हे स्वयंसम्बुद्ध! यया दृष्ट्या त्वं जगद् दृष्टवान्, तया दृष्ट्या मामपि पश्य।

हे जिनोत्तम ! अहं, सुख–दुःखे, शत्रु–मित्रे, मृत्तिका–स्वर्णयोः
माना–ऽपमाने सर्वस्थित्यां समभावेन भवेयम्, तादृशं मनः कारक।

# संस्कृत-रुपान्तरकारः

– शान्तप्रकाशः सत्यदासः

१) शान्तिर्नास्ति सुखं विना, यतः सूर्य उद्याति,
ततोऽटति नरो भ्रमरवद् – यावन्नास्तं याति।।

२) येनाऽवगतः सुखपथः, स सर्वज्ञो मन्येत।
नाऽवगतश्चेत् सुखपथः, बुधोऽप्यज्ञ उच्येत।।

३) विश्व-विश्वसुखवर्धनम्, निकषः कर्त्तव्यस्य।
सविवेकां कुर्वन्तु भोः, सुखवृद्धिं विश्वस्य।।

४) दुःखं मेरुवदधिगतम्, सुखमणुमात्रं यर्हि।
अधिका हानि र्लाभतः, सुखवृद्धिः का तर्हि।।

५) मयाऽल्पसुखमधिगतं, परैः सुदुःखं यर्हि।
नष्टा शान्तिः सर्वथा, सुखवृद्धिः का तर्हि।।

६) हिंसाऽनृत-चौर्यादिकम्, पापं जनाश्चरन्ति।
किन्तु सुखादगणितगुणं, दुःखं तेऽनुभवन्ति।।

७) किं जगते दातव्यमिति, स्यान्मनसि विचारोऽपि।
तर्ह्यादानं मुञ्च भोः!, मा भव भुवि भारोऽपि।।

८) निष्पक्षो भव पश्य तं, यः सर्वस्वार्थोऽस्ति।
सर्वेषां स्वार्थः सदा, त्वदीयः परमार्थोस्ति।।

९)  यत्र साधुता तत्र ऋणं स्यात् सर्वजनस्य।
त्वत्कल्याणं तदपि यत्, कल्याणं विश्वस्य।।

१०) दुःखाधिकसुखवितरणं, लक्षणं सुकार्यस्य।
सुविवेकस्त्वावश्यकः, निर्णयार्थमेतस्य।।

११) चोरयन्ति चौराः स्वयं, चौर्यं नो मर्षन्ति।
स्वीये सदने प्रविशतः, चौरान् सन्घर्षन्ति।।

१२) धनं सञ्चितं माऽस्तु तद्, ददतु तथा भुञ्जन्तु।
किन्तु स्यादिह संयमो, रुजस्तनौ न वसन्तु।।

१३) येऽनासक्ताः सन्ति ते, वैभवेऽपि युञ्जन्ति।
नीरजानि किं नीरतो, नीरेऽपि क्लिद्यन्ति।।

१४) निकटे मुद्राः कोटिशः, किन्तु मनो न धनेषु।
तस्य तनु र्भवने वसति, मनः परन्तु वनेषु।।

१५) वने वने भ्रान्तः करे, जयमालामादाय।
मनः किन्तु भवनेऽभ्रमद्, जय्यं सदा विहाय।।

१६) भाग्यं निजकार्यं क्रियात्, किमपि न यद् विद्यामः।
वयं सदा पुरुषार्थिनः पुरुषार्थं दध्यामः।।

१७) 'सत्ये'शस्य पुरः समे, दीना मनुजाः सन्ति।
ये''सत्यभक्ताः'' कोटिशः, धूलीकणेऽपि वसन्ति।।

वासनां त्यक्त्वा मरणस्य सज्जता,
तन्नाम जीवनम्।

# विभाग : २ अर्वाचीनकृतयः

## खण्ड : ५ मधुरं मधुरं मधुराधिपतेः सर्वं मधुरम्

### चैतन्यप्रवाहः



॥ स्वात्मचैतन्यम्॥
– श्रेयःसरित्

### जैनं जयति शासनम्...



॥ सुकृतसन्ततिः॥
– श्रेयःदर्शी

### नवं नवं सौन्दर्यम्.....



स्त्रीणां नव नामनिरुक्तानि
– श्रेयःदर्शी

### परमपदपन्थाः...



॥ धर्मप्रसाधको भवेन्नरः॥
– श्रेयःपथिकः

### मधुरम् मधुरम्...



॥ चिन्तनम् ॥
– श्रेयःपथिकः

### आत्मैश्वर्यप्राप्त्युपायः...



॥ रुचिप्रबन्धः॥
– श्रेयस्करः

### स्वादु-स्वादु शुद्धं-शुद्धं सुखावहं-शुभावहं॥



॥ मार्दव॥
– श्रेयःश्रीः

### रहस्याऽऽस्वादः...



स्त्रीणां चतुर्नवतिः स्वरूपविशेषताः
– श्रेयःसखा

### काव्यकौतुकम्-



॥ पू.आ.श्री प्रेमसूरिगुरुषट्त्रिंशदुपमा नवकम् ॥
– श्रेयः सद्मः

### वैविध्यम्.....



॥ लोके त्रीणि न दृश्यन्ते॥ ॥ तालपुटं विषम् ॥
– श्रेयःसेतुः

### साम्प्रतम्....



॥ ज्ञानोपासना॥
– श्रेयःसद्म

### वादः, न वितण्डावादः



॥ सन्मेधाप्रागट्यम् ॥
– श्रेयःकान्तः

# चैतन्यप्रवाहः

## ॥ स्वात्मचैतन्यम् ॥

– श्रेयःसरित्

अस्मासु जीवत्वं, चेतनत्वम् अस्ति। अजीवेषु अचेतनत्वं, जडत्वमस्ति। किन्तु अत्र प्रश्नः भवति यदस्माभिः जीवत्वं लब्धं तदाऽस्माभिः किं लब्धं? यदि तल्लक्षणज्ञानमपि न लब्धं तदा किं कृतं? न किमपि इति। यदि जीवस्य लक्षणज्ञानमपि भवेत्, तर्हि तत्स्वरूपप्राप्तौ पुरुषार्थो भवति। यदि स्वभावदशाप्राप्तौ पुरुषार्थो भवेत् तर्हि किञ्चित् तत् लब्धिश्च भवति, जीवानां विभावदशा इति मालिन्यं, मालिन्यस्य स्पष्टीकरणं यदि भवेत् तदा तन्निवारणप्रायोग्यप्रयासो भवति।

पूर्वं जीवस्य सामान्यस्वभावो दर्शितः, अधुना तु विभावदशाज्ञानमप्यतिवावश्यकम्। यदि तद् भवेत् तर्हि तन्नाशनाय पुरुषार्थो भवतीति शुभभावनयाऽत्र स्वात्मविभावदशा प्रस्तूयते–

विभावदशायाः महानायकः, महामोहः, अचलप्रतिज्ञः, सुनायकोऽन्धीकृतसमस्त-जीवलोकः, स्वायत्तीकृताखिलसंसारिजीवराशिः, स यदा इच्छति तदैव स जीवराशिः खिन्नीभवति। स इच्छति तदा प्रसन्नीभवति। स इच्छति तदा उत्तिष्ठति स इच्छति तदा स्वपिति। स इच्छति तदा खादति। पिबति। आस्वादयति स्वादिमम्। समुपार्जयति मानं, प्राप्नोति सत्कारं। यदा यदा यत् यत् स कथयति, तदा तदा तत् तत् सर्वं सर्वजीवराशयो निःशङ्कं कुर्वन्ति। तत्तु निर्विवादं सत्यम्।

तस्य द्वौ पुत्रौ स्तः। प्रथमो रागकेशरी, द्वितीयो द्वेषगजेन्द्रः, तयोस्तु बहुविधः परिकरः। तस्य परिकरे बल–पराक्रमैरप्रतिहतशक्तयः क्रोध–मान–माया–लोभादिभटाः सन्ति। तयोः हिंसाऽ–सत्य–चौर्या–ऽब्रह्म–परिग्रहा अङ्गरक्ष-कतुल्याः परिचारकाः। द्वावपि तौ मिथ्यात्वा-विरतिप्रमादकषाययोगादिनैकचौरचरटैः स्वभावदशायै प्रयतमानान् योगिनोऽपि विचल-यतः।

किं बहुना? सर्वं मोहायत्तं भवति। न तत्र कोपि संदेहः। तत्प्रभावेण जीवानां विलोकनं, गमनं, चलनं, भोजनं, स्वपनं, वदनं, वस्त्रधारणं, स्वदेहालङ्कृतिकरणं, धनार्पणं इत्यादि सर्वं भवति। जीवा एवं स्वस्वभावं विस्मृत्य विभावेनैव रमन्ते। स्वसौख्यञ्च मन्यन्ते।



इदमदिष्टमदिष्टसाधनमिति कृत्वा सर्वमनाचारं सेवन्ते। अकरणीयं कुर्वन्ति। अवाच्यं वदन्ते। अगम्यं गच्छन्ति। अश्रवणीयं श्रुण्वन्ति। अपेयं पिबन्ति। अभोज्यं भुनक्ति। अपठनीयं पठन्ति। अगेयं गायन्ति। अवर्धनीयं वर्धयन्ते। अग्राह्यं गृह्णन्ति। निन्दनीयं स्थानमपि सेवन्ते। हानोचितं न जहति। दानोचितं न ददते। श्रवणोचितं न श्रुण्वन्ति। दर्शनीयं न पश्यन्ति, अदर्शनीयं पुनः पश्यन्ति। कर्तव्यं न कुर्वन्ति, अकर्तव्यं पुनः कुर्वन्ति।

अनेन कारणजातेन वर्धते रागः। करोति स रागः जीवान् विवशान्। ततो जीवा बहुप्रकारं कार्याकार्यविवेकविकलाः भवन्ति। ततस्ते जीवाः न किमपि चिन्तयितुं समर्थाः। स्वसुखमेव चिन्तयन्ति। न तु परसुखं, परदुःखमेव चिन्तयन्ति, **स्वार्थभावं च पोषयन्ति।**

रागेण चिन्तितवस्तुव्यक्तिजातसंपादने प्रवर्तन्ते। यदि संपादनकार्ये कोऽपि कथश्चित् विक्षेपं करोति तदा तं मोहराजः जनं कोपेन अन्धीकरोति। तत्र यदि सिद्धिः भवति तदा तदा अहङ्कृतिपङ्के निमज्जयति। यदि तत्र सिद्धि र्न भवति तदा मोहो जनः 'स्वस्मिन् सौजन्य-संतोष-समता-नम्रता-विवेक-समर्पण-दयादि गुणानां सङ्ग्रहोऽस्ति'इति दर्शयति, स्वकार्य-सिद्धिं च करोति।

यदि अहङ्कृति कार्ये सिद्धिर्भवति तदा तं लोभाख्यविदूषकेन नवं नवं नर्मस्थानं दर्शयित्वा मोहयति। ततो जनो नवां नवां स्वार्थसंपादन-बुद्धिमापादयितुं प्रयत्नं च करोति। तेन तस्य स्वार्थप्राप्तौ आकाङ्क्षा वर्धते। ततः यं यं पश्यति तं तं प्राप्तुकामः परं दुःखभाजनं करोति यदि स्वार्थः सिद्ध्यति तदा पुनः आकाङ्क्षा वर्धते, यदि पुण्यनिष्फलतया न सिद्ध्यति तदा परं दुःखभाजनं करोति च। इत्येवं नैकविभावदशावशाद् भानो! अस्मदात्मा बंभ्रमिति। एवं बहुधा विभावदशाऽस्ति। सा समये कथयिष्यामि।

।। इमि शम् ।।



# जैनं जयति शासनम्...

## ।। सुकृतसन्ततिः ।।

– श्रेयःदर्शी

साम्प्रतकालेऽपि सुकृतसन्ततिभिः स्वस्य आत्मानं, देहं, जीवनं च स्वर्णसदृशं समुज्ज्वलं कुर्वाणा बहुजनाः जगति सन्ति। न तत्र कोऽपि सन्देहः। स एव बृहत्तरश्चमत्कारः, ततः जीवानां सुकृतसंततयः पुनः पुनः स्मरणपथमानेयाः।

१) मनुष्यजन्मनि श्रमणधर्म एव श्रेयस्कर इति ज्ञात्वा वैराग्यं सम्प्राप्य एकया युवत्या षोडशे वर्षे संयमधर्मः स्वीकृतः, सञ्जाता च सा संयमसाधनायां तल्लीना। तपःसंयमवेयावृत्य ज्ञानोपासनागुरुभक्त्यादिसर्वयोगेषु कुशला जाता। सा रात्रौ प्रतिदिनं दशवादनान्तरं निद्राति। सार्धद्वादशवादनान्तरं निद्रां च त्यजति। तत्पश्चात् सा स्वाध्यायं, कार्योत्सर्गं, ध्यानादिकञ्च करोति। न तु निद्राति। तया सत्यसाधनायाः पराकाष्ठा प्राप्ता।

२) नैकवादविजयिनां श्रीवादिदेवसूरिणां गुरुवराः श्रीमुनिचन्द्रसूरिवराः अभवन्। तैः सम्पूर्णसंयमजीवने– भोजने ओदनस्य [1]आरनालीका गृहीता। किन्तु भोजने किमपि नान्यद् गृहीतम्। तन्महदाश्चर्यम्।

३) एका चन्दना नाम्नी श्राविका अस्ति। तया विंशतिवर्षपर्यन्तं प्रतिदिनम् अष्टादशवारं सामायिकव्रतं कृतम्। स्वजीवनं च धन्यातिधन्यं कृतम्।

४) पूर्वोपार्जितज्ञानोपासनाप्रभावेण सार्धद्विवर्षैकवयसा बालकेनैकेन प्रकृष्टबुद्धिप्रभावेन भक्तामरस्तोत्रं कण्ठस्थीकृतम्। अहो! निरुपमेया बुद्धिप्रतिभा।



५) आसीदेकमुसलमानयुवा तेन कदाचिज्जैनमुनिसम्पर्कात् जैनधर्मः स्वीकृतः। स जैनधर्माचरणेन स्वजीवनं धन्यातिधन्यं कृतवान्। तदा तस्य जनन्यादिभिः प्रोक्तं त्वया जैनधर्मः त्याज्यः। यदि नाऽत्यक्ष्यः तदा तुभ्यं पैतृकसमृद्धिः नैव दास्यामहे। तच्छ्रुत्वा मुसलमानयूना प्रोक्तं, यद् कार्यं तत् कुरूत, किन्त्वहं जैनेन्द्रधर्मं कदाऽपि न त्यक्ष्यामि। धन्यवादार्हा तस्य धर्मश्रद्धा !!!

६) एकेन ब्राह्मणपुत्रेण संयमं स्वीकृत्य यावत् सप्तसप्ततिवर्षपर्यन्तम् एकाशनं व्रतं कृतम्। तस्मिन्नपि त्रीणि द्रव्याण्येव गृहीतानि नान्यत्। अहो त्यागः।

।। इति शम् ।।

---

१) काञ्ची अथवा ओसामण–इति भाषायां

# नवं नवं सौन्दर्यम्.....

## स्त्रीणां नव नामनिरुक्तानि

– श्रेयःदर्शी

स्त्रीणां नव नामनिरुक्तानि –इति स्त्रीणां पर्यायवाचिनाम्नामनेकानि निरुक्तानि सन्ति। याभिः स्वस्थामगर्वपर्वततिरस्कृतिकरणैकप्रवणबलपौरुषवीर्यधराधरायमाणाः, विकच-नयनकमलः, विद्वज्जना अपि कामरागपरवशीकृताः तेषां च उपायशतसहस्त्रैः चारुवचनादिभिर्वधबन्धनान्यापातानि। ततस् तासां रागपाशंछित्वा निर्मुक्तभवनोपायः भावनीयः। यतः जगति तासां नाम्नाऽपि पुरुषा विह्वलीभवन्ति। ततस्तानि नाम निरुक्तान्यत्रोच्यन्ते। तद् दृष्टवा पाशच्छेदाय मनः संयमाधीनं कुर्यात्। तथाहि–

**नारी**– ''बलवत् पुरुषाणामपि नान्यः ईदृशोऽरिः अस्ति'' इति नारी। अथवा नारीसमो न नराणामरिरस्ति इति नारी।

**महिला** – ''नानाविधैः शिल्पकलादिभिः कर्मभिः मोहयित्वा महतामपि धनादीन् लाति'' इति महिला।

**प्रमदा** – ''प्रकर्षेण पुरुषान् मदोन्मत्तान् करोति'' इति प्रमदा।

**महिलिका** – ''लघुमपि प्रस्तावमुररीकृत्य महतीं हीलनामुत्पादयति जनयति'' इति महिलिका।

**रामा** – ''स्वकटाक्ष-बिब्बोक-हावभावदिभिः पुरुषान् रमयति'' इति रामा।

**अङ्गना** – ''पुरुषान् अनुरञ्जयति, प्रीणयति, अङ्गानुरागान् कुर्वति'' इति अङ्गना।

**ललना** – ''नानाविधेषु युद्ध-भण्डन-सङ्ग्रामाटवीषु ग्रहणशीतोष्णदुःखक्लेशादिषु पुरुषान् लालयति अर्थात् क्रीडा सक्तान् करोति'' इति ललना।

**योषित्** – यो योः नरः स, यां प्राप्य सीदति सा योषित्।

**वनिता** – ''पुरुषान् नानाविधै र्भवैः वर्णयति''। अथवा पुरुषान् नानाविधेषु भावेषु नयति'' इति वनिता।

दुःखस्य भयं नास्ति तथा सुखस्य
बहु लोभो नास्ति – स सद्गृहस्थः।

# परमपदपन्थाः...

## ।। धर्मप्रसाधको भवेन्नरः।।

– श्रेयःपथिकः

धर्मप्रसाधको भवेन्नरः – धर्मः सूक्ष्मबुद्ध्या ग्राह्यो भवति, न तु स्थूलबुद्ध्या। यदि स्थूलबुद्ध्या धर्मः कोऽपि गृह्णीयात्, तदा तस्य हस्ते धर्मनाम्नाऽधर्मोऽपि आपतेदिति। ततो न भवति तस्य भवनिस्तारः। इत्यतः धर्मप्रसाधकस्य लक्षणानि प्रस्तूयन्ते।

१) तत्राद्यः **'अर्थी'** – अर्थित्वं नाम धर्मप्राप्तिविषये तीव्रतरा समीहा। यदि अर्थित्वं न, तदा कथंकारेण धर्मप्राप्तिर्भवति? अर्थित्वेनैव धर्मप्राप्तिः स्यात्।

२) द्वितीयः **'समर्थः'** – सामर्थ्यं नाम शारीर–मानस–वीर्योल्लासः। धर्मकरणे सामर्थ्यस्याऽपेक्षाऽस्ति। यदि सा भवेत् तदा धर्मः सुखं सुखेन निर्वोढुं शक्यते।

३) तृतीयस्तु **'मध्यस्थः'** – माध्यस्थभावेन यदि धर्मः स्यात् तदैव हि धर्मो स्वस्य निस्तारकृद् भवति। निःस्वार्थभावतया माध्यस्थ्यभावमाप्नोति जीवः। ततः धर्मप्राप्त्यै माध्यस्थ्यभावेन स्थातव्यम्।

४) **'चतुर्थस्तु परीक्षकः'** – परीक्षकस्तावत् प्रथमं धर्मपरीक्षां कृत्वा पश्चादेव धर्ममाचरति। स्वर्णवत् कष–ताप–छेदै धर्मपरीक्षा भवति।

५) पञ्चमस्तु **'धारणा'** – धारणा इति धैर्यं; तया धर्मच्युतिः न भवति। ततः धर्मस्य विधिमार्गधारणाशक्तिरपि समीचीना भाव्या। ततः धर्मसंशुद्धि भवेत्। ततो धारणाशक्तिविषये मनः प्रयोक्तव्यम्।

६) षष्ठः **'विशेषज्ञः'** – धर्मरहस्यधर्मोपनिषद्धर्ममाहात्म्यानां ज्ञाता विशेषज्ञतां प्राप्नोति। शुद्धधर्मं च करोति। ततो विशेषज्ञता विशेषेण प्राप्तव्या।

७) सप्तमः पुनः **'अप्रमत्तः'** – आलस्यभावरहितो नरो धर्मं साधयति। सर्वदोषमूलमालस्यं, सर्वपापस्थानककरणं चालस्यं, तत् तु प्रमादरूपम्। तत् पञ्चप्रकारेण विज्ञाय सर्वथा त्याज्यम्। पञ्च प्रकाराः यथा – १) निंद्रा २) विकथा ३) मद्यं ४) विषयः ५) कषायः।

८) अष्टमः **'धीरः'** – दुःखापत्तौ, प्रातिकूल्ये च धर्मं न त्यजति स पुरुषः धीरः। धैर्येण धर्मः यावत्कालं स्थिरीभवति, ततो धीरेण भाव्यम्।

९) नवमस्तु तु **'जितेन्द्रियः'** – तेनैव धर्मसिद्धिः यदि पूर्वाणि सर्वलक्षणाणि स्युः।

किन्तु यदि जितेन्द्रियता न संभवेत्। तदा कथं धर्मसिद्धिः? नैव इति।

ततः स्वेन्द्रियपराधीनता प्रथमं त्याज्या।

इत्येवं धर्मप्रसाधकलक्षणानि स्वजीवने स्थिरीभावकरणाय प्रयासः कर्त्तव्यः।

।। इति शम् ।।





# मधुरम् मधुरम्...

## ।। चिन्तनम् ।।

– श्रेयःपथिकः

**संसारः स्मशानम् – संसारः** देव–मनुष्य–तिर्यंच–नारकादि चतुर्गत्यात्मकः, अथवा विषय–कषायात्मकः, अथवा गृह–पत्नी–परिवार–धनादि भौतिकसुखसाधनस्वरूपः।

स तु स्मशानम्। यत्र मृतानां देहाः दह्यन्ते। ननु? न सम्भवतीयं वार्ता, संसारे न मृतदेहाः दृश्यन्ते, कथं तर्हि स्मशानोपमोच्यते?

अत्र आह – स्मशाने तु निर्जीवाः देहाः दृश्यन्ते किन्तु संसारे तु जीवन्तः अपि जीवा मृतप्राया एव दृश्यन्ते।

यथा जगति पदार्थो द्विधा – सचेतनाऽचेतनश्च। स्वस्य सत्यसुखमार्गं विजानाति स सचेतनः, यथा जीवः यो स्वस्य सत्यसुखमार्गं न जानाति स अचेतनः, यथा वस्त्रवसत्यादि पुद्गलजातः। यदि जीवोऽपि स्वस्य सत्यसुखमार्गं न जानाति तदा स अचेतनसदृशो भवति, स्वमजानानाः जीवाः संसारे बहवश्च सन्ति। ते तु जीवधर्मविकला मृतप्रायाः इत्युच्यन्ते।

ततः संसारः स्मशानं, सकलाः शरीरसञ्चरणादिक्रियाः कर्तारोपि जीवाः मृतप्रायाः, तेषां स्थानं संसारः श्मशान।

अथ स्वस्य सत्यसुखमार्गः मृग्यः। चेतनभावश्च प्राप्तव्यः।

।। इति शम् ।।

स्वमुखे स्वदुःखानि कदापि न वदेत्,<br>–स.जनः महान् कथ्यते।

# आत्मैश्वर्यप्राप्त्युपायः...

## ॥ रुचिप्रबन्धः॥

– श्रेयस्करः

रुचिः = आदरः, प्रबलसमीहा, कार्यैकतल्लीनता।

सा रुचिः सम्यक्त्वप्राप्तिरुपा उच्यते। अथवा रुचिर्नाम श्रद्धा = करुणाभिलाषः। सा दशविधा–

१) **आद्या–निसर्गरुचिः** – विनोपदेशं स्वभावेन या धर्मं प्रति रुचिः सा। न तु व्यवहारेण किन्तु शुद्धनापेक्षया जीवाजीवादितत्त्वं स्वीकारोत्यत्र, तत् निसर्गरुचि–सम्यक्त्वमित्युच्यते।

२) **द्वितीया–उपदेशरुचिः** – जीवानां तीर्थकरादीनां सदुपदेशदानेन तद्ग्रहणेन च या धर्मं प्रति रुचिः प्रकटाभवति सा उपदेशरुचिः।

३) **तृतीया–आज्ञारुचिः** – आज्ञायां प्रतिबद्धता, सा आज्ञायां प्रतिबध्नाति जीवं, जिनाज्ञा–गुर्वाज्ञयोः लयलीनं करोति, विना ज्ञानमपि सा भवति। यथा मासतुषमुनिः विना ज्ञानं गुरुपारतन्त्र्येण, गुर्वाज्ञाप्राधान्येन च केवलज्ञानी सञ्जातः सा आज्ञारुचिः।

४) **चतुर्थी–सूत्ररुचिः** – सूत्रे=ज्ञाने समादरभावः। यथा सूत्रादीनां पुनः पुनः अध्ययनं – पठनं – पाठनं – तद् भावेन च संस्कारः सुदृढो भवति। पुनः पुनः ज्ञानाध्ययनेन सूत्रे = ज्ञानेरुचिः दृढा भवति। ततश्च जीवादिपदार्थोपरि श्रद्धा प्रवर्धते, ततः पुनः पुनः सूत्ररुचिः भाव्या।

५) **पञ्चमी–बीजरुचिः** – यथा अल्पेनापि बीजेन प्रभूततरा धान्यनिष्पत्तिः भवति, तद्वत् जीवादिविषये एकेनाऽपि तत्त्वबोधेन प्रभूततरस्तत्त्वबोधः प्रजायते सा बीजरुचिः। अथवा तैलबिन्दु र्जले यथा विस्तारमेति। तद्वत् बीजरुचिवानपि अल्पेन तत्त्वबोधेन प्रभूततरं तत्त्वबोधं प्राप्नोति।

६) **षष्ठी–अभिगमरुचिः** – सकलागमं प्रति रुचिः साऽभिगमरुचिः। येन सम्यक्त्वे दार्ढ्यं भवति। ननु? इयं तु सूत्ररुचिषु समागता, ततः कथं पुनः प्रोक्ता? उच्यते=सत्यं किन्तु सा सूत्रमात्ररुचिरुपा। इयं त्वर्थप्रधाना। अतः अनया निर्युक्ति–भाष्य–चूर्णि–टीकादिषु विशेषरुचिः भवति। यतः सूत्रादर्थो विशेषतरबोधप्रधानः, तस्य विशुद्धिकारकत्वात्। अभिगमरुचिः सूत्राददतिरिक्तेति ज्ञेयम्।

७) **सप्तमी–विस्ताररुचिः** – सविस्तरजिनवचनबोधप्रेप्सा, सा विस्ताररुचिः। यथा प्रमाण–नय–निक्षेपादिभिः जिनकथितवचनं गुण–पर्यायैः सविस्तरं बोद्धुमिच्छा सा विस्ताररुचिः।

८) **अष्टमी–क्रियारुचिः** – सा ज्ञानाचार–दर्शनाचार–चारित्राचार–तपाचार–वीर्याचार–विनय–वेयावृत्य–नम्रतादिसदनुष्ठानेषु रुचिः।

ननु? आज्ञारुचिः क्रियासु प्रवर्तते, ततो आज्ञा–क्रिययोः साम्यं जातम्, न भेद इति न वाच्यम्? यतः तत्र तु आज्ञाप्राधान्यम्। अत्र तु तन्न, स्वभावेन तन्महिम्ना प्रवर्तते।

९) **नवमी–संक्षेपरुचिः** – सङ्क्षेपेण या धर्मजिज्ञासा सा। यस्य जैनदर्शने नास्ति गहनो बोधः, परदर्शने तु कदाग्रहराहित्यम्। स मोक्षगमनैकलीनः, स संक्षेपरुचिसम्यक्त्ववान् कथ्यते। यथा चिलातीपुत्रो धर्मविषये अनभिज्ञोऽपि धर्मेच्छया ''उपशमो विवेकः संवरः'' इति पदत्रयेण तदुपरिचिन्तनेन संवेगभावं सम्प्राप्य, प्रवर्धमानपरिणामोऽल्पेन कालेन शिवं गतः। इति सङ्क्षेपरुचिः ज्ञातव्या।

१०) **दशमी–धर्मरुचिः** – धर्मे या रुचिः सा धर्मरुचिः। तत्र मात्रधर्मशब्दं श्रुत्वा यस्य धर्मं प्रति प्रीतिर्भवति। तत्प्रीत्या च तदाराधनादिभिः धर्मतत्वं प्राप्नोति, सा धर्मरुचिः इति दशमी रुचिः वर्णिता।

इत्थं रुचिसञ्ज्ञाबन्धं संज्ञाय स्वजीवनेऽपि निःसर्गादिरुचिभ्यः प्रयतितव्यम्।

।। इति शम् ।।

# स्वादु-स्वादु
# शुद्धं-शुद्धं
# सुखावहं-शुभावहं

– श्रेयःश्रीः

## ।। कषायविजयः।।

**- उवसमेण हणे कोहं -** उपशमभावेन क्रोधो विजेतव्यः। विनोपशमं क्रोधो न विश्यति। उपशमभावः सर्वत्र समभावेन समागच्छति। अनुकूल प्रतिकूलभावयोः रागविरागौ यदिनिर्गच्छतः, तदैव स्वात्मनि उपशमभावः प्रविशति। तत उपशमभावः पुनः पुनः निसेवनीयः, तत एव क्रोधो विनाशमेति।

**- माणं मद्दवया जिणे -** मानः = अहंकृतिः। तस्य जयार्थं मार्दवभाव आनेतव्यः। विना मार्दवभावं न नश्यति अहंकृतिः। मार्दवः = मृदुः कोमलः भावः, परगुणप्रेक्षणदृष्टिः, जीवमात्रेषु मैत्रीभावः, तमा पादयिता। यत एव मानः स्वात्मनः निर्गच्छति।

**- मायं चज्जवभावेण -** आर्जव = सरलभावेन मायाविजयो भवति। आर्जवभावः पुनः शठताया त्यागेन प्रकटयति। आर्जवगुणप्रापणेन यत् कार्यापादानविषयमस्ति, तत् सर्वस्य संसाधनं भवति। ततः पुनः पुनः आर्जवभाव-प्रापणोद्यमवता भाव्यम्।

**- लोभं संतोसओ जिणे -** सन्तोषभावं उररीकृत्य लोभो विजेतव्यः। सन्तोष आत्मसात्कर्तव्यः। यतः सर्वनाशकरणसामर्थ्यं लोभस्यैवास्ति। ततः सन्तोषभावः समासेवनीयः। यतः सन्तोषेण जीवो झटिति लोभोपरि विजयमाप्नोति। सन्तोषः सर्वत्र फलदायको भवति। सन्तोषस्त्वाहारे, वस्त्रे, पात्रे, गृहे, धने, विभवे, पत्न्यादिपरिवारे, देहे, स्वजने, कर्मकरे, सर्वत्र सन्तोषः कर्तव्यः। अन्यथा लोभः सर्वत्रापत्तिं सर्जयति।

## मार्दवः

।। मा ।।

सम्यग्ज्ञानम्।

।। र् ।।

रतिः = आनन्दः – हर्षः
इति, तेन
ज्ञानानन्दः फलितः

।। द ।।

दया परिणामः।
प्रकटयति।
विना ज्ञानं दया का?
दया कस्य?
दया कीदृशी?
इति न ज्ञायते।

।। व ।।

वर्तनं – वृत्तिः = प्रवृत्तिः
ज्ञानेन दयापूर्वकं प्रवृत्तिर्भवति।
मार्दवः = मृदुभावः = कोमलभावः = कारुण्यभावः।
मार्दवभावे सत्येव प्रवृत्तिः शुभा भवति नान्यथा।

।। इति शम् ।।



# स्त्रीणां चतुर्नवतिः स्वरूपविशेषताः

– श्रेयःसखा

सर्व–क्षेत्रे सर्वकाले पुरुषाणां स्त्रीजातिभिरापत्तिरापततिः। ततः सर्वैः पुनः पुनः स्त्रीभिः सावधानमनसा स्थातव्यम्। तत एव पूर्वाचार्यैः तासां वास्तविकं स्वरूपं प्रदर्श्य भव्यात्मनां विषयेषु वैराग्योत्पादनाय, सद्भावनोपढौकनाय च बहुधा प्रयत्नातिशयः कृतः। अत एव श्रीगच्छाचारप्रकीर्णके ग्रन्थे, चिरन्तनाचार्यरचिततन्दुलवेयालियसूत्रे च स्त्रीणां चतुर्नवति स्वरूपविशेषताः संदर्शिताः सन्ति। तत्तु संवेगभावप्रवर्धकत्वादत्र सव्युत्पत्त्या विवेच्यते। तत्र आद्या

**१) प्रकृतिविषमा** – प्रकृत्या = स्वभावेन विषमा, विरुद्धा, विरुपा अथवा विसदृशा अथवा विषसदृशा प्रकृतिः, तया युक्ता न कोऽपि तस्याः पारं गच्छेत्। यतः सा अन्यं पश्यति, अन्येन सार्धं वदति, पुनरन्यमिच्छति, अन्ये च स्नेहं करोति, सद्भावं तु अन्यं दत्ते, अन्येन सार्धं गच्छति, ततः सा विसदृशप्रकृतिः विषम प्रकृतिः। ततो न कस्यापि विषमस्वरुपायाः तस्याः पारं प्राप्तुं सामर्थ्यं भवति। तत्तु आवश्यकोक्तं ज्ञायते। वक्रस्वभावजा प्रकृतिः तेन सा प्रकृत्या विषमा इत्युच्यते।

**२) प्रियरोषणा** – स्वप्रियव्यक्तिषु रोषावेशकरणस्वभावा। अथवा आक्रोशकरणस्वभावा। न कदापि प्रियवाचं वक्ति। यतः तं जनं स्वायत्तं ज्ञात्वा स्वेष्टकार्यकरणव्यग्रा स्वाऽऽज्ञानुरुपं कार्यं कारयति। यदि कार्यं न भवति, तदा तस्योपरि रोषमपि करोति। तत्र न कापि शङ्का करणीया। वस्त्रा–ऽऽभरणालिप्सुः पदे पदे रोषं करोति, अतः रोषकरणस्वभावा सा प्रियरोषणा इत्युच्यते।

**३) प्रियवाणीवल्लरीः** – प्रियेषु रोषणशीलाऽपि सा प्रियवचनस्य वल्लरीः इत्युच्यते। सास्तु नरमाकर्षति। तद्वचनेन च नरः सर्वं कार्यं करोति । सा विरोधिनमपि स्वायत्तं करोति, स्वमधुरशब्दविन्यासेन अथवा 'सर्वेषामहं भवेयम् प्रिया' इति मत्वा 'अहं भवदाश्रया, अहं भवन्तं विनाऽनाश्रया' इत्यादि वचनचाटुभिः सर्वेषां हृदये 'इयं ममैव, न मां विना अन्यं समीहते' इत्येवं भावं प्रकटितं करोति। वास्तवेन सा न कस्याऽपि इति।



यदि स्त्री जीवनपर्यन्तं स्थिरमनोवाक्काययोगेन कस्यापि भवति तदा भवेदाश्चर्यम्। तत्र जिनपालितदृष्टान्तमस्ति। यथा द्वौ भ्रातरौ प्रभूतं धनं स्वगृहे विद्यते तथापि स्वोपार्जितधनार्थं गतौ। मध्ये समुद्रं पोतः त्रुटितः। सर्वं जले निमग्नं। द्वयोः भ्रात्रोः हस्ते फलकमेकं समागतं। गृहीतं। तेन च तौ रत्नद्वीपं प्राप्तौ। तत्र बहुधानि जनमृतकानि सन्ति। किन्तु किं तस्य कारणं न ज्ञातम्। तदा तत्र एकं पुरुषं मरणावस्थानिकटवर्तिनं दृष्ट्वा पृष्टं ताभ्यां, तवेदृशी अवस्था केन कृता?

समासन्नमृत्युना तेन प्रोक्तं – अस्मिन् रत्नद्वीपे ये नराः त्रुटितपोतेन तीरं प्राप्नुवन्ति, तैः सार्धं प्रीतिभावं प्रदर्श्य एका देवी प्रभूतान् भोगान् भुङ्कते। पश्चात् तेषां देहस्य रुधिरं गृहीत्वा, तान् इत्येवं प्रकारेण मारयति। मम सदृशः स म्रियते।

द्वावपि भ्रातरौ भयभीतौ सञ्जातौ। ताभ्यां पुनः पृष्टं, किं अस्त्यत्र कोऽपि तरणोपायः? तदा, तन्नरेण प्रोक्तं। बाढमस्त्येकोपायः। तस्य निसेवनेन भवति स्वरक्षणं। अस्त्यत्र एक रक्षस् सः अमुकनियतदिनं ये अस्मात् स्थानादन्यत्र गन्तुं समीहते तं तत्र यथास्थानं मुञ्चति। किन्तु मार्गे सा देवी पृष्ठलग्ना सानुकूलेन चाटुवचनेन जनमाकर्षति। यः पश्चात् पश्यति, तं खड्गेन रक्षो मारयति। अधस्तात् पातयति। ततस्तत्र सावधानमनसा गन्तव्यं। न तु तस्याः चाटुवचनेन विषसमविषये समाकृष्टव्यम्। इदमुक्त्वा स मृतः।

द्वावपि भ्रातरौ तत्रैव वसतः। देवी समागता। सुन्दराणि मधुराणिफलानि दत्ते। ताभ्यां सार्थं भोगं भुङ्क्ते। तयोः सर्वमिष्टं कुरुते। एवं कालो गच्छति। अथ तौ प्रतीक्षेते रक्षसम्। स रक्षस् समागतः। ताभ्यां गमनेच्छा प्रकटीकृता। रक्षस् गृहीतवन्तौ। ताभ्यां सार्धं प्रस्थितवान्। मार्गे देवी समागता। सा चाटुवचनानि वक्ति। द्वावपि भ्रातरौ स्थिरमानसौ भवतः। किन्तु तत्र देव्याः पुनः पुनः चाटुवचनेन जिनपालितः मोहितः। स्वभ्रात्रा बोधितोऽपि, तां प्रति रागातुरः स, पश्चाद् यावता पश्यति। तावता रक्षसा खड्गेन मारितः, स मरणंशरणं च प्राप्तवान्।

इत्येवं स्त्रीचाटुवचनविन्यासेन पुरुषाणां सर्वस्वं स्वात्मस्वं च विलुप्यते।

ततः सा प्रियवचनवल्लरी कथिता।

।। इति शम् ।।

क्रमशः

कमपि दुःखिजनं दृष्ट्वा,
असहिष्णुता – सा गृहस्थता।



## काव्यकौतुकम्-

### ॥ पू.आ.श्री प्रेमसूरिगुरुषट्त्रिंशदुपमा नवकम् ॥

– श्रेयःसद्मा

(शार्दूलविक्रीडीतम्)

सद्[१]रत्नै र्गुणराशिभि र्विलसते, गाम्भीर्य सम्पूरितः,
तृष्णा[२]हृत् मलहृत् स्वभा[३]वसुभगः, पावित्र्यभृत्, साम्यभृत्।
पुण्यप्रौढिमसत् प्र[४]तापप्रवरः, श्रीप्रेमसूरिर्गुरुः,
अ[१]ब्धीवामृत[२]वन्निशाक[३]रनिभः, रेजे सदा भा[४]नुवत् ॥१॥

निर्लेप[५]ः सुरभिः सुशीलललितः, सद्भा[६]ग्यपूर्णात्मकः,
मा[७]ङ्गल्याभिविलासलास्यललितः, छेदादिभिः शुद्धिभृत्।
तेजोभिश्च प्रदि[८]प्तिमानघहरः, श्रीप्रेमसूरिर्गुरुः,
पद्[५]माभः निधिसा[६]म्यभृत् कनक[७]वत्, वैश्[८]वानराभः गुरुः ॥२॥

श्रद्[९]धा सौरभशीलसुन्दरतनुः, सन्मा[१०]र्गधीः सर्वदा,
नानाभा[११]वविभावसर्जनविसर्गाऽऽढ्यो महोत्साहकृत्।
सूक्ष्मस्थू[१२]लपदार्थदर्शनकरः, वात्सल्यवारिधरः,
पु[९]ष्प–प्रा[१०]ज्ञ–सु[११]पर्व–ने[१२]त्रसदृश!, श्रीप्रेमसूरे ! जय ! ॥३॥

आज्ञैश्वर्य[१४]समृद्धिसारसहितः, सत्पर्षदासंयुतः,
औदार्ये[१३]ण विशालधीः, शुभगुणै[१४]रानन्त्यधारी गुरुः।
कर्माराति[१५]समूहनाशनपरः, सर्व[१६]सहस्सर्वदा,
पृथ्वी[१३]पालसमो गुरुः गग[१४]न वत्, सत्[१५]सैन्यवत् पृ[१६]थ्वीवत् ॥४॥

नित्यं ज्ञानयुता वरा गुणरति, र्दाति प्रमा[१७]दः सदा,
शश्वद् योऽप्रतिब[१८]द्धभावकलितोरागादिभावैः परः।
संसाराम्[१९]बुधितारको मुनितते[२०]ः संसर्जकः श्रीगुरुः,
य भारं[१७]ऽसमं सदा पवन[१८]वत् नौवत्[१९] जगत्स्र[२०]ष्टृवत् ॥५॥



शौर्यं यो [२१]दधते सदैव चरणे, सज्[२२]ज्ञानयात्राऽऽवहः,
धौरेयो जिन[२३]शासने गुरुवरो, धर्मे [२४]सदा निश्चलः।
जीयाद् वीरजिनेन्द्रशासनरतिः, श्रीप्रेमसूरीश्वरः,
[२१]सिंहाभो गज[२२]वत् तथा वृषभ[२३]वत्, श्रीमेरु[२४]वन् मे गुरुः ॥६॥

श्रीनिः[२५]श्रेयसपत्तनाप्तिसुखकृत्, [२६]मांगल्यलीलालयः,
[२७]श्रीमाध्यस्थ्यमहालयैः परिणतिप्राकारसंशोभितः।
[२८]साम्याकाशविहारभालसमनाः, तत्त्वे तरौ वासकृत्,
[२५]यान-[२६]स्वस्तिक-[२७]द्रङ्ग[२८]पक्षिप्रतिमः, श्रीप्रेमसूरे ! जय ॥७॥

[२९]कल्याणाम्बुजराशिवाञ्च कमलाऽऽवासः सदा शोभनः,
[३०]हेयज्ञेयविवेकचञ्चुविलसन्, मौने मृणाले रतः।
ज्ञानाऽऽस्वादकरः [३१]क्षमारसधरः, मिथ्या[३३]तमोनाशकः,
पद्मद्रह[२९]मराल[३०]वच्च [३१]फलवत्, [३२]दीप्रप्रदीपोपमः ॥८॥

सच्चारि[३३]त्रसुचारुविग्रहधरः, [३४]शीलाङ्गशील्पैः शुभः,
आत्मान[३५]न्दकृताश्रयः सुविमलः, [३६]भव्याङ्गिगच्छायाप्रदः।
''श्रेयोदर्शन''मस्तु मे परमदं, श्रीप्रेमसूरिस्तवात्,
[३३]स्त्रीवन्[३४]मन्दिरवत् सदा [३५]गृहसमः, सद्[३६]वृक्षवन् मद्गुरुः ॥९॥

धर्मसामग्रीं लब्ध्वा आनन्दं -
अनुभवति -स महानुभावः।



# वैविध्यम्.....

## ।। लोके त्रीणि न दृश्यन्ते।।

- श्रेयःसेतुः

**जलमध्ये मत्स्यपदं, खे खगानां पदानि च।**
**महिलानां हृदयमार्गः, त्रीणि लोके न दृश्यन्ते।।**

जलमध्ये मत्स्यपदं न दृश्यते। गगने पक्षिणां पदपङ्क्तिः न दृश्यते। महिलानां हृदयमार्गो न दृश्यते।

**प्रथमम् –** जले मत्स्यः केन मार्गेण गतिं करोति तन्न ज्ञायते। एतद्दृष्टान्तेनाऽस्माकं शिक्षा प्राप्यते यत् तथाहि– 'अस्माकं जीवनमार्गः कीदृशः' इति अस्माभिः कदापि न चिन्तितं। तत्तु न सुष्ठु। सुयोग्यजनानां हस्ते अस्मज्जीवनयानं समर्प्यते। तन्मार्गदर्शनेन स्वमार्गनिश्चयः क्रियते, तदा मार्गः सरलो भवति।

**द्वितीयम् –** पक्षिकाणां पदपङ्क्तिः गगने न दृश्यते। सत्यं, खे गमनमार्गं तद्गामिनः एव जानन्ति। तद्वदस्माभिः कार्यपद्धतिः न कदा ज्ञायते। यथोक्तम् – ''ज्ञानी, ज्ञानिनिश्रितश्च स्वकार्यं साधयति'' इति ज्ञात्वा स्वस्वकार्यजातं योग्याय महते जनाय ज्ञापितव्यं भवति। न तु पक्षिकाणां पदपङ्क्तिवददृश्यं कार्यजातं कर्तव्यम्। तत् तु चराचरविश्वे सर्वेषां प्रतीतम्।

**तृतीयम् –** स्त्रीणां हृदयमार्गः सर्वत्र सर्वेषां प्रतीतः, तथापि पुरुषाः स्त्रीसम्बन्धं विना न तिष्ठन्ति सर्वथा सर्वदा तं वाञ्छन्त। विषयाभिलाषिता रागाधीनता च जीवान् सर्वं कार्यं कारयति। जगति स्त्रीणां मनसां पारं न कोऽपि गच्छति। तस्याः कुटिलतादिदोषराशीनां लवोऽपि दृग्गोचरो भवति सा कटाक्षादिभिः सर्वं जगत् स्वायत्तं करोति। सा स्वरागे सर्वानन्धी करोति।

यदि तस्याः दोषलवोऽपि न जानन्ति नराः, तर्हिं कथं तस्याः हृदयमार्गः ज्ञायते तैः ? ततः ''तस्यै दूरतः शतशः सहस्रशः नमस्कार'' इति कृत्वा सर्वथा सदैव तस्याः दूरं स्थातव्यम्।

।। इति शम् ।।

यः आपत्तौ धीरः,
संपत्तौ गर्वरहितः
परदुःखे सहायं करोति –
स पुरुष 'पुरुषः'।

# वैविध्यम्.....

## ॥ तालपुटं विषम् ॥

– श्रेयःसेतुः

विभूषा स्त्रीसंसर्गश्चः, प्रणीतरसभोजनम्।
नरस्याऽऽत्मगवेषिणः, विषं तालपुटं यथा॥

तालपुटं नाम विषं, तालुवेधकम्। यदा तद् विषं तालौ स्थाप्यते, तदाऽल्पेनैव समयेन तालुं भिद्यते। तालुं स्फोटयति इति तालपुटमुच्यते। यथोक्तम् – ''गवेसीणं त्तिण्णि वज्जनीयम्'' आत्मगवेषिभिः त्रीणि वर्जितव्यानि। प्रथमं तावत् विभूषा, द्वितीयं स्त्रीसंसर्गः, तृतीयं पुनः प्रणीतरसभोजनम्। एतत्त्रयं आत्मगवेषिणः नरस्य तालपुटंविषसदृशम्, ततस्तेन नरेण पुनः पुनः सावधानमनसा स्थातव्यम्।

**तत्र विभूषा** – स्वदेहशोभा यथा–'एष्वहं शोभमानो भवेयम्'इति कृत्वा नरः पुनः पुनः स्वशोभां करोति । सा तु स्वं परं च मारयत्येव। यतः स्वविभूषया स्वोपरि स्वस्य परेषां च रागातिशयो वर्धते, ततः सा तालपुटविषसदृशमिति सद्भिः मन्यते।

**स्त्रीसंसर्गः** – स्त्रीणां संसर्गः संबन्धः आत्मगवेषिणा मोक्षमार्गगवेषकेन सर्वथा स वर्ज्यः। यतस्तत्र बहुधा दोषाः ज्ञानिभिः दृष्टा प्रोक्ताश्च। यतः उक्तं नारीनागिणीनां परिचयः न कर्तव्यः सुसाधुभिः। यो न करोति स हि शिवमन्दिरं पश्यति। ततः स दूरतः परिहर्तव्यः।

**प्रणीतरसभोजनं** – यतो यदि रसनापुष्टि र्भवेत् तदा किं न स्यात्? अपि तु सर्वेन्द्रियाणि विकसन्ति। स्वं स्वं सुखप्रायोग्यं वस्तुजातं मार्गयन्ति। तत् प्राप्तौ नरः मायां करोति। तदा यदि कोऽपि विक्षेपं कुर्यात् तदा स क्रोधं करोति। यदि सफलताप्राप्तिस्तदाऽहङ्कारं वितनुते। ततः सर्वथा प्रणीतरसभोजनं मोक्षगवेषिणा नरेण सन्त्याज्यं तालपुटविषवत्।

॥ इति शम् ॥

मन–वचन–कायैः पञ्चमहापापेभ्यः
विरमयति,–सा आर्यसंस्कृतिः।

## साम्प्रतम्....

### ॥ ज्ञानोपासना॥

– श्रेयःसद्मा

ज्ञानोपासना त्रिविधेन करणेन भवति। प्रथमं तावत् ज्ञानसम्पादनकरणेन, द्वितीयं तुं ज्ञानाराधनाकरणेन, तृतीयं तु ज्ञानविराधनाऽकरणेन भवति।

पूर्वमस्माभिः दृष्टा ज्ञानाशातना। ज्ञानसम्पादनमद्य प्रभूतप्रयत्नातिशयेन भवति। किन्तु तन्निष्फलमेव यदि तद् आत्मलक्षी न भवति किन्तु जीवं जडप्रायं करोति, जडः पुद्गलं, आत्मनः परः, यज्ज्ञानेन जीवः स्वं न जानाति, परमेव विजानाति, स्वं विना परं ज्ञात्वा स किं करिष्यति? अर्थात् न किमपि।

**ज्ञानसम्पादनं** तु विधिपूर्वकं कार्यम्। पाठकस्य स्थानम् उपरितनं कार्यम्। छात्रस्य पुनरधस्तनस्थानं, पाठकः यद्युत्तिष्ठति तदा छात्रा अपि उत्तिष्ठन्त्येव। यदि नोत्तिष्ठन्ति तदा विनयगुणनाशः भवति। पुनश्च विनयगुणनाशेनाऽन्ये गुणाः आत्मनि न प्रविशन्ति। यतः ज्ञानप्राप्तौ विनयगुण एवाद्यः। यदि विनयो न भवति तदा प्राप्तज्ञानेन वैगुण्यं भवति। वदन्ति विपश्चितः स्तत्र ज्ञानं न भवति यत्र पादयोः उपानहौ, ततोऽज्ञानमेव वर्धते, न तु ज्ञानम्। अद्य तु ज्ञानसंम्पादनकार्यं बृहत्तरप्रमाणेन भवति, किन्तु तदज्ञानस्य वर्धकम्। न तु ज्ञाननस्य वर्धकम्–यतः ज्ञानसम्पादनकार्यं विना विनयेन भवति। ज्ञानसंपादनं तु भारतवर्षीयप्राचीनसंस्कृत्यात्यैव कर्तव्यम्। अधुना तु ज्ञानसंपादनप्रवृत्तिः पाश्चिमात्यसंस्कृत्या भवति, सा त्वत्यन्तं शोचनीयविषया।

अथ **ज्ञानाराधनाकरणं** – ज्ञानस्याप्याराधना कर्तव्या।

ननु – आराधना नाम किं?

उच्यते – आसमन्तात् राध्यते – सेव्यते – पूज्यते यज्ज्ञानम् अनया सा प्रवृत्तिः ज्ञानाराधना। तस्याः करणं तदाराधनाकरणं। सा ज्ञानाराधना बहुविधा भवति। प्रतिदिनं ज्ञानपूजनं, वन्दनं, नमनं, लेखनं, नवं नवं ज्ञानसम्पादनं, ज्ञानसाधनस्य योग्यस्थाने स्थापनं, पुनः पुनः निभालनं, तदाशातनानिवारणं, ज्ञानं सौभाग्यपञ्चमीतिथौ ''या लोके लाभपञ्चमी इति उच्यते'' तद् दिनादारभ्य विशेषेण आराध्यम्, एकपञ्चाशत् लोगस्ससूत्रस्य कायोत्सर्गः कर्तव्यः, एकपञ्चाशत् खमासमणादीनि दातव्यानि। 'ॐ ह्रीं नमो नाणस्स', इति मन्त्रस्य विंशतिः माला गण्यते। सौभाग्यपञ्चमीदिनादारभ्य प्रतिपञ्चमीदिने उपवासः कर्तव्यः। योग्यनरस्य ज्ञानप्राप्ति सन्तस्य च ज्ञानार्पणं कर्तव्यम्।

ज्ञानवद् ज्ञानिनां ज्ञानप्रदातृणामपि परया प्रीत्या भक्तिः कर्तव्या। तं प्रति बहुमानं, 'मम ज्ञानं तैर्दापितं' इति ज्ञानदातृणामनिह्नवनम्। तस्य च पुनर्प्रसंशनम्। पुनश्च ज्ञानाशातनानिवारणमपि ज्ञानाराधनाकरणमेवेत्यपि भावनीयम्।

अथ **ज्ञानविराधनानिवारणं** - साम्प्रतं तु तत् कार्यं कथं करणीयमिति विचारणीय विषयः। यतः तत्तु दुष्करं, अधुना तु सर्वं वस्तुजातं लेखनेन संयुतमेव प्राप्नोति। तत्तु न ग्रहीतव्यम्। यदि साम्प्रतमपि प्रयत्नातिशयो भवति तदा स निरक्षरं वस्तुजातं प्राप्नोति नरः।

ज्ञानविराधना निवारणे तु -

साक्षरे स्थाने न स्थातव्यम्।
साक्षरे स्थाने न गन्तव्यम्।
साक्षरे पात्रे भोजनं न कर्तव्यम्।
साक्षरं वस्त्रं न परिधातव्यम्।
मौनं पुनः पुनः सेवनीयम्।
अवसरे एव मितं वक्तव्यम्।
न वाचालेन भाव्यम्।
जननी-जनकाद्याप्तजनानां वचनापलापः न कर्तव्यम्।
गुरुजनवचनं स्वीकर्तव्यम्।
तेषामनुचितः प्रत्युत्तरो न दातव्यः।
तदाज्ञा स्वीकरणीया एव।
ज्ञानप्रदातारं प्रति विनयः सेवनीयः।
ज्ञानिनामपि पुनः पुनः विनयः कर्तव्यः।

इत्यनेन ज्ञानसंम्पादनकरणेन, ज्ञानाराधनाकरणेन, ज्ञानविराधनानिवारणेन ज्ञानोपासना भवतीति।

ज्ञानोपासना हि जीवनमूल्यम्।
ज्ञानोपासना हि जीवनरहस्यम्।
ज्ञानोपासना हि जीवनोपनिषद्।
ज्ञानोपासना हि जीवननिदानम्।

ज्ञानोपासनया राग-द्वेष-कलह-स्वार्थ-परनिन्दा-जीवहिंसा-विषयोपभोगादिषु विरतिर्भवति। स्वात्मचिन्तनं वर्धते। परचिन्ता हीयते। कर्तव्याकर्तव्यतायाः बोधो भवति। निस्पृहभावः स्फुरति। निरपेक्षभावोऽनुभूयते। विषयसुखासेवनभावना लघीयसी भवति । विनयगुणः समुपजायते । प्रकटति विवेकभावः। नम्रता वर्धते। स्वदृष्टि र्निर्मलीभवति । स्वदोषः प्रेक्ष्यते। परेषामल्पतरोऽपि गुणः उररीकुरुते। अतः स्वायत्तं करोति निरन्तरं नवं नवं गुणजातम्।

इत्येवं प्रकारेण पुनः पुनः ज्ञानोपासना कर्तव्या। न तत्र प्रमादलेशः कर्तव्यः।

।। इति शम् ।।

यः मनसो विजेता-स एव श्रेष्ठःनरः

# वादः, न वितण्डावादः

## ॥ सन्मेधाप्रागट्यम् ॥

– श्रेयःकान्तः

(संवादः)

दृश्यम्–तृतीयम्–

सर्वे बालाः हर्षोल्लासेन खेलन्ति। सायं कालः सञ्जातः, कालनिवेदकेन घण्टनादः कृतः। कथितं च तेन–

न गर्वः कर्तव्यो, मम बहुतरं ज्ञानमसमं,
बलंरूपं शस्यं मम हि रुचिरा श्रीः पृथुत्तरा।
सदा भाग्यं धैर्यं प्रवरगुणशीला च प्रतिभा,
सुकान्ता कान्ता मे प्रगुण महितः सुनु-सुहितः [ शिखरिणी छन्दः ]

सर्वेऽपि दारकास्तच्छ्रुत्वा स्वं स्वं गृहं गताः। भोजनावसरं विज्ञाय मनीषादयोऽपि स्वगृहं गताः। हस्तपादादिकं शुद्ध–निर्मलजलेन प्रक्षाल्य रसवतीगृहं गताः। स्वमातरमपि रसवतीकरणोद्यतां दृष्ट्वा सर्वेऽपि गृहबालकाः मनसि प्रमोदापूर्णाः, यतः सर्वेऽपि बालाः क्षुधिता आसन्।

यतः उक्तं–क्षुधासमा वेदना नास्ति। क्षुधितनरः किं पापं न करोति, तन्न कथ्यते। सर्वेऽपि शान्तमनसः स्व–स्वस्थाने समुपविष्टाः। पञ्च–दश क्षणान्तरमेव मात्रा भोजनं परिवेषितं। सानन्दं सर्वैं र्भोजनं कृतम्।

भोजनान्तरं सर्वेऽपि बालाः पाठशालायाः पठनलेखनादिगृहकार्यकरणार्थं समुद्यताः। सर्वेऽपि मौनेनैव स्वकार्यं कुर्वन्ति।

दृश्यम्–चतुर्थम्–

(गृहस्य बाह्यान्तरभागौ द्वावपि दृश्यौ भवेत् तथा योजितम्)

अत्रान्तरे गृहपतिर्लालनः समागतः। तदैव सर्वेऽपि बालाः स्वासनं संत्यज्य समुत्तिष्ठन्ति। शिरोनमनपूर्वकं अभिवादनं कुर्वन्ति। गृहपतेः अन्तो गमनपश्चादेव ते बालाः स्वासने उपविशन्ति। पुनश्च स्वकार्यरताः भवन्ति। अप्सराऽपि सोष्णजलेन स्वस्वामिनः पादौ प्रक्षालयति। तया दत्तमासनम्। समुपविशति सः। करोति मुखशोधनं। तदा तस्य स्वयंप्रभामाताऽपि पार्श्वम् आस्ते। यथेच्छं भोजनं दत्ते। पत्नी तु तालवृन्तेन मन्दं मन्दं शीतलवायुं वीजयति।

भोजनान्तरे पुनश्च वदति जननी, वत्स ! नीतिं कुर्याः। अनीतिः महत्पापं। ततरात्मा तद्दोषेन पुनः पुनः रक्षितव्यः। अपितु–अनीत्या प्राप्तं धनं नैव तिष्ठति। यदि सद्भाग्येन तिष्ठति तदपि बाहुल्येन पञ्च–दशवर्षाण्येव।

अस्माकमपि न प्रभूताऽपेक्षा। न्यायेन यत् समुपार्जितं भवति, तेनैव गृहकार्यं करिष्यामः। यतो न्यायोपार्जितं धनं सद्‌द्रव्यमित्युच्यते। ततो वत्स ! न्यायमार्गेण प्रवर्तनीयम्।

अथ भोजनान्तरं स्वपरिशीलनापवरके स गतः। सार्धघटिकापश्चात् तत्राऽऽगतो मनीषः।

नतमस्तकेन च सविनयं प्रोक्तम्।

ईश्वरवादस्य चर्चाकरणे यः समयो भवत्पादेभ्योऽस्मभ्यं दत्तः स सञ्जातोऽस्ति। यदि भवान् समीच्छेत् तर्हि सर्वेऽपि बालानाकारयामि।

लालनेन प्रोक्तमधुनैवाऽऽगच्छन्तु सर्वे। ममाऽपि पश्चात् कार्यार्थं बहिर्गन्तव्यम्। ततः पश्चात् सर्वेऽपि बालाः समागताः। सर्वैः स्वं स्वं स्थानं गृहीतम्।

लालनेनोक्तम्–पश्यन्तु सर्वेऽपि, ह्यस्तने दिनेऽस्माभिः चर्चितम् यद् ईश्वरकर्तृत्ववादे, यदि ईश्वर एव विश्वस्रष्टा, भोक्ता, संहर्ता, परिनिर्वाता, पुनश्च कादाचित्कभावेन स्वेच्छया मोक्षादागन्ता अस्ति। यद्येवं पञ्चान्यपि कार्याणि यदीश्वरः एव करिष्यति, तदा जगद् व्यवस्थायाः सुघटनं दुर्लभं भविष्यत्येवेति लगति माम्।

प्रथमं तावदत्र चिन्तयामो– यदीश्वरो सृष्टिं सृजेत् तर्हि जगत् कीदृक् सृजेत्? अस्मिञ्जगति कुम्भकारो मन्दमतिषु धुर्यः कथ्यते। मन्दमतिरपि स कुम्भकारः कुम्भनिर्माणं कीदृशं करोति? प्रकृष्टमेव घटशिल्पं स रचयति। यदि मन्दमतिवताऽपि कुम्भकारेण कुम्भशिल्पं सुष्ठुतरं रच्यते, तदा सर्वोत्कृष्टज्ञानप्रागल्भ्यप्रतिभाचातुर्यसमन्वितचराचरविश्वसंज्ञाता ईश्वरो यदि जगद्रचनां करोति, सा प्रकृष्टैव संभावनीया।

अधुना त्वस्माभिः यदि जगत् दृष्टिपथे स्थाप्यते, तदाऽस्माभिः स्पष्टतरं ज्ञायते यत्। संपूर्णं जगन्न सुन्दरं। किन्त्वसौन्दर्यभृतप्यमस्ति ततश्चिन्त्यते। यदीश्वररचना तदा समीचीना एव भवितव्या। सुन्दरा एव भवितव्या, न त्वसुन्दरा। किन्त्वेवं तु न, यतः प्रभूततरा लोकाः दुर्जनाः, सज्जनाः स्त्वल्पतरा एव। दुःखभाजाः जना बहव अन्धाः, पङ्गवोः, निर्धना, धनवन्तोऽपि पत्न्यादिपरिवारेण दुःखिताः। इत्येवं खनाः बहुप्रकारेण दुःखिनः प्रभूताः, सुखिनः अल्पतरा एव। यदि ब्रह्मणा सृष्टं, तर्हि नैतादृशं विश्वं भवति।

तर्हि केन कृता विश्वसंरचना? इति प्रश्नो भवति। न केनाऽपि । यदि कोपि कर्ता। तदा तस्य पुनःकः कर्ता, अयमपि प्रश्नो भवति। ततो निश्चितं जगत्स्थिति स्व–स्वकालानुरूपेण भवति। सुखं–दुःखं तु जीवानां स्वकृतकर्मफलेन संपनीपद्यते। यथा प्रवृत्तिं करोति तादृशं फलं प्राप्नोति। ततः शुभाशयेन शुभा प्रवृत्तिरेव करणीया, नाशुभा।

।। इति शम् ।।

परान् जीवयित्वा स्वं जीवति–स मानवः।

## लेखप्रेषकेभ्यो विज्ञप्तिः

* ''श्रीनिःश्रेयसम्''पत्राय प्रेषणीयलेखेषु लेखाः पृष्ठस्यैकपार्श्वे लेखनीया-ऽक्षरपङ्क्तिमध्ये व्यवधानमावश्यकम् उभयपार्श्वयोरपि रिक्तस्थानं रक्षणीयम्। * स्वच्छाक्षरै र्लिखिता एव लेखाः प्रेषणीया अर्थाल्लेखेषु अक्षरस्वच्छताऽनिवार्या, अस्पष्टाऽशुद्धा-क्षरलिखितलेखा न प्रकाशिष्यन्ते * नव्यसृष्टलेखेषु व्याकरणछन्दोऽलङ्कारप्रमुखाणां शुद्धिरावश्यिकी। *ये लेखा निर्णितप्रकाशनदिनात् मासत्रयपूर्वं प्राप्स्यन्ते त एव लेखा प्रकाशिष्यन्ते। * तदनन्तरं-प्राप्तलेखा यदि यथोक्तपूर्वा भविष्यन्ति तर्ह्यागामिन्यङ्के प्रकाशिष्यन्त इति समवधेयम्। *गद्यपद्य लेखेषु सर्वेषु स्वरव्यञ्जनसन्धिः कर्तव्यैव। *अर्थभेदस्थान एव ''अवग्रहः'' कर्तव्यः। *अनुस्वारानुनासिक-योर्विकल्पस्थानेऽनुनासिक एव कर्तव्यः, यत्र नित्यानुस्वार-स्तत्रानुस्वाकरणे न बाधा। *लेखप्रकाशनेऽप्रकाशने च सम्पादकप्रवराणा-मेवाधिकारो भविष्यति। * अद्यतन समये येन लेखो लिखितो भवेत् तं प्रार्थयेऽहम् न कदाऽपि ''अज्ञातकर्तृकः'' इति कृत्वा प्रेषणीयो, भवेद्, अज्ञात इति प्रयोगः प्राचीनेषु भवत्येव इति ज्ञातव्यम्।

- प्रकाशकः




संसारार्त्तिविभेदनैकवणं,
**निःश्रेयसं** गीयते,
सम्यग्ज्ञानसुरापगां वितनुतां,
**निःश्रेयसं** भास्वरम्।
सद्धीवैभववारिधिः प्रविलसेत्,
**निःश्रेयसेनाद्**भुतो,
वर्णन्याससुरम्यकाव्यरचना,
**निःश्रेयसाया**ऽस्तु मे।।१।।

वाक्शुद्धिं प्रतिभां नवां च लभते,
**निःश्रेयसाद्** वाचकश्,
चत्वारो गुणखण्डका गुणकरा,
**निःश्रेयसस्या**ङ्गणे।
कीर्तिर्मुक्तिकरी च सद्गुणकरी,
**निःश्रेयसे** संम्भवेत्,
सद्भावैः समतादिकैः शुभकृते,
**निःश्रेयस !** स्यात् सदा।।२।।

**प्रकाशकम्**

**जगद्गुरु पू.आ.श्री**

**विजय हीरसूरीश्वरजी श्रुतज्ञानभवनम्**

पालडी-अहमदाबाद

Print : Deepak Oswal,Pune
020-24477791, 9822055891